In Public domain. Digitization Muthulakshmi Research Academy

संस्कृत अकाडमी ग्रन्थमाला —113

श्री पिसुपाटि चिदम्बरकवि विरचितः

राजधर्मः

पिसुपाटि विश्वेश्वरशास्त्रिणा कृतया
जयाख्यया व्याख्यया सहितः

प्रधानसम्पादकः
आचार्य के. नीलकण्ठम्
निदेशकः

सम्पादकः
डा.सन्तोषकुमारःजोषी
सहायसंशोधकः

संस्कृत अकाडमी
(केन्दीयसंस्कृतविश्वविद्यालयेन मानिता आदर्शशोधसंस्था)
उस्मानिया विश्र्वविद्यालयः, हैदराबाद् 500007
2021

In Public domain. Digitization Muthulakshmi Research Academy

In Public domain. Digitization Muthulakshmi Research Academy

संस्कृत अकाडमी ग्रन्थमाला —113

श्री पिसुपाटि चिदम्बरकवि विरचितः

राजधर्मः

पिसुपाटि विश्वेश्वरशास्त्रिणा कृतया जयाख्यया व्याख्यया सहितः

प्रधानसम्पादकः
आचार्य के. नीलकण्ठम्
निदेशकः

सम्पादकः
डा.सन्तोषकुमारःजोषी
सहायसंशोधकः

संस्कृत अकाडमी
(केन्दीयसंस्कृतविश्वविद्यालयेन मानिता आदर्शशोधसंस्था)
उस्मानिया विश्र्वविद्यालयः, हैदराबाद् 500007
2021

In Public domain. Digitization Muthulakshmi Research Academy

संस्कृत अकाडमी ग्रन्थमाला –113

श्री पिसुपाटि चिदम्बरकवि विरचितः राजधर्मः
पिसुपाटि विश्वेश्वरशास्त्रिणा कृतया
जयाख्यया व्याख्यया सहितः

प्रधानसम्पादकः **आचार्य के. नीलकण्ठम्**

सम्पादकः **डा.सन्तोषकुमारःजोषी**

ISBN- 978-93-80171-56-2

प्रथममुद्रणम् - 2021

मुद्रितप्रतयः - 200

पृष्ठसंख्या -23+106

मूल्यम् - 200

सर्वाधिकाराः संस्कृतपरिषदायत्ताः

प्रप्तिस्थानम्
निदेशकः
संस्कृत अकाडमी
(केन्दीयसंस्कृतविश्वविद्यालयेन मानिता आदर्शशोधसंस्था)
उस्मानिया विश्र्वविद्यालयः,
हैदराबाद् 500007
दूरवाणी- 040 27070281

In Public domain. Digitization Muthulakshmi Research Academy

Sanskrit Academy Series No. - 113

RAJADHARMA

OF
SRI PISUPATI CHIDAMBARAKAVI

WITH THE COMENTERY JAYA
OF
PISUPATI VISWESWARA SHASTRY

Chief Editor
Prof K. Neelakantham
Director

Editor
Dr.Joshi Santosh kumar
Research Assistant

SANSKRIT ACADEMY
(Adarsha Shodha samstha)
Recognised by Central Sanskrit university, New Delhi
Osmania University, Hyderabad-07
2021

In Public domain. Digitization Muthulakshmi Research Academy

Sanskrit Academy Series -113

RAJADHARMA

OF
MAHAKAVI SRI CHIDAMBARA
WITH THE COMENTERY JAYA
OF VISWESWARA SHASTRY

Chief Editor : Prof. K. Neelakantham

Editor : Dr. Joshi Santosh Kumar

ISBN – 978-93-80171-56-2

First Edition: 2021

Copies: 200

Number of Pages : 23+106

Price : 200/-

Printed at-Karshak Art Printers,
Hyderabad

Copies can be had from:
SANSKRIT ACADEMY
(Adarsha Shodha samstha)
Osmania University, Hyderabad-07
Phone & Fax: 040-27070281
Website – www.sanskritacademy.ac.in

In Public domain. Digitization Muthulakshmi Research Academy

Preface

ओम् श्री गुरुभ्यो नमः
श्रीशङ्करभगवत्पादा विजयन्ते

Sanskrit Academy is now bringing out a book titled *Rajadharma* composed by Kavyakalanidhi, Shatavadhani Sri Pisupati ChidambaraShastry. The manuscript of this book was given to Sanskrit Academy by Sri Pisupati Vasudeva Sharma. This Vasudeva Sharma was the son of Sri Vishveshwara Shastry who composed an authentic commentary to the present book *Rajadharma* in Sanskrit. This manuscript was written in Telugu script. Sri Pisupati Chidambara Shastry a versatile scholar of Sanskrit and Telugu languages composed nine books in Sanskrit and twenty nine in Telugu. He belonged to Karividi village in Prakasham district of Andhra Pradesh. He was a court poet of Mysore kingdom and honored by the King Sri Rama Varma of Travancore kingdom. Present Kavya *Rajadharma* consists of two cantos with 118 *slokas.*

The concept of *Rajadharma* was introduced by Sri Vedavyasa in the epic *Mahabharata.* It refers to the laws or rules prescribed for the rulers in the context of ensuring proper administration of the entire kingdom. Manusmriti, Yajnavalkyasmriti and some other Smriti books have also mentioned about the concept of *Rajadharma* and laid down certain rules called as Dharmasutras. They too have defined the rights and duties of the king which are to be followed by him strictly to maintain good governance in the Kingdom. In ancient times the entire discipline of political science was called as Rajadharma. According to these the King should possess the

In Public domain. Digitization Muthulakshmi Research Academy

qualities of mother, father, preceptor, protector and also the attributes of the gods such as fire, wealth, wind and others. They have also mentioned certain rules for the appointment of officials to cater to the administration.

Keeping this vast literature on *Rajadharma* in view, Sri Chidambara Shastry who attained mastery over Dharmashastra literature, has composed this simple book on *Rajadharma*. This would definitely facilitate the readers to understand the *Rajadharma* easily.

I appreciate the sincere efforts of Dr. Santoshkumar Joshi research assistant in Academy. He has good knowledge on manuscripts and also on SahityaShastra and well acquainted with knowledge of typography. He has done a thorough study of this manuscript, took every care and made directly a D. T. P. copy ready for publication. I acknowledge the help of two Deputy directors Dr. V. Subrahmanayam, Dr. K. Varalakshmi who are always available to assist in research, publications and teaching in the Academy.

I greatly think of the encouragement of honorable Vice-chancellor Prof. P.N. Shastry sir and Registrar Prof. Subrahmanya Sharma, Central Sanskrit University, New Delhi (formerly Rashtriya Sanskrit Sansthan) I thank honorable Vice-chancellor Prof. D. Ravinder, Osmania University for his motivation in the research and publications of Sanskrit Academy.

I thank Karshak Art Printers, Vidyanagar Hyderabad for printing it on time.

Prof. K. Neelakantham

Director

In Public domain. Digitization Muthulakshmi Research Academy

आमुखम्

- विद्यावारिधिः डा. निष्ठल सुब्रह्मण्यशास्त्री, पोन्नूरु

इह खलु लोके नृभिस्साधनीयेषु पुरुषार्थेषु चतुर्षु धर्मार्थकाममोक्षेषु द्वितीयपुरुषार्थस्य स्वात्मप्रयोजनरूपवित्तसम्पादनेन साकं लोकव्यवहारसाधनमपि सेत्स्यतीति विदितचरमेव विदुषां समेषाम्। लोकव्यवहारेषु प्रजापालनं राज्ञाऽवश्यकरणीयमेव। प्रजापालनं न केवलं राजायत्तं किन्तु सचिवदण्डनाथादिबहुव्यक्तिकृतोद्योगैरेव सिध्यति। दुरूहं च राजतन्त्रम्।

श्लो **राज्ञि धर्मिणि धर्मिष्ठाः पापे पापरता जनाः।**
राजानमनुवर्तन्ते यथा राजा तथा प्रजाः॥

इत्युक्त्या धर्मशास्त्रानुसार्येव राजवर्तनं स्यात्। अनुक्षणं राजा सर्वान् परीक्षेत। अस्मिन्नेव पथि श्रीराम धर्मराजादयः पालनं चक्रुः कीर्तिं च महतीमविन्दन्त।

" कर्ता वा नाटकानामिममनुभवति क्लेशमस्मद्विधो वा" इति मुद्राराक्षसे राक्षसमन्त्रिवचनं व्यूहप्रतिव्यूहादिघटितं दुरूहं च राज्यतन्त्रमिति ज्ञापयति नः।

अतो राज्यतन्त्रबोधनायैव प्राञ्चो महान्तः अर्थशास्त्रमवातारयन्। पुरा पुराणेषु भारते च व्यासमहर्षिः तत्प्राक् रामायणे भगवान् वाल्मीकिश्च सूचयामासतुर्बहूनर्थशास्त्रविषयान्। तदनन्तरं पण्डिताः महतो ग्रन्थान् चक्रुः प्रजाहिताय। तेषु प्रथमं गणनीयः भारतीयसंस्कृतेः प्रवर्धयिता ऋषितुल्यश्चाणक्यः।

In Public domain. Digitization Muthulakshmi Research Academy

मौर्यसाम्राज्यस्थापकत्वात् चाणक्यः क्रीस्तोः 321 सं कालवर्तीति केचित्। winternitg इत्यादयः पाश्चात्याः चाणक्यस्य क्रीस्तोः परं तृतीयशतकवर्तित्वं मेनिरे । J.Jolly तु मौर्यान् चन्द्रगुप्तं च यस्मिन् भाष्ये पतञ्जलिर्निर्दिदेश,तस्मिन्नेव भाष्ये चाणक्यं न सूचयमासेति हेतोः चाणक्यश्चतुर्थशतकवर्तीति मेने। वायुपुराणं क्रीस्तोः पूर्वं 598 वत्सरे चाणक्यश्चन्द्रगुप्तं राजानं चकारेति वदति। वायुपुराण-पाश्चात्यसिद्धान्तयोः 250 संवत्सरकालो भेद इति वदन्ति । पतञ्जलिः पुष्पमित्रं निर्दिदेश। पतञ्जलिकालात्प्राचीनाः एव चाणक्यः। अनेन महात्मना निस्स्वार्थजीविना प्रजासंरक्षणधिया चन्द्रगुप्तं निमित्तीकृत्य पञ्चदशाधिकरणैः पञ्चाशदधिकशताध्यायैरर्थशास्त्रं निर्मितम्।

जैनपण्डितस्य सोमदेवसूरेः नीतिवाक्यामृतमस्ति। मल्लिनाथसंस्पृष्टः कामन्दकः स्वनाम्ना नीतिसारं विंशतिसर्गैः रचयामास। अस्य ग्रन्थस्य उपाध्यायनिरपेक्षा, नयप्रकाश इति द्वे व्याख्ये प्रसिद्धे। एवं षोडशशताब्दमध्यकाले मैथिलराजास्थानकविः भवेशसूनुः बिल्वपञ्चवंशीयः धर्माधिकारपदवीमधिष्ठितः वर्धमानोपाध्यायः शिक्षाविवरणग्रन्थं निर्ममे। महाकविः क्षेमेन्द्रः नीतिकल्पतरुं कृतवान्। व्यासर्षिणा महाभारते विदुरनीती रचिता। शुक्राचार्येण शुक्रनीतिः स्वनाम्ना कृता। प्राचीनकाल एव बृहस्पत्यादयो ह्यर्थशास्त्रग्रन्थान् प्राणैषुरिति ज्ञायते। लोकतन्त्रविषयानाधारीकृत्य विष्णुशर्मणा पञ्चतन्त्रं कृतम्। एवमेव हितोपदेशोऽपि गणनीयः।

अस्मिन्नेव मार्गे आधुनिकैरपि ग्रन्थाः कृताः। परिशोधानात्मकग्रन्थेषु D.C.Sircar महाशयेन Studies in the political and Administrative systems in ancient and medieval India

In Public domain. Digitization Muthulakshmi Research Academy

इति Dr. K.P. Jayasawal महाशयेन Hindu polity इति ग्रन्थौ कृतौ। अन्येऽपि नूत्नैः कृता ग्रन्थाः पठितॄन् रञ्जयन्ति।

अस्यामवस्थायामाधुनिकसमाजमधिकृत्य राज्यव्यवहारनिरूपणार्थं महीशूरास्थानपण्डितः शतावधानी घटिकाशतग्रन्थनिर्माता संस्कृतान्ध्र ग्रन्थराजकर्ता श्रीरामवर्मणा प्रदत्तवीरसिंहकङ्कणधरः दर्भाङ्गमहाराजदत्त काव्यकलानिधिबिरुदः श्रीसत्यनारायणमहासंस्थानदत्तसुवर्णविद्याकुण्डल - मण्डितः, अयोध्यानगरसंस्कृतमहासभादत्तविद्याभूषणोपाधिः, आन्ध्रपद्म-पुराणकर्ता चिदम्बरो नाम महाकविः अर्थशास्त्रानुसारिणं राजधर्माख्यं प्रबन्धं निर्ममे।

अत्र द्वौ सर्गौ स्तः। एतत्प्रबन्धस्यादिमश्लोकः इत्थं दृश्यते।

श्लो **यस्यान्तरेव सचराचरमस्ति विश्वं**
संलक्ष्यते यदखिलान्तरसन्निविष्टम्।
यद्भासमानमनुभाति समस्तमेत-
त्तस्मै नमोऽस्तु महसे तमसः परस्मै ॥ 1-1

प्रबन्धस्यास्य एषामनुजैः पिशुपाटिविश्वेश्वरशास्त्रिभिर्व्याख्या कृता यस्या नाम जया। एभिरपि आर्यात्रिशतीत्यादयो ग्रन्थाः गैर्वाण्यामान्ध्र्यां च विरचिताः। महाकविश्चिदम्बरः, "क्व सूर्यप्रभवो वंशः क्वचाल्पविषया मतिः। तितीर्षुर्दुस्तरं मोहादुडुपेनास्मि सागरम्" इति कालिदासो यथा बभाण तथैव क्व राजधर्मोऽप्रतिमप्रभावः? क्व मामकीना मतिरल्पलक्ष्या?

इति ब्रवीति विनयेन। भार्गवाः दण्डनीतिं, बार्हस्पत्याः तया सह वार्तां, चाक्षुषमतानुयायिनस्ताभ्यां सह त्रयीं च प्रमाणं मन्वते। ग्रन्थेऽस्मिन् विद्यमानैषा सूक्तिर्नकेवलं राज्ञामेव किन्तु सर्वेषां मानवानामावश्यकी

In Public domain. Digitization Muthulakshmi Research Academy

प्रतिभाति तद्यथा -

असत्यवाचामतिमात्रनिद्रां
चापल्यमौद्धत्ययुतञ्चवेषम् ।
अधर्मसंयुक्तमनर्थयुक्तम्
त्यजेत्प्रभो ! संव्यवहारमीशः ॥ 1-23

कामं निषेवेत - इति श्लोकः भारवेः "न बाधतेऽस्य त्रिगुणः परस्परम्" इति श्लोकं स्मारयति ।

अथ वर्णाश्रमरक्षितृत्वान्नृपालस्य वर्णाश्रमधर्माः प्रत्यपादिषता ते च गौतमीयादिधर्मशास्त्रेष्वपि प्रसिद्धाः । अद्यतनकाले सर्वैराश्रयणीयस्साधारणो धर्म एवमुक्तः -

श्लो **क्षमाऽहिंसा सत्यशौचेऽनसूयाऽनृशंसता ।**
सर्वेषामपि वर्णानां धर्मस्साधारणः प्रभो ! ॥ 1-36

अमात्यवरणे भारद्वाज-विशालाक्ष-पराशर-नारदादीनां मतानि सम्यङ्निरूपितानि। तत्रापि प्रथमेऽल्पदोषस्य सत्त्वात् अन्यन्मतं, तत्राप्यरसिकत्वादितरदेवं क्रमेण मतनिरूपणं यत्कृतं तद्रोचते सहृदयेभ्यः। एवं मन्त्रिपरीक्षण पुरोहितलक्षणमन्त्रिनियमनगूढपुरुष नियमनदूतनियोजन राजव्यापारात्मरक्षणजनपदनिवेशाध्यक्षनियोजन कर्तव्यसङ्ग्रहादयो निरूपिताः कविशेखरेणानेन ।

अथ व्याख्याविषये किञ्चिद्वक्तव्यमवशिष्यते। व्याख्यातारोऽपि कृतबहुग्रन्थाः देव्युपासकाश्च। व्याख्यातॄणां वैयाकरणत्वात्प्रायशः प्रतिपदं व्याकरणशास्त्रं प्रतिपादितम्। यद्यपि विस्तृतिर्नावश्यकी तथाप्यध्येतॄणां व्याकरणज्ञान मप्यनया व्याख्यया भवति ।आवश्यकशब्दः विशेष्यनिघ्न इति

In Public domain. Digitization Muthulakshmi Research Academy

या चर्चा व्याख्यात्रा कृता सा महान्तमानन्दं जनयति। एवं परम्पराशब्दो व्याख्यातः। आवश्यकरत्वसौ किरणावलिः इति प्रयोगात् आवश्यकशब्दस्य विशेष्यनिघ्नता इति साधितम्। विषनिरूपणप्रस्तावे बहुविधपरीक्ष्यादिकं महता यत्नेन विरचितमेभिः। एवं कोशक्षयनिरूपणे (2-51)राजकरहरणसाधनानि इत्यत्र अर्थशास्त्राच्चत्वारिंशद्विषयाः सङ्गृहीता इति चतुरस्रम्। उपधालक्षणादि यदावश्यकं तद्व्याख्यायामुदाहृतम्। एवमेव ग्रन्थस्सुन्दरः। राजकीयपुरुषा एव न, किन्तु अधुनातनास्सर्वेऽपि ग्रन्थमिममवश्यं पठेयुरिति, विद्यार्थिनां कृते पाठ्यग्रन्थत्वेनायं संस्थाप्य इति मन्मनीषा।

इमं ग्रन्थं सादरं पठित्वा पाठकजनास्सफलयन्तु कवितल्लजयोः मूलग्रन्थव्याख्यारचयित्रोः परिश्रममिति सहृदयानभ्यर्थये इति शम्।

हेमलम्बः
माघकृष्णपञ्चमी

एवं निवेदयिता
निष्ठल सुब्रह्मण्यशास्त्री

In Public domain. Digitization Muthulakshmi Research Academy

वाङ्मुखम्

मातृकापरिचयः-

राजधर्माख्यग्रन्थः पिसुपाटिचिदम्बरशास्त्रिणा विरचितः। यस्य मातृका ग्रन्थकर्त्रा स्वयं लिखिता। कर्गदस्वरूपे तेलुगुलिप्यां समुपलभ्यमाना अस्ति। मातृकेऽयं तस्य परिवारस्य परिरक्षणे अवर्तत। प्रस्तुतकाव्यस्य व्याख्यानकर्तुः पिसुपाटि विश्वेश्वरशास्त्रिणः पुत्रः श्री पिसुपाटि वासुदेवशर्मा मातृकाम् इमां प्रकाशनाय संस्कृतपरिषदे अदात्। मातृकायामस्यां द्विचत्वारिंशत्युत्तरशतं पृष्टानि सन्ति । पृष्टस्य आकारः A4 आकृत्या समाना, तथा च एकैकस्मिन् पृष्टे विंशति, द्वाविंशतिर्वा पङ्क्तयः सन्ति। मातृकायाःअस्याः अवस्था उत्तमा एवास्ति। राजधर्माख्यग्रन्थस्य मातृकेयम् एका एव उपलब्धा। अस्याः मातृकायाः आधारेण ग्रन्थोऽयं अधुना संस्कृतअकाडमी द्वारा प्रकाश्यमाना वर्तते ।

पिसुपाटि चिदम्बरशास्त्रिणः परिचयः

ब्रह्मश्री पिसुपाटि चिदम्बरशास्त्रिमहाशयाः खरनामसंवत्सर-मार्गशीर्षशुक्लचतुर्दश्यां भौमवासरे 12-02-1892 तमे दिनाङ्के जनिं लेभे । अस्य पितरौ कनकाम्बासीतारामय्यदम्पती स्तः । जन्मस्थानं तु आन्ध्रप्रदेशस्थः प्रकाशं इति मण्डलान्तर्गतः करिविदि नामक ग्रामः। अस्य ग्रन्थकर्तुः सोदरौ तावत् महाविद्वांसौ राजधर्मकाव्यस्य व्याख्याकारः पिसुपाटि विश्वेश्वर शास्त्री, द्वितीयश्च शतावधानी सुब्रह्मण्यशास्त्री ।

In Public domain. Digitization Muthulakshmi Research Academy

राजधर्मव्याख्याकारः विश्वेश्वरशास्त्रिमहोदयः काव्यारम्भश्लोक-व्याख्याने चिदम्बरमहाकवेःवैशिष्ट्यम् एवं प्रास्तावीत्-"अथ तत्रभवान् श्रीमहीशूरमहाराजास्थानमहाविद्वत्पदवीमलङ्कुर्वाणः, अष्टावधान,शतावधान,घटिकाशतग्रन्थकरणधुरीणः संस्कृतान्ध्रभाषामयबहु प्रबन्धकर्ता अनन्तशयनमहाराज श्रीरामवर्मप्रदत्त कविवीरसिंहकङ्कण अलङ्कृत करो दर्भाङ्गमहाराज श्रीरमेश्वरसिंहसभाङ्गण समुपार्जित "काव्यकलानिधि" बिरुदः श्रीरत्नगिरिधाम श्रीसत्यनारायणस्वामि महासंस्थानप्रदत्तसुवर्ण "विद्याकुण्डल" मण्डितकर्णयुगलः। अयोध्यानगरसंस्कृत महासभाप्रदत्त "विद्याभूषणो"पाधिभूषितः। सेतु शीताचलमध्यवर्त्यनेकराजन्य विद्वत्परिषत्समासादित सुवर्णपदकादि बहुविधबहुमानराजमानः। प्रभुश्रेयोभिलाषी, चिदम्बरो नाम महाकवि भारतीय नरपतीनामवश्यविज्ञेयं। त्रिवर्गसाधनमर्थशास्त्रानुसारिणं राजधर्माख्यं, सर्गद्वयात्मकं प्रबन्धं चिकीर्षुः"-

एवमेतेन चिदम्बरशास्त्रीमहोदयः महीशूरराजास्थानमहाविद्वाना-सीदिति, नाना सभाभ्यः विविधोपाधीः अप्राप्नोदिति, विविधमहाराजेभ्यः भृशं सम्मानितः इति ज्ञायते ।

विद्याभ्यासः गुरवश्च -

"सुब्रह्मण्यशास्त्रिमहोदयः व्याकरणादिशास्त्रेषु प्रकाण्डपण्डितानां विदुषां सविधे व्याकरणादिशास्त्रान् अधीतवान्। तत्र व्याकरण- शास्त्र अध्यापयितारः जयन्ति भगीरथशास्त्री, वेलूरि शिवरामशास्त्री, जयन्ति सूर्यनारायणशास्त्री च भवन्ति। तथा वारणासि रामब्रह्म शास्त्रीमहोदयः संस्कृतं, आशुकवितां च अध्यापयत् ।

In Public domain. Digitization Muthulakshmi Research Academy

चिदम्बरशास्त्रिणा संस्कृतान्ध्रभाषयोः नैके ग्रन्थाः विरचिताः । ते च

संस्कृतग्रन्थाः

1. पञ्चायतनपञ्चशति 2.कृष्णराजाभ्युदयम् 3.अवधानादर्शम् (व्याख्यानसहितम्) 4. राजधर्मः (विश्वेश्वरशास्त्रिणः व्याख्यान सहितम्) 5. अष्टकदम्बम् (63 अष्टकानि) 6. शिवसूत्रसंग्रहः 7. तृणभावबोधिनी 8. देशयात्राचरितम् 9. महीशूरपुर्याभ्युदयचम्पू

तेलुगुग्रन्थाः

1.श्रीमदान्ध्रपद्मपुराणम्(चत्वारिसम्पुटानि) 2. हैमवतीविलासमु
3. सुब्रह्मण्येश्वरीयमु 4.कपोतकिरातम् 5.कनकाम्बाचरितम्
6. श्रीरामाञ्जनेयम् 7.श्रीकृष्णसन्देशम् 8.पञ्चनलीयम्
9. प्रचण्ड गाधेयमु 10.मोहिनीरुक्माङ्गदमु
11.अर्धानुस्वारशकटरेफ निर्णयमु 12.दत्तात्रेयशतकम्
13.सीतारामशतकम् 14.दारुण शतकम्
15.राजराजेश्वरीशतकम् 16.पायकरावुपेटसीताराम शतकम्
17.राजसभाविहारम् 18.शृङ्गारभूषणम् 19.गीत गोविन्दम्
20.भारतीयप्रबोधम् 21.षोडशमहाराजचरितम्
22.महाभारतनीतिकथासंग्रहम् 23.सप्तर्षिचरितम्
24.पीठिकापुरसंस्थानशतावधानम्
25.नावबुपेटसंस्थानशतावधानम्
26. बेजवाडशतावधानम् 27.ओङ्गोलुशतावधानम्
28.गद्वाल संस्थानशतावधानम् 29. आशुकवितावधासंग्रहम्

In Public domain. Digitization Muthulakshmi Research Academy

बिरुदानि

1. महीशूरमहाराजास्थानमहाविद्वन्

2. काव्यकलानिधिः 3. आशु कविकेसरी

4. विद्याभूषण 5. शतावधानी

इत्यादि बिरुदैः महा- कविरयं बहुल बहुभिः सभाजितः ।

व्याख्याकृतः पिसुपाटि विश्वेश्वरशास्त्रिणः परिचयः

पिसुपाटि विश्वेश्वरशास्त्रिमहोदायाः प्रभवनामसंवत्सर चैत्र बहुळ द्वितीया बुधवासरे 11-04-1906 तमे वर्षे, आन्ध्रप्रदेशस्थ प्रकाशमण्डल अन्तर्गत करवदि ग्रामे जन्म प्राप्तवन्तः । एतेषां पितरौ सीतारामय्य कनकाम्बा दम्पती । पिसुपाटि चिदम्बर शास्त्री, एवं पिसुपाटि सुब्रह्मण्यशास्त्री च सोदरौ भवतः ।

विद्याभ्यासः गुरवश्च

विश्वेश्वरशास्त्रीमहोदयः प्रमुखवैयाकरणानां श्री पुल्य उमामहेश्वर शास्त्रिणां, वेदुल सूर्यनारायणशास्त्रिणां, कुप्पाद्रि आंजनेयशास्त्रिणां सविधे व्याकरणं, चावलि लक्ष्मीकान्त शास्त्रिणां सविधे वेदान्तशास्त्रं अधीतवान् । श्रीपादनरसिंहम् तेषां मन्त्रदीक्षागुरवस्तावत् श्री श्री श्री चन्द्रशेखरेन्द्रसरस्वती स्वामिनःसन्ति ।

अध्यापकः

अयं महाशयःद्वाविंशतिवर्षाणि यावत् नेल्लूरुपट्टणस्थ वेङ्कटराज-महाविद्यालये आन्ध्रभाषा अध्यापकत्वेन, ततः पञ्चवर्षाणि यावत् श्री भीमेश्वर प्राच्यकलाशालायाम् आन्ध्रसंस्कृताध्यापकत्वेन कार्यम् अकरोत् ।अनन्तरं पञ्चदशवर्षाणि यावत् सूर्यरायान्ध्र निघण्टोःकार्यभारम् अवहत् ।

In Public domain. Digitization Muthulakshmi Research Academy

ग्रन्थाः

विश्वेश्वरशास्त्री संस्कृतान्ध्रभाषयोः नैकान् ग्रन्थान् अरचयत्, ते च

1.राजधर्मकाव्यव्याख्यानम् 2. आर्यात्रिशती 3.श्री कामाक्षी विलासः
4.श्रीरत्नपाञ्चालिका 5. प्रद्युम्नाभ्युदयः 6. दूतवाक्यम्
7.आन्ध्रनक्षत्रमाला 8.श्रीपार्वतीपरिणयः 9.अध्यात्मरामायणम्
10. कालिदासकवितावैभवम् (चत्वारः भागाः) स्व विषयविवरणज्ञापिका ग्रन्थान्तपुष्पिका आर्यत्रिशत्याम् एवं विद्यते -

"इति श्रीमद्भारद्वाजसगोत्रेणापस्तम्बसूत्रेण कनकाम्बासीतारा सुधीतृतीयतनूजेन अष्टावधानी शतावधानी आशुकविकेसरी काव्यकला निधिरित्यादि बहुविधबिरुदभाजनस्य आसेतुशीताचलस्थ सकलभूपा सभासमुपलब्ध सम्मानभासुरस्य आन्ध्रपद्मपुराणरचनापरितोषितान्ध्रलोकस्य गीर्वाणान्ध्रभाषामयनैकविध प्रबन्धनिबन्धनचतुरस्य श्रीसूर्यरायान्ध्र निघण्टुरचयितुः श्रीश्रीकृष्णराज ओडयनामकमहीशूरमहाराजास्थानम विद्वत्पदवीभूषणस्य श्रीचिदम्बरकवेः कनिष्ठानुजेन महाभाष्यान्तव्याकरण शास्त्राधीतिनः उभयभाषाकवितानिपुणस्य जगद्गुरु श्रीशृङ्गगिरिपीठाधीश्व श्रीश्रीविद्यातीर्थस्वामि प्रदत्त विशिष्ट सम्मानभाजनस्य श्री सुब्रह्मण्य शास्त्रिणोऽनुजेन पाणिनीय व्याकरणशास्त्रे कृतगाढपरिश्रमस्य बहुवि संस्कृतान्ध्र विमर्शग्रन्थरचनाधुरीणस्य कम्परायचरितव्याख्यारचना परितोषि गीर्वाणविद्वद्बृन्दस्य नाचनसोमनाथीयोत्तर हरिवंशान्ध्रभूषणार्ण व्याख्यारचनाभ्यां हर्षितान्ध्रविबुधलोकस्य सहस्रावधानिनः पोतुकू सुब्रह्मण्यशास्त्रिः कनिष्ठमातुलेन, महाभाष्यान्त पाणिनीयव्याकरणशांकराद्वै वेदान्तप्रस्थान त्रययोरधीतिना प्रथमादि चतुर्थभागान्त श्रीसूर्यरायान्ध्र निघण्टुनिर्माणचणेन श्रीकालिदासकवितावैभव नामक भागचतुष्टयात्म

In Public domain. Digitization Muthulakshmi Research Academy

ग्रन्थरचना परितोषित विबुधलोकेन जगद्गुरु श्रीकाञ्चीकामकोटिपीठाधीश्वर श्रीश्रीचन्द्रशेखरेन्द्रसरस्वतीस्वामिप्रदत्त श्रीविद्यापूर्णदीक्षा पावितजीवितेन संस्कृतान्ध्रभाषामयबहुग्रन्थनिर्माणनिपुणेन अभिनवनन्नयार्यादि बिरुद - विभ्राजितेन पिसुपाटि विश्वेश्वरशास्त्रिणा कृतेयं स्वरचिताया आर्यात्रिशत्याः व्याख्या वरिवस्याख्या स्वोपज्ञ श्रीललितापराभट्टारिका चरणकमलयोरर्पिता विजयतेतराम्" ॥ श्रीः श्रीः श्रीः

एवमेव राजधर्मव्याख्यान्तपुष्पिका एवमस्ति -

"इति श्रीभारद्वाजसगोत्रापस्तमम्भसूत्रकनकाम्बासीतारामतनूभव चिदम्बरकवीन्द्रानुज समधीतव्याकरणवेदान्तमन्त्रशास्त्र संस्कृतान्ध्रभाषायां बहुग्रन्थरचनाविशारद श्रीसूर्यरायान्ध्रनिघण्टुनिर्माणधुरीणाभिनवनन्नयायर्य- बिरुद भासुरविश्वेश्वरसुधीवरविरचितायां राजधर्मव्याख्यायां जयाख्यायाम् द्वितीयस्सर्गस्सम्पूर्णः" ॥

चिदम्बरशास्त्रिणः रचनाशैली

चिदम्बरशास्त्रिमहोदयः विभिन्नवृत्तेषु स्वकवितानैपुण्येन सुन्दरतया मूलश्लोकान् अरचयत् । अत्यन्तं गभीरारञ्जार्थ स्फोरकान् शब्दान् कविना अत्र प्रायुङ्क्त । शब्दागाम्भीर्यं एवं अर्थगाम्भीर्यञ्च प्रतिश्लोकं स्पष्टं भवति । एतादृशविषयाः व्याख्यानेन सम्यक् ज्ञायन्ते ।

अस्य ग्रन्थस्य जयव्याख्याकारः श्री पिसुपाटि विश्वेश्वरशास्त्री महोदयः अग्रजस्य मूलग्रन्थकर्तृः पिसुपाटि चिदम्बरशास्त्रि- महोदयानां हृदयं स्व व्याख्यायाम् आविश्चकार। व्याख्याने शब्दसाधुत्वनिर्णयाय व्याकरणसूत्राणि एवं पर्यायपदविषये निघण्टुप्रमाणं प्रास्तौत् ।एवं अन्यविषयेषु

In Public domain. Digitization Muthulakshmi Research Academy

ग्रन्थान्तरप्रमाणैः साकं प्रसङ्गानुसारं प्रमाणनिरूपणपुरस्सरं व्याख्यायाः शोभां वर्धयामास ।

ग्रन्थस्य संक्षिप्तसारः

राजनीतिशास्त्रविषयवर्णनपरोऽयं राजधर्मकाव्यं शास्त्रकाव्यमिति वक्तुं शक्यते । यानि काव्यान्यपि शास्त्रवत् व्याख्यागम्यानि भवन्ति तानि शास्त्रकाव्यानि भवन्तीति काव्यालङ्कारे भामहः एवमवोचत् ।

"काव्यान्यपि यदीमानि व्याख्यागम्यानि शास्त्रवत् "-

भामहकाव्यालङ्कारः 2-20

एवं काव्यमीमांसाकारः राजशेखरःशास्त्रकविनिर्वचनं एवं अकथयत्-

"तत्र त्रिधा शास्त्रकविः । यः शास्त्रं विधत्ते, यश्च शास्त्रं काव्यं विधत्ते, योऽपि काव्ये शास्त्रार्थं निधत्ते" इति (काव्यमीमांसा पञ्चमाध्यायः)

अस्य सारांशः एवं भवति -

यः शास्त्रं विधत्ते - यः शास्त्रीयाकरग्रन्थान् परिशीलयति ।

यः शास्त्रे काव्यं विधत्ते - यः शास्त्रीयपदार्थान् काव्यस्वरूपेण परिणमयति ।

योऽपि काव्ये शास्त्रार्थं निधत्ते- यः काव्यपदार्थान् शास्त्रीयदृष्ट्या परिभाषते इति

एवं काव्यमीमांसाकारोक्तप्रकारेण राजनीतिशास्त्रविषयान् काव्यस्वरूपेण वर्णितत्वात् काव्यमिदं शास्त्रकाव्यं इति वक्तुं शक्यते ।

काव्येऽस्मिन् सर्गद्वयं विद्यते । प्रथमसर्गे कविः परमात्मनः

In Public domain. Digitization Muthulakshmi Research Academy

स्तुतिं विधाय, क्व राजधर्म इत्यादिना स्व विनयं प्रकटीचकार । ततः राज्ञः अत्यन्तं आवश्यकाः आन्वीक्षकी, त्रयी, वार्ता, दण्डनीति इत्यादि विद्याः प्रतिपाद्य, अत्र विद्याविषयमतान्तराणि प्रतिपादयन् तत्र वृद्धसंयोगः इन्द्रियजयःइत्यादि विषयाः प्रास्तुताः ।

अनन्तरं वर्णधर्मान्, ब्रह्मचर्य, गृहस्थ, वानप्रस्थ, परिव्राजकाश्रमधर्मान्, सर्ववर्णसाधारणधर्मानपि प्रतिपादयामास । ततः अमात्यविषयक चर्चा एवं पुरोहितचर्चा मन्त्राधिकारः, मन्त्रिपरिषत्, गूढपुरुषनियोजनं, दूतनियोजनं, राजव्यापारः, आत्मरक्षणं, जनपदनिवेशः, अध्यक्षादि-परीक्षणम्, कर्तव्यसंग्रहः इत्यादि विषयाः वर्णिताः ।

विश्वेश्वरशास्त्रिणःव्याख्यानशैली

व्याख्याकारः विश्वेश्वरशास्त्रिमहोदयः व्याख्याने प्रतिविषयं विविधग्रन्थानां प्रमाणपुरस्सरं निरूपितवान्। खेदे यथा नमतिरुद्विजते (7) इत्यादि विद्याविषयकनिरूपणप्रसङ्गे व्याख्याकारः विश्वेश्वरः त्रयीवार्तादण्डनीतिश्चेति तिस्र एव विद्या इति मनुशिष्याणाम्मतं वार्तादण्डनीतिश्चेति द्वे विद्ये इति बार्हस्पत्यमतं, दण्डनीतिरेकैव विद्येत्यौशनसमतमिति एतानि मतानि निरस्य कौटिल्यमतानुसारं चतस्रः एव विद्याः कविना स्वीकृताः इति व्याचख्यौ। अमरकोशः, केशवः,धरणिकोशः, अष्टाध्यायी, निरुक्तम्, वृत्तरत्नाकरः, वैजयन्तीकोशः, अर्थशास्त्रम्, महाभारतम्, रामायणम, कामन्दकनीतिसारः इत्यादिग्रन्थवाक्यानि प्रमाणरूपेण प्रादर्शयत् ।दण्डनीतिवर्णनप्रसङ्गे अलब्धलाभं (श्लोक१-10) इत्यादिश्लोकव्याख्याने अष्टादशतीर्थनिरूपण प्रसङ्गे च केशव निघण्टुकारवाक्यानि प्रमाणत्वेन प्रदर्शितानि । तीर्थमन्त्री पुण्यजले पुण्यक्षेत्रेऽध्वरे भगे जलावगाहमार्गे च

In Public domain. Digitization Muthulakshmi Research Academy

मान्त्याद्यष्टदशस्यापीति केशवः ।

एवं सर्ववर्णसाधारणधर्मनिरूपणप्रसङ्गे क्षमाऽहिंसा (श्लोकः 1.36) इत्यादि श्लोकगतक्षमाशब्दपर्याय बोधकधरणि कोश वाक्यानि एवं निरदिशत्। (क्षमा तितिक्षा पृथ्वी च शक्ते हिते शमामिति धरणिः ।

एवं शब्दसाधुत्वनिरूपणप्रसङ्गे व्याकरणाशास्त्रसूत्राणि प्रामाणत्वेन प्रादर्शयत् । मौनेन पौलस्त्य (श्लो 1-20) इत्यादि श्लोके पौलस्त्य शब्दं एवं निरवोचत् । पुलस्तेर्गोत्रापत्यं पुमान् पौलस्त्यः रावणः। (सू) गर्गादिभ्यो यञ् इति यञ् रवणः। इति एवं तत्र विविधग्रन्थानां प्रामणानि प्रसङ्गानुसारं प्रादर्शयत् । अर्थप्रधानम् (श्लोकः1-26) इत्यादि श्लोकव्याख्याने धर्मस्यैव प्राधान्यं अर्थकामयोरप्राधान्यं इत्यस्य समर्थकं पाद्मपुराण श्लोकप्रमाणं च प्रादर्शयत् ।

धर्मादर्थञ्चकामञ्चमोक्षञ्च लभते पुमान्
तस्माद्धर्मं समीहेत विद्वान्सविबुधस्मृतः ॥

पाद्मे पातालखण्डे 65 अध्यायः

राजधर्मः अथवा राजनैतिकाचरणवर्णनपराः केचन ग्रन्थाः राजधर्मकौस्तुभं, राजनीतिरत्नाकरः इत्यादयः साहित्ये समुपलभ्यन्ते । तादृशपरम्परायां अन्यतमः अयं राजधर्माख्यः ग्रन्थः जयाख्यया व्याख्यया संस्कृत अकाडमी द्वारा इदम्प्रथमतया प्रकाश्यते। ग्रन्थोऽयं अर्थशास्त्रविदां परिशोधकानाञ्च अत्यन्तम् उपयोगकरः भवतीति आशासे ।

सुहृज्जनसुधीविधेयः
डा. सन्तोषकुमारः जोषि

In Public domain. Digitization Muthulakshmi Research Academy

विषयसूची

विषयः	श्लोकसंख्या
(1) कृत्यवतारिका	
(अ) परमात्मप्रार्थना	1
(आ)विद्ययानिवयोत्कर्षः	2
(इ) त्रिपुरसुन्दरीस्मरणम्	3
(ई)अनुबन्धचतुष्टयसंपत्तिमाह	4
(उ)राजधर्मोऽवश्यं बोधनीयः	5
(ऊ)राजधर्मःपूर्वैरपि राजभिः सम्यगनुष्ठितः	6
(2) आन्वीक्षकी चतस्र एव विद्याः	
(अ)अन्वीक्षकी	7
(आ) त्रयी	8
(इ)वार्ता	9
(ई)दण्डनीतिः	10-15
(उ)विद्याविषये मतान्तराणि	16
(ऊ)वृद्धसंयोगः	17
(ऋ)इन्द्रियजयः	18-21
(ॠ)प्रज्ञादिकं संपादनीयः	22
(ए) राज्ञःपरित्याज्याः	23
(ऐ) त्रिवर्गसेवनप्रकारः	24-26

In Public domain. Digitization Muthulakshmi Research Academy

विषयः	श्लोकसंख्या
वर्णाश्रमधर्माः	27-38
(क) वर्णधर्माः	
(1) ब्राह्मणधर्माः	27
(2)क्षत्रियधर्माः	28
(3)वैश्यधर्माः	29
(4) शूद्रधर्माः	30
(ख)आश्रमधर्माः	
(1) ब्रह्मचारिधर्मः	31-32
(2) गृहस्थधर्मः	33
(3) वानप्रस्थधर्मः	34
(4) परिव्राजकधर्मः	35
(5) सर्ववर्णसाधारणधर्मः	36
12. कार्यामात्याः	37-38
13. कार्यामात्यकरणे मतभेदाः	39-40
14.अमात्यनिर्णयप्रकरणम्	41-43
15. प्रधानमन्त्री-मतान्तराणि	44
16. मध्यमाधममन्त्रिणौ	45
17.मन्त्रिपरीक्षणम्	46-52
18.(क) उपधानं(धर्मार्थकामभयरूपाणां) वृद्धिप्रकाराः	54
(ख)अमात्यशुद्धिपरीक्षणे कौटिल्यमतमाह	55
19. पुरोहितः	56-57

In Public domain. Digitization Muthulakshmi Research Academy

विषयः	श्लोकसंख्या
20. पुरोहितमन्त्रिदण्डनीतिरक्षितं क्षत्रं रिपवस्सन्निधातुं बिभ्यति	58
राजधर्मे द्वितीयस्सर्गः	
1. मन्त्राधिकारः	1
2. मन्त्रस्य पञ्चाङ्गसाहित्यमावश्यकम्	2
3.(क) मन्त्राणां कियद्भिः कार्यमित्यत्र रद्वाजादीयमर्थशास्त्रकर्तॄणां मतानि	3
(ख) विशालसप्रतीत्याह	4-5
4. नारदमतं ब्रूते	6
5. कौटिल्यमतमनवस्थादूषितमसहमानः स्वमतमाह	7
6. मन्त्रिपरिषत् - मन्त्राणां कियद्भिः कार्यमित्यत्र भारद्वाजादीनामर्थशास्त्रकर्तॄणां मतानि	8
7. गूढपुरुषनियोजजनम् - विशालाक्षमतम्	9
8.गूढपुरुषैः किं कर्तव्यमित्यताह	10
9. दूतनियोजनम्	11-14
10. योगक्षेमसाधनभूतं व्यापारमाह।	15-38
11. सर्वकार्यासाधनमूलभूतं राज्ञःशरीररक्षणम्	39-41
12.जनपदनिवेशः	42-48
13. अध्यक्षनियोजनम् - किं कर्तव्यमित्याह	49
14.कर्तव्यसंग्रहः	56-61

In Public domain. Digitization Muthulakshmi Research Academy

In Public domain. Digitization Muthulakshmi Research Academy

प्रथमसर्गः

श्लो **यस्यान्तरेव सचराचरमस्ति विश्वं**
संलक्ष्यते यदखिलान्तरसन्निविष्टम् ।
यद्भासमानमनुभाति समस्तमेत-
त्तस्मै नमोऽस्तु महसे तमसः परस्मै ॥ 1 ॥

जयव्याख्या

श्लो नमः प्रत्यूहसन्दोहनिबर्हणपटीयसे ।
लक्ष्मीगणाधिपतये सर्वविद्याप्रदायिने ॥

श्लो जीवाय देवगुरवे गुरवेऽसुराणां
शुक्राय मौर्यगुरवे कुटिलात्मजाय ।
तच्छास्त्रसिद्ध सकलार्थविवेकसिध्यै
कुर्वे नमस्त्रिकरणैरपि शुद्धिमद्भिः ॥

श्लो दिगन्तव्याप्तयशसं भ्रातरं मे चिदम्बरम् ।
राजधर्मप्रणेतारं वन्दे काव्यकलानिधिम् ॥

श्लो चिदम्बरकृपावाप्त विद्यः विश्वेश्वरस्सुधीः ।
करोमि राजधर्मस्य व्याख्यां जयसमाह्वयाम् ॥

अथ तत्रभवान् श्रीमहीशूरमहाराजास्थानमहाविद्वत्पदवीमलङ्कुर्वाणः, अष्टावधान, शतावधान, घटिकाशतग्रन्थकरणधुरीण, संस्कृतान्ध्र-भाषामयबहुप्रबन्धकर्ता अनन्तशयनमहाराज श्रीरामवर्मप्रदत्त कवि-वीरसिंहकङ्कणालङ्कृतकरो दर्भाङ्गमहाराज श्रीरमेश्वरसिंहसभाङ्गण समुपार्जित "काव्यकलानिधि" बिरुदः श्रीरत्नगिरिधाम श्रीसत्यनारायणस्वामि महासंस्थानप्रदत्तसुवर्ण "विद्याकुण्डल" मण्डितकर्णयुगलः, अयोध्यानगर

In Public domain. Digitization Muthulakshmi Research Academy

संस्कृतमहासभाप्रदत्त "विद्याभूषणो" पाधिभूषितः। आसेतुशीताचल मध्यवर्त्यनेकराजन्यविद्वत्परिषत्समासादित सुवर्णपदकादिबहुविधबहुमान-विराजमानः, प्रभुश्रेयोभिलाषी, चिदम्बरो नाम महाकविर्भारतीय नरपतीनामवश्यविज्ञेयं, त्रिवर्गसाधनमर्थशास्त्रानुसारिणं, **राजधर्माख्यं**, सर्गद्वयात्मकं प्रबन्धं चिकीर्षुः "आशीर्नमस्क्रियावस्तुनिर्देशोवाऽपि तन्मुख" मित्याद्यालङ्कारिकवचनप्रामाण्यमनुसरन् "यस्तु सर्वाणि भूतानि आत्मन्येवानुपश्यति। सर्वभूतेषु चात्मानं ततो न विजुगुप्सते" "तमेव भान्तमनुभाति सर्वं तस्य भासा सर्वमिदं विभाती" त्यादिश्रुतिप्रतिपादितस्य परमात्मनो नमस्कारलक्षणं मङ्गलं शिष्यशिक्षायै "यस्यान्तरे" वेत्यादिना ग्रन्थस्यादौ निबध्नाति। सचराचरं जङ्गमस्थावराभ्यां सहितं विश्वं–जगत् यस्य– महसः परमात्मन इत्यर्थः अन्तरेव - मध्य एव (नि)**अन्तर्मध्ये "तथा प्रान्ते स्वीकारार्थेऽपि" दृश्यते** इति विश्वः। अस्ति यत् - परमात्मरूपं महः अखिलस्य सकलस्य जगतः अन्तरे–मध्ये (नि) "अन्तरन्तुनपिप्रत्यासत्तौ मद्यावकाशयोः"। तादर्थ्येऽवसरे कालभेदे मन्वन्तराह्वये विशेषविवरान्तर्धिष्ववसान विनार्धयोः। अवधौ च त्रिषु पुनस्तुल्येऽल्पपरिधानयोः बाह्ये स्वीये प्रतिभुवि, "नृनपोस्त्वन्तरात्मनीति" **केशवः**। सन्निविष्टं स्थितं सत् संलक्ष्यते-सम्यग्दृश्यते। सूत्रात्मना सर्वत्रस्थितत्वादितिभावः। **तदुक्तं वासनाद्वासुदेवस्य वासितं ते जगत्त्रयम् सर्वभूतनिवासोऽसि वासुदेव नमोऽस्तु ते** ।। इत्येतत् परिदृश्यमानं श्रुतिस्मृतिपुराणादिभ्यः श्रूयमाणञ्च समस्तं सर्वं जगत् भासमानं प्रकाशमानेन यत् –येन ब्रह्मरूपेण महसा सह अनुभाति –प्रकाशते (सू) **तृतीयार्थे** इत्यनेनानोः कर्मप्रवचनीयसंज्ञा(सू) **कर्म- प्रवचनीययुक्ते द्वितीया** इति "य" दित्यस्य द्वितीया तस्मै पूर्वोक्त- लक्षणलक्षिताय तमसः अज्ञानस्य तत्प्रयुक्तसंसारस्य च परस्मै –दूरस्थिताय (नि)"परस्स्यादुत्तमानात्मवैरिदूरे

In Public domain. Digitization Muthulakshmi Research Academy

केवले परमव्ययमिच्छन्तीति" **विश्वः**। महसे ज्योतिषे परमात्मन इत्यर्थः (नि)"महस्तूत्सवतेजसोरित्यमरः"। नमः नमस्कारः अस्तु भवतु (सू) **नमस्स्वस्तिस्वाहास्वधाऽलंवषड्योगाच्चेति** चतुर्थी। वसन्ततिलकावृत्तम् **उक्ता वसन्ततिलका तभजाजगौगः** इति लक्षणात्।

श्लो **क्व राजधर्मोऽप्रतिमप्रभावः**
क्व मामकीना मतिरल्पलक्ष्या।
ग्रहीतु कामोऽस्मि करेण मोहा-
त्सुधांशु बिम्बं स्थितमन्तरिक्षे ॥ 2 ॥

सम्प्रति कविः "क्व राजधर्म" इत्यादिना स्वस्य गर्वं परिहरति। अप्रतिमः निरुपमः, प्रभावः महिमा, यस्य सः अप्रतिमप्रभावः राजधर्मः श्रुतिस्मृत्यादिभिर्विहितो राज्ञामवश्यं ज्ञेयोऽनुष्ठेयश्च यो धर्मस्स राजधर्मः। ईदृशो राजधर्मःक्व? अल्पं लक्ष्यं ग्राह्यविषयो यस्या स्सा अल्पलक्ष्या स्वल्पविषयग्राहिणीत्यर्थः। मे मम, मतिःबुद्धिः " **बुद्धिर्मनीषा धिषणा धीःप्रज्ञा शेमुषी मति"रित्यमरः।** द्वौ क्व शब्दौ प्रयुक्तौ महदन्तरं सूचयतः। द्वौ क्व शब्दौ प्रयुज्येते अत्यन्तासम्भवे सदेत्युक्तत्वात्, राजधर्ममाकलयितुं न शक्नोमीत्यर्थः। अत्यन्तविषयकप्रबन्धनिर्माणं दूरापास्तमितिभावः। ननु भोः धर्मं इति धर्मस्वरूपस्य निर्णायकं प्रमाणं किमिति चेदत्र तम्मनुराहस्म- " **वेदोऽखिलो धर्ममूलं स्मृतिशीले च तद्विदाम्"** । " आचारश्चैव साधूनामात्मनस्तुष्टिरेवचे" ति। अन्तरिक्षे आकाशे अन्तर् ऋक्षाणि- (नक्षत्राणि) अस्येत्यन्तरिक्षम्। पृषोदरादित्वाद्दकारस्य इकारः द्यावा- पृथिव्योरन्तरीक्ष्यत इति ईक्ष दर्शने इत्यस्मात्कर्मणि घञि अन्तरीक्षमिति दीर्घमध्योऽप्यस्ति (नि) **"नभोऽन्तरिक्षं गगनमित्य"** त्रामरव्याख्यातृभिः रूपद्वयमपि गृहीत्वा व्याख्यातम्। सुधांशुबिम्बं चन्द्रमण्डलम्

In Public domain. Digitization Muthulakshmi Research Academy

" विधुस्सुधांशुश्शुभ्रांशुरित्यमरः" । (नि) **" बिम्बोऽस्त्री मण्डलं त्रिष्वित्यमरः"**। मोहात् अज्ञानद्धेतोः (नि)**"मोहं पुनस्स्यादज्ञाने मूर्धायां क्रोध एव च। अजयस्त्वाहतन्द्रायामपीति" केशवः**।ग्रहीतुं कामो वाञ्छा यस्य संग्रहीतुः कामः "लुम्पेदवश्यमः कृत्ये तुंकाममनसोरपि। **"समो वा हिततत्तयोर्मांसस्यपचियुड्घयो"**रिति- वार्तिकात्तुमुनो तुं कारस्य लोपः अस्मि भवामि इदञ्च राजधर्मोत्कर्षवर्णनं स्वप्रबन्धस्य महत्वार्थम् "प्रतिपाद्य महिम्ना च प्रबन्धो हि महत्तरः"। इत्युक्तत्वात् अस्मिन् श्लोके काव्यप्रकाशकृतां मम्मटभट्टानां मते आर्थी वाक्यार्थनिदर्शनालङ्कारः "क्व सूर्य प्रभवो वंश" इत्यत्रेव। श्रीमदप्पयदीक्षितमते तु "क्व सूर्यप्रभवो वशं " इत्यत्र ललितालङ्कार इति स एवात्रापि श्लोके। तद्यथा "वर्णनीयवाक्यार्थमनुक्त्वैव वर्ण्ये धर्मिणि तत्स्वरूपस्य कस्यचिदप्रस्तुत वाक्यार्थस्य वर्णनं ललित"मित्युक्त्वा अत्रापि निदर्शनाभ्रान्तिर्नकार्या, अल्पविषयया मत्या सूर्यवंशं वर्णयितुमिच्छुरहमिति प्रस्तुतवृत्तान्तानुपन्यासात्तत्प्रतिबिम्ब भूतस्य, उडुपेन सागरं तितीर्षुरस्मीत्यप्रस्तुतवृत्तान्तस्य वर्णनेनादौ विषमालङ्कारस्य विन्यसनेन च केवलं तत्र तात्पर्यस्य गम्यमानत्वादित्युक्तं कुवलयानन्दे। तथैवात्रापि अल्पलक्ष्यया मदीयया मत्या राजधर्मं वर्णयितुमिच्छुरहमिति प्रस्तुत वृत्तान्तानुपन्यासात्तत्प्रतिबिम्बभूतस्य अन्तरिक्षस्थितसुधांशु बिम्बालङ्करेण ग्रहीतुकामोऽस्मीत्यप्रस्तुतवृत्तान्तस्य वर्णनेनादौ विषमालङ्कारविन्यसनेन च केवलं तत्र अल्पलक्ष्यमतिकरणकराजधर्मे वर्णनेच्छारूपाशयस्य गम्यमानत्वादिति अत्रत्य पण्डितराजादिमतान्तराणि तत्तद्ग्रन्थेभ्य एवावसेयानीत्यलम्। उपेन्द्रवज्रावृत्तम् **उपेन्द्रवज्रा जतजास्ततोगाविति** लक्षणात्।

In Public domain. Digitization Muthulakshmi Research Academy

श्लो **तथाऽपि मातुः परदेवतायाः**
कृत्वाऽवलम्बं करुणाकटाक्षान् ।
कर्तुं महत्कार्यमहं प्रवृत्तो
दैवे बले कस्य किमस्त्यसाध्यम् ॥ 3 ॥

तथापीत्यादिनामदुपास्य परदेवता करुणाकटाक्षावलम्बने-नाल्पज्ञस्यापि ममेदं साध्यमेवेत्याह तथापि मम मतेरल्पविषयग्राहिणीत्वे सत्यपि, परा उत्कृष्टा,चासौ देवता च परदेवता तस्याः उपास्येश्वरस्वरूपाया इत्यर्थः। मातुः त्रिपुरसुन्दर्याः ईशानोभूतभव्यस्येत्यादिमन्त्रेषु " अणिमादिगुणेपेत" मस्पृष्टपुरुषान्तरम्। शब्दमीश्वर इत्युच्चैस्सार्ध-चन्द्रबिंभर्ति यः इति कुमारसम्भवे कालिदासप्रयोगे च यथा निरुपपदा एवेशानेश्वरप्रभृतिशब्दाः परशिवस्य वाचकास्तथा निरुपपद एव मातृशब्द -स्त्रिपुरसुन्दर्या बोधकः क्वचिज्जगन्मातेत्यादि प्रतिसम्बन्धिनिर्देशेऽपि मातृपदमात्रस्य त्रिपुरसुन्दरीवाचकत्वं न विहन्यते। करुणाद्वितीयकटाक्षान् करुणा कटाक्षान् शाकपार्थिवादित्वान्मध्यमपदलोपसमासः। अवलम्बं अवलम्बनं कृत्वा अवलम्ब्येत्यर्थः। अहं महत् उत्कृष्टम् कार्यं राजधर्मप्रबन्ध-निर्माणरूपकार्यं कर्तुं प्रवृत्तः सन्नद्धोऽस्मि। अत्र सामान्येन विशेषसमर्थनरूपमर्थान्तरं न्यस्यति "दैवे बले" इत्यादिना देव्या इदं दैवम् देवीसम्बन्धि तस्येदमित्यण् यद्वा देव्या आगतं दैवं तत आगतः इत्यण् तस्मिन् दैवे बले शक्तौ सामर्थ्ये सति **बलं रूपेऽस्थिनिस्थौल्ये शक्तरेतश्चमूष्विव केशवः।** कस्य–अल्पस्यापीत्यर्थः असाध्यंसाधितुमशक्यम् (सू) शकलि ङेति शक्याऽर्थेण्यत् किं किं कार्यम् अस्ति। किमपि नास्तीत्यर्थः दैवबलसहितस्य सर्वमुपकारं साध्यमेवेति भावः। सामान्येन विशेषस्य विशेषेण सामान्यस्य वा यत्समर्थनं तदर्थान्तरन्यासः। समर्थनञ्च इदमेवमनेवं वा स्यादिति संशयस्य प्रतिबन्धः "इदमित्थमेवेति" दृढप्रत्ययः निश्चय इति

In Public domain. Digitization Muthulakshmi Research Academy

यावत्। तत्र प्रकृतयोर्विशेष सामान्ययोर्यत्समर्थनं प्रायशो दृश्यते तच्च तावत्साधर्म्यवैधर्म्याख्यं द्विविधमित्यादिना रसगङ्गाधरे-अर्थान्तरन्यासा अलङ्कारे लक्षणोदाहरणाभ्यां निरूपितमिति ततो ग्राह्याःभेदाः। उपजातिवृत्तम्। **स्यादिन्द्रवज्रायदितौ जगौगः, उपेन्द्रवज्रा जतजास्ततोगौ। अनन्तरोदीरितलक्ष्मभाजौ पादौ यदीया उपजातयस्ताः** इति लक्षणम् ।

श्लो **प्रभुर्नवस्त्वं क्षितिपालमौले!**
कविस्त्वदीयाभ्युदयाभिलाषी ।
प्रबोधनीयस्तवराजधर्म-
स्समस्तमेतद्भगवत्प्रसादः ॥ 4 ॥

प्रभुरित्यादिना विषयप्रयोजनसम्बन्धाधिकारिरूपानुबन्धचतुष्टय-सम्पत्तिमाह। अत्र राजधर्मो विषयः।धर्ममार्गेण परिपालनं तत्प्रयुक्त-कीर्तिस्वर्गादिलाभश्च प्रयोजनम्। प्रतिपाद्यप्रतिप्रादक भावसम्बन्धः। राजवंशोत्पन्नोऽधीतार्थशास्त्रेतरविद्यो राज्यभार वहनयोग्याऽधिकारी देश-प्रभुक्षेमाभिलाषिभिः कविभिर्वाल्मीकिव्यासकालिदासादिभिरिव धर्म-प्रबोधका एव ग्रन्था रचयितव्या नत्वधर्मप्रबोधका इति "कवि"रित्यादिना सूचितम् । "क्षिति पालमौले" इति नामनिर्देशरहितं राजमात्रे, सम्बोधनेन सर्वानपि भारतीयमहीपतीनुद्दिश्य राजधर्मं बोधयितुं प्रवृत्तोऽयं प्रबन्ध इत्यवगम्यते। एतत् समस्तं नूतनः प्रभुः राजधर्मजिज्ञासुः, देशस्य प्रभोश्च श्रेयोभिलाषी राजधर्मवित्कविः। राजधर्मस्य प्रबोधनीयत्वमित्येतत्सर्वम् इदानीं सम्पन्नम्। तत्र भगवत्प्रसादः –भगवतः परमेश्वरस्य प्रसादोऽनुग्रह एव "कारण" मिति शेषःइत्यर्थः।उपेन्द्रवज्रावृत्तम् लक्षणन्तूक्तमेव ।

श्लो **पित्रा त्वदीयेन महामहिम्ना**
भाक्तं स्वराज्यं क्रमतोऽधिगम्य ।

In Public domain. Digitization Muthulakshmi Research Academy

यतः प्रवर्धिष्णुरसि प्रभो! त्वं
ततोऽस्मि वक्तुं तव राजधर्मम् ॥ 5 ॥

वंशक्रमागतराज्यधुरं वहतां वर्धिष्णूनां प्रभूणां राजधर्मोऽवश्यं बोधनीयः,अन्यथा तेषां सर्वानर्थमूलमुन्मार्गगामित्वं भवेदित्याशयेनाह "पित्रे"ति प्रवर्धिष्णुः प्रकर्षेण वर्धनशीलः जिगीषुताम्प्राप्तुं योग्य इति भावः। प्रपूर्वकात् "वृधु वृद्धा" विति भौवाधिकधातोः (सू) **अलंकृञ्निराकृञ् प्रयोजनोत्पचोत्पतोन्मदरुच्यपत्रपवृतुवृधुसहचर इष्णुच्** (3-3-136) इत्यनेन इष्णुचि वर्धिष्णुरितिरूपम् । ततः "प्र" इत्युपसर्गेण "कुगति" प्रादय इति समासे प्रवर्धिष्णुरिति यतः यस्मात् असि भवसि ततः तस्मात्कारणात् तव राजघर्मं वक्तुं कथितुम् अस्मि प्रवृत्त इति शेषः।उपजातिवृत्तम् ।

श्लो **ज्ञात्वा पुरा नृपतयो निजराजधर्मं**
धर्मार्थकामसरणिं परिपाल्य नित्यम् ।
भुक्त्वा चिरं वसुमतीं चिरकीर्तिकायैः
स्वर्गे च दिव्यतनुभिर्विलसन्ति राजन्! ॥ 6 ॥

ज्ञात्वेत्यादिना सप्रयोजनत्वाद्राजधर्मस्य पूर्वैरपिराजभिस्स सम्यग्ज्ञातः स्वनुष्ठितश्चेत्याह। पुरा पूर्वस्मिन्काले नृपतयः राजानः निजं स्वकीयं क्षत्रियाणां, वेदशास्त्रविहितमित्यर्थः। राजधर्मं ज्ञात्वा अवगत्य, धर्मार्थकामानां सरणिं दण्डनीत्यनुसारेण परिपाल्य रक्षित्वा, चिरं चिरकालं, वसुमतीं भुवं, भुक्त्वा भुवि भूलोके कीर्तिकायैः कीर्तिरूपशरीरैः स्वर्गे दिव्यतनुभिः– देवताशरीरैश्च विलसन्ति प्रकाशन्ते। तदुक्तं महाभारते सभापर्वणि पञ्चमाध्याये -

एवं यो वर्तते राजा चातुर्वर्ण्यस्य रक्षणे ।
स विहृत्येह सुसुखी शक्रस्यैति सलोकताम् ॥129 श्लो

In Public domain. Digitization Muthulakshmi Research Academy

इति । वसन्ततिलकावृत्तम्, **उक्ता वसन्ततिलका तभजाजगौ गः** इति लक्षणात् ॥

आन्वीक्षकी

श्लो खेदे यथा न मतिरुद्विजते प्रहृष्ये -
न्मोदे यथा न च तथा करणे समर्थाम् ।
प्रज्ञा वचः कृतिषु दाक्ष्यमुपादधाना-
मान्वीक्षिकीमनुसरन् सुखमेधि राजन् ! ॥ 7 ॥

अन्वीक्षकी त्रयी विशेष एव । तस्मा "त्रयी वार्ता दण्डनीतिश्चेति" तिस्र एव विद्या इति मनुशिष्याणाम्मतं "वार्तादण्डनीति"श्चेति द्वे एव विद्ये। इति बार्हस्पत्यमतं, दण्डनीतिरेकैव विद्येत्यौशनसमतञ्च दोषदूषितत्वादुपेक्षमाणः "आन्विक्षकी त्रयी वार्ता दण्डनीतिश्चेति" चतस्र एव विद्याः इति कौटिल्यमतमनुसृत्य कविर्विद्याचतुष्टयं विवक्षुस्तत्रादौ **खेदे य** थेत्यादिना आन्विक्षिकीं विवृणोति। अनुश्रवणोत्तरं ईक्षणं अर्थतत्त्वस्य हेतुभिः परीक्षणमन्वीक्षा। सा प्रयोजनमस्या इत्यान्वीक्षकी हेतुविद्या **(सू) प्रयोजनमिति** ठञ्। **"आन्विक्षकी दण्डनीतिस्तर्कविद्याऽर्थशास्त्रयोरित्यमरः"** विद्यात्वं नाम धर्मार्थवेदनकरणत्वम्। तच्चान्वीक्षिक्यादिषु चतसृष्वस्य वैशिष्ट्यमिति चतस्र एव विद्या इति च वदतामाशयः। आन्वीक्षिक्यै नमः प्रकृतिपुरुषविवेचकं कविप्रोक्तं साङ्ख्यशास्त्रं शब्दं प्राणायामाद्यष्टाङ्गप्रतिपादकं पतञ्जलिप्रोक्तं योगशास्त्रं, गौतमोक्तं ब्रह्मगार्ग्योक्तं न्यायशास्त्रमित्येतत्त्रयात्मिका। अत एवास्या अनुसरणे खेदमोदयोः प्राप्तयोर्नबुद्धेरुद्वेगः, प्रहर्षश्च भवतः। तदुक्तमभियुक्तैः **न प्रहृष्येत्सुखम्प्राप्य नोद्विजेतासुखादपी**ति प्रज्ञा वचः कृतिषु विभारवचनक्रियासु दाक्ष्यं सामर्थ्यम् यद्वा प्रज्ञा त्रैकालिकी धीः। **"स्मृतिर्व्यतीतविषयामतिरागामिगोचरा । बुध्दिस्तात्कालिकी ज्ञेया प्रज्ञा**

In Public domain. Digitization Muthulakshmi Research Academy

त्रैकालिकी मते"त्युक्तेः उपादधानां सम्पादयन्तीम् अन्वीक्ष्य किमनुसरन् तत्रोक्तान्विषयाननुसृत्य राज्यपालनं कुर्वन्नित्यर्थः।सुखं इहलोकसुखं यथा भवति तथेति क्रियाविशेषणम् एधि-वर्धस्व "अस्" धातोःअदादिलोटि मध्यमपुरुषैकवचने अस्+सि इतिस्थिते "सेर्ह्यपिच्च" इति सेर्हि प्राप्ते **" हुझल्भ्योहेर्धि"** **रिति** धित्वे प्राप्ते परत्वत्तां बाधित्वा (सू) **घ्वसोरेद्धावभ्यासलोपश्चे**त्येत्वे कृते "एहि" इति जाते एत्वधित्वयोराभीयत्वेन (सू) **असिद्धवदत्राभात्** इत्येकारस्यासिद्धत्वे **झल्परकत्वाद्धेर्धित्वे** (सू) **श्नसोरल्लोपः** इत्यकारस्य लोपे एधीति रूपं सिद्धम्। वसन्ततिलकावृत्तम्।

त्रयी

श्लो वर्णाश्रमाणां नृपते चतुर्णां संस्थापने धर्मपदे समर्थाम्।
त्रयीं जगद्वर्तनहेतुभूता मुपाश्रयन् कीर्तिमपेहि नित्याम् ॥8॥

वर्णाश्रमाणामित्यादिना त्रयी प्रयोजनानि विवृणोति। त्रयी ऋग्यजुसामानि (नि) **स्त्रियामृक्सामयजुषी** इति वेदास्त्रयस्त्रयीत्यमरः। त्रय्युद्धारोऽथर्व वेदः वेदानुगामितया इतिहास- पुराणस्मृतयश्च वेदशब्दवाच्याः तथा च कामन्दकः। **अङ्गानि वेदाश्चत्वारो मीमांसा न्यायविस्तरः। धर्मशास्त्रं पुराणञ्च त्रयीदं सर्वमुच्यते॥** इति शिक्षाकल्पो व्याकरणं निरुक्तं छन्दो ज्योतिषमिति वेदाङ्गानि षट्, अकारादीनां वर्णानां स्थान कालप्रयत्न प्रबोधिका शिक्षा। यागक्रियाणामुपदेशः कल्पः। साधुशब्दान्वाख्यानं व्याकरणम्। **वर्णागमो वर्णविपर्ययश्च द्वौचापरौ वर्णविकारनाशौ। धातोस्तदर्थातिशयेन योगस्तदुच्यते पञ्चविधं निरुक्तम्॥** इत्युक्तं निरुक्तम्। मात्रा छन्दसा- मुक्तात्युक्तादिच्छन्दसां च प्रतिपादकं शास्त्रं छन्दः। ग्रहनक्षत्रतिथ्यादीनां गणनशास्त्रं ज्योतिश्शास्त्रम्। साङ्गो वेदः ब्राह्मणक्षत्रियवैश्यशूद्राख्यान् चतुरो वर्णान् स्वविहित धर्ममार्गे स्थापयितुं

In Public domain. Digitization Muthulakshmi Research Academy

समर्थः तथा स्वनिषिद्धाद्धर्ममार्गान्निवर्तयितुं च समर्थ इत्यूह्यम् अत एव त्रयीजगतो लोकस्य वर्तने जीवने-भूताः कारणम्। अथ चतुर्वर्णधर्मा उच्यन्ते ब्राह्मणस्य अध्ययनमध्यापनं यजनं याजनं दानं प्रतिग्रहश्च धर्माः, क्षत्रियस्य अध्ययनं यजनं दानमायुधजीवनम्प्राणिरक्षणञ्च धर्माः, वैश्यस्य अध्ययनं यजनं दानं कृषिः गवाश्वादिपशुपालनं वाणिज्यञ्च धर्माः, शूद्रस्य ब्राह्मणक्षत्रियवैश्यानां परिचरणं कृषिः गवाश्वादिपशुपालनं वाणिज्यं शिल्पिकर्मकुशीलवकर्म च धर्माः। ब्रह्मचर्यं गार्हस्थ्यं वानप्रस्थं परिव्रज्या चेति चत्वार आश्रमाः। ब्रह्मचारिणो गुरुकुलवासः स्ववेदाध्ययनमग्निकार्यं, त्रिषवणस्नानं च धर्माः, गृहस्थस्य वर्णोक्तकर्माणां जीवनं कुलादिना समानैः भिन्नर्षिगोत्रैर्विवाहः, ऋतुस्नानादिनादूर्ध्वमनिषिध्दासु द्वादशनिशासु भार्यागमनशीलत्वम्, देवपित्रतिथिदत्तशेषभोजनं भृत्यपोषणं च धर्माः, वानप्रस्थस्य वने वासः ऊर्ध्वरेतस्त्वम्, स्थण्डिलशयनम्, जटाजिनधारणम् अग्निहोत्रं त्रिषवणस्नानम् कन्दमूलफलादिभक्षणं च धर्माः, परिव्राजकस्य जितेन्द्रियत्वं, नैष्कर्म्यं निष्किञ्चिनत्वं प्रव्रजितान्तरेणाऽपि संसर्गपरिहारः प्राणयात्रापर्याप्तस्यान्नस्य बहुषु गृहेषु भिक्षित्वाग्रहणम् अरण्ये वासः ग्रामैकरात्रं वा मनोवाक्कायशुद्धिश्च धर्माः, चतुर्णां वर्णानामाश्रमिणा अहिंसा सत्यं शौचं गुणेषु पक्षपातः अक्रूरत्वं क्षमा च धर्माः। एतादृशधर्मानुष्ठाने प्रजानां स्वर्गः, परलोके इहलोके च प्रजानां परस्परवृत्तिस्वीकारा-भावादविरोधःसुखजीवनं च भवेत्। एतादृशवर्णाश्रमधर्मस्थापनेन राज्ञा महद्यशः प्रजानुरागश्च स्याताम्। तेन लोकद्वयेऽपि सौख्यं भवेत् यावदिहलोके कीर्तिस्तावस्वर्गे वास इति महाभारतस्थेन्द्रद्युम्नचरित्रेण विज्ञायते। उपपूर्वकादिङ्घातोर्लोण्मध्यमपुरुषैकवचने **रूपमपे**हीति हेरपित्त्वाद्गुणाभावः। उपजाति वृत्तम् ॥

In Public domain. Digitization Muthulakshmi Research Academy

वार्ता

श्लो **कृषिः पाशुपाल्यं वणिज्या च वार्ता**
पदस्यार्थभावं भजन्ति क्षितीन्द्र ।
तया धान्य पश्वर्थविष्टिप्रदात्र्या
वशीकुर्वशेषं स्वपक्षारिपक्षौ ॥ 9 ॥

कृषिरित्यादिना वार्ता विवृणोति। कृषि विलेखन इत्यस्माद्धातोः (वा) **इक्कृष्यादिभ्यः** इतीकि कृषिरिति साधुः कृषिः क्षेत्रबीजवासपरिकर्मादि प्रतिपादकं शास्त्रं पराशरादिप्रोक्तम्। पशून् पालयतीति पशुपालः (सू) **कर्मण्यणित्यणि साधुः** तस्य कर्म पाशुपाल्यं। (सू) **गुणवचनब्राह्मणादिभ्यः कर्मणि** चेति ब्राह्मणादित्वात् ष्यञ् साधुः। पाशुपाल्यं गवाश्वादि पशुपालन प्रकारोपदेशकं गौतमशालिहोत्रादिप्रणीतं शास्त्रं वणिजां **कर्मभवो वा वणिज्या(वा) दूतवणिग्भ्याञ्चेति वक्तव्य**मित्यत्र चकारेण (सू) **सख्युर्य** इत्यतो "य" इत्यनुवर्तते तेन दूत्यं वणिज्यमिति काशिका माधवस्तु "वणिज्या शब्दः स्वभावात् स्त्रीलिङ्गः भाव एव" य प्रत्ययः न तु कर्मणीत्याह भाष्ये तु **(वा)दूतवणिग्भ्यां** चेति नास्त्येव ब्राह्मणादित्वाद्वाणिज्यमपीति सिद्धान्तकौमुदी **(नि)सत्यानृतन्तु वाणिज्यं वणिज्या वणिजा स्त्रिया विति वैजयन्ती, हेमचन्द्र नाममाला च** (नि) **वाणिज्यं सत्यानृतमाख्याता योषिद्वणिज्येति भो पालित इति टीकासर्वस्वम्** कौटिल्योऽपि वणिज्येति प्रायुङ्क्त इत्थं बहुप्रमाणसद्भवाद्वणिज्या शब्दं कविः प्रयुयुजे। वणिज्याक्रयविक्रय व्यवहारतन्त्रं विदेहराजादिप्रणीतम् । धान्यस्य पशूनामर्थस्य कुप्या कुप्यरूप्यस्य कुप्यं स्वर्णरजतातिरिक्तं ताम्रादिलोहः आकुप्यं सुवर्णरजते विष्टिना कर्मकराणाञ्च विष्णातीति विष्टिः विषप्रयोगे इत्यस्मात् सूक्ति सूक्तौ च संज्ञाया "मितिक्तिनिविष्टिरितिरूपम्"(नि) **विष्टिः**

In Public domain. Digitization Muthulakshmi Research Academy

कर्मकरे मूल्ये भद्राजप्रेषणेषु चेति हेमचन्द्रः विष्टिशब्दः स्त्रीलिङ्ग इत्यमरसुधा कर्मकरे तु "वाच्यलिङ्गः विशन्तु विष्टयस्सर्वे रुद्रा इव महौजस" इत्यनेकार्थैकरवाकर कौमुदीप्रयोगात् प्रदात्र्या तया वार्तया जनिताभ्यां कोशदण्डाभ्यामितिशेषः। अशेषं निश्शेषं यथा तथा क्रियाविशेषणमेतत् स्वपक्षारिपक्षौ वशीकुरु।भुजङ्गप्रयातवृत्तम्। **लक्षणन्तु भुजङ्गप्रयातं भवेद्यैश्चतुर्भिरिति** ॥

दण्डनीतिः

श्लो अलब्धलाभं परिलब्धरक्षां
प्रवर्धकत्वं परिरक्षितस्य ।
वृद्धस्य तीर्थेषु समर्पणञ्च
तनोति धात्रीश्वर! दण्डनीतिः ॥ 10 ॥

अलब्धेत्यादिना दण्डनीतिं विवृणोति। दमु उपशमे सकर्मकः ।दम्यते उपशमयति लोकमिति दण्डः। (सू) **ञ् दुन्तड्ड** इति साधुः (नि)**साहसन्तु दमो दण्ड** इत्यमरः।सामादिचतुरुपायेषु प्रधानभूत उपायविशेषो दण्डः तस्य नीतिर्निर्णयनम् प्रयोग इति यावत्। दण्डनीतिशब्दः अभेदोपचारा-दण्डनीत्युपदेशः शास्त्रं बोधयति अलब्धलाभमित्यादिना दण्डनीतेः फलमाह। दण्डेन हिते वर्धितं च तीर्थेषु विनियुज्यत इति तीर्यन्ते राजाकार्याण्येभिरिति तीर्थानि तृप्लवनतरणयोरित्यस्मात् (सू) **पातृतुदिवचिरिचिसिचिभ्यस्थक्** इत्युणादिसूत्रेण थकि (सू) **ऋत इध्दातो** रीतीत्वेरप्कत्वे "हलि" चेति दीर्घे च साधुः तेषु तीर्थेषु अष्टादशस्वितिशेषः तानि यथा वैशम्पायिन्यां धनुश्शास्त्रव्याख्यायां **मन्त्रीपुरोहितश्चैव युवराजश्च भूपतिः। पञ्चमो द्वारपालश्च षष्टोऽन्तर्वंशिकस्तथा। कारागाराधिकारी च द्रव्यसञ्चयकृत्तथा कृत्याकृत्त्येषु चार्थानां नवमो विनियोजकः। प्रदेष्टा नगरीरक्षा**

In Public domain. Digitization Muthulakshmi Research Academy

कार्यनिर्माणकृत्तथा धर्माध्यक्षसभाध्यक्षौ दण्डपालस्त्रिपञ्चमः। षोडशो दुर्गपालश्च तथा राष्ट्रान्तपालकः अटवीपालकान्तानि तीर्थान्यष्टादशैव तु ॥ इति

अष्टादशतीर्थसमप्रयुक्तोपसर्वेण प्रकृतिमण्डलावर्जनपरेणेत्य-वन्तिसुन्दर्यां महाकविर्दण्डी च तीर्थशब्देन यज्ञादयो निबन्धरि (नि) **तीर्थमन्त्री पुण्यजले पुण्यक्षेत्रेऽध्वरे भगे जलावगाहमार्गे च मन्त्र्याद्यष्टदशस्यपीति** केशवः(नि) **यूनौ जलावतारे च मन्त्र्याद्यष्टा दशस्वपीति** हलायुधः।धनिनामेष वै पन्थास्तीर्थेषु प्रतिपादनम्। (महाभारते शान्तिपर्वणि १२० श्लो) द्रव्यस्यापात्रविनियोगे दोषमप्याह व्यासः "लब्धानामपि वित्तानां बोद्धव्याद्धवतिक्रमौ । अपात्रे प्रतिपत्तिश्च पात्रे चाप्रतिपादनं "(भार १९-३१) उपजाति-वृत्तम् ॥

श्लो **प्रपञ्चयात्रा सकलापि यस्यां**
प्रतिष्ठिता तां खलु दण्डनीतिम् ।
समाश्रयन्नभ्युदयं प्रजानां
सदा विदध्याद्वसुधातलेन्द्रः ॥ 11 ॥

प्रपञ्चयात्रा लोकयात्रा सत्येव दण्डभये लोकः आन्वीक्षिक्यादिषु सम्यक्प्रवर्तते नत्वन्यथा। अतः सकलापि प्रपञ्चयात्रा दण्डनी-त्याम्प्रतिष्ठितेत्युक्तम् । **तथा चाहुःप्राज्ञाः सर्वो दण्डजितो लोके दुर्लभो हि शुचिः क्वचित् । दण्डस्य हि भयात्कृत्स्नं जगद्बोधाय कल्पते** इति । वृत्तम् उपजातिः।

श्लो **दण्डेन लोका विजिता भवेयु**
र्दण्डानधीनं न हि किञ्चिदस्ति ।

In Public domain. Digitization Muthulakshmi Research Academy

तस्माद्विमृश्य त्व मिलातलेन्द्र
सदाऽपि दण्डोद्यत एव भूयाः ॥ 12 ॥

दण्डे नेत्यादिना सामान्येन दण्डं स्तुवतामाचर्याणाम्मतं प्रतिपादयति। दण्डोद्यतःउद्यतदण्डः (सू)वाहिताग्न्यादिष्विति निष्ठान्तस्य वा परिनिपातः॥

श्लो **उद्वेजकस्स्यानृप तीक्ष्णदण्ड-**
स्तिरस्कृतस्स्यान्मृदुदण्डधारी।
यथार्हदण्डः परिपूजितस्स्या-
त्प्रबोधनीयं किमतः परं ते ॥ 13 ॥

उद्वेजक इत्यादिना पूर्वोक्त दण्डसामान्यस्तावकाचार्यमतं दोषोद्घाटनपूर्वकं प्रतिषिध्य, कौटिल्यसम्मतं यथार्हदण्डमतम्प्रतिपादयति। हे नृप ! राजन् तीक्ष्णः उग्रः दण्डो यस्य तीक्ष्णदण्डो राजा कामक्रोधाभ्यामज्ञानेन वा अयथावत्प्रणीतोदण्डो वानप्रस्थपरिव्राजकान् शमप्रधानानपि कोपयति, किमुत गृहस्थादीन् अप्रणीतस्तु दण्डो मात्स्यन्यायं जनयति। यथा महान्मत्स्यः क्षुद्रमत्स्यान्ग्रसते तथा बलवान् दुर्बलान्पीडयति तदुक्तं “ तिरस्कृतस्स्यान्मृदुदण्डधारीति यथार्हदण्डः युक्तदण्डः देशकालापराधानुगुणप्रयुज्यमानदण्डः” राजेति सर्वानतिशेते परिपूजितः स्यात्। अतो यथार्हदण्डा भवेत्याशयः। तथाचोक्तं नयविद्भिः

मृदुश्चेदवमन्येत तीक्ष्णादुद्विजते जनः।
तीक्ष्णश्चैव मृदुश्चैव प्रजानां स च सम्मतः ॥

कामन्दकः- तीक्ष्णादुद्विजते लोको मृदुस्सर्वत्र बाध्यते ।
एवं बुध्वा महाराज ! मा तीक्ष्णो मा मृदुर्भव ! ॥ इति उपजातिवृत्तम् ॥

श्लो **प्रदृश्यमाने सति दण्डहेतौ**
प्रयुज्यते येन जनेन दण्डः।

In Public domain. Digitization Muthulakshmi Research Academy

तदीयमंहस्तमुपैति भूप -
मितिप्रभो ! शास्त्रविदो वदन्ति ॥ 14 ॥

प्रदृश्यमाने इति। दण्डस्य दण्डप्रयोगस्य हेतुः कारणम् दोष इत्यर्थः ।तस्मिन् दण्डहेतौ प्रदृश्यमाने सति येन राज्ञा जने दण्डार्हे दण्डः न प्रयुज्यते। तं भूपं तदीयदण्डार्हजनसम्बन्धि अंहः पापम् अमति गच्छतीत्यंहः अमगत्यादिष्विितिधातोः(सू)**अमेर्हुक्चेत्युणादि** सूत्रेण असुन्प्रत्यये हुगागमे च कृते अहःइति रूपम् । (नि)**अंहोदुरित -दुष्कृतमित्यमरः ।** उपैति गच्छति तथा चोक्तं महाभारते शान्तिपर्वणि वेदव्यासेन धर्मराजं प्रति

आदाय बलिषड्भागं यो राष्ट्रं नाभिरक्षति
प्रतिगृह्णाति तत्पापं चतुर्थांशेन भूमिपः।।इति (म.भा 24-12)

उपेन्द्रवज्रावृत्तम् ॥

श्लो **स्वर्गप्रदस्स्यान्नृपते! स्वधर्मो**
व्यतिक्रमस्तस्य तदन्यस्स्यात् ।
ततः प्रयोज्यः क्षितिपेन दण्डः
पुत्रे च शत्रौ च यथापराधम् ॥ 15 ॥

स्वर्गप्रद इति नृपते राजन् !स्वोधर्मः स्वधर्मः स्वजातिविहितधर्मः स्वर्गं प्रददातीति स्वर्गप्रदः(सू) **प्रेदाज्ञ** इति कः स्यात् व्यतिक्रमं तस्य स्वधर्मस्य तदन्यदं तस्मात् स्वर्गादन्यन्नरकं ददातीति तदन्यदः "डुदाञ् दाने" इत्यस्मात् (सू) **कर्मण्युपपदे आऽतोनुपसर्गे कः** इति (सू)**अतो लोप इटि** चेत्यलोपः। अपराधमनतिक्रम्य यथापराधम्(सू)**अव्ययं विभक्तीत्यादिना** यथार्थेऽव्ययीभावः योग्यतावीप्सापदार्थनतिवृत्तिसादृश्यानि यथार्थाः अनुरूपं प्रत्यर्थ्यः यथाशक्ति सह रीतिक्रमेणोदाहरणानि कैयटमतानुसारिणा भट्टोजिदीक्षितेन दत्तानि। नागेशभट्टस्तु यथाशक्ति यथाबलमित्यादीनि (सू) **यथाऽसादृश्ये**

In Public domain. Digitization Muthulakshmi Research Academy

(2-1-7) इत्यस्यैवोदाहरणानीत्यवोचत्। मतद्वयेऽपि भाष्यमेव प्रमाणमिति तयोस्सामीचीन्यासामीचीनविषयः तद्ग्रन्थैरेवावधार्यो सुधीभिः ग्रन्थविस्तर-भयन्न मया प्रतिपाद्यते यथापराधदण्डे न राज्ञस्सुगतिप्राप्तिर्भवतीति महाभारते शान्तिपर्वणि धर्मराजाय भीष्मेण प्रतिपादितम्।

कामक्रोधावनादृत्य पितेव समदर्शनः।

शास्त्रजां बुद्धिमास्थाय युज्यते नैनसा हि सः।। इति (24-14) कौटिल्योऽप्याह।

दण्डो हि केवलो लोकम्परञ्चेमञ्च रक्षति।

राज्ञा पुत्रे च शत्रौ च यथा दोषं समादृतः इति। उपजातिवृत्तम्॥

विद्याविषये मतान्तराणि

श्लो एकां विद्यां भार्गवा दण्डनीतिं
बार्हस्पत्या दण्डनीतिञ्च वार्ताम्।
प्राहुर्वार्तां दण्डनीतिं त्रयीञ्च
तिस्रो विद्या मानवा मानवेन्द्र! ॥ 16॥

एकामिति मानवेन्द्र हे राजन्! भृगोरपत्यं भार्गवश्शुक्रः **ऋष्यन्धकवृष्णिकुरुभ्यश्चेत्यण्** (4-1-114)ततः भार्गवस्य च्छात्राः इत्यर्थे(सू) **तस्येदमित्यण्** शुक्रशिष्या दण्डनीतिमेकामेव विद्याम्प्राहुः। अन्वीक्षिकी त्रयी वार्तानां योगक्षेमयोगसाधनत्वाद्दण्डनीतेःबार्हस्पत्या बृहस्पतिशिष्याः (सू) **दित्य दित्यादित्यपत्युत्तरपदाण्ण्यः** इति साधुः बृहस्पतिमतानुयायिनो "वार्ता दण्डनीतिश्चे" द्वे एव विद्ये इत्याहुः लोकव्यवहारनिर्वहणसमर्थमपि त्रय्यपरिग्राहिणं पुरुषं नास्तिक इति लोको निन्देदिति त्रयीपरिग्रहः क्रियते तस्य लोकनिन्दाद्वारसंवरणमात्रफलत्वेनाल्पप्रयोजनत्वात्त्रयी

In Public domain. Digitization Muthulakshmi Research Academy

विद्यान्तरमित्याशयस्तेषां अपि च त्रयीविद्यान्तरत्वनिरासास्सिद्धः। मनोरिमे मानवाः चाक्षुषमनुमतानुयायिनः (सू)**तस्येदमित्यण् (4-3-120)** वार्ता दण्डनीतिस्त्रयी चेति तिस्र एव विद्या इति प्राहुः। अन्वीक्षिक्यास्त्रय्यनुगामितया त्रय्यार्थविचाररूपतया त्रय्याः प्रकार एव, न तु विद्यान्तरमिति मानवानामाशयः। तथाचोक्तं कामन्दकेन –

त्रयी वार्ता दण्डनीतिस्तिस्रो विद्यामनोर्मताः।

त्रय्या एव विभागोऽयं येन सान्वीक्षकी मता ॥ इति एवं कालिदासोऽपि

स पूर्वजन्मान्तरदृष्टपारा स्मरन्निवाक्लेशकरो गुरूणाम् ।

तिस्त्रस्त्रिवर्गाधिगमस्य मूलं जग्राह विद्याः प्रकृतीश्च पित्र्याः ॥

(रघु १८-५०) **शालिनीवृत्तं ,** शालिन्युक्तामतौ तगौ गोब्धिलोकैरिति लक्षणात्।

वृध्दसंयोगः

श्लो **आन्वीक्षकीं त्रयीमपि शिष्टेभ्योऽध्यक्षसम्मुखाद्वार्ताम्।**

वक्तृप्रयोक्तृमुखतो गृह्णीयाद्दण्डनीतिमुर्वीन्द्र! ॥ 17 ॥

अन्वीक्षकीमित्यादिना पूर्वोक्तविद्याग्रहणयोग्यान्गूरून्निर्दिशति। शिष्टाः सम्यगधीतान्वीक्षिकी त्रयी विद्याः तेभ्य अन्वीक्षकीं त्रयीमपि गृह्णीयात्। आददीत अध्यक्षाः सम्यगधिगतकृष्यादिविद्याः तेषां सम्मुखात् सकाशात् वार्तां गृह्णीयात् वक्तारश्च प्रयोक्तारश्च वक्तृप्रयोक्तारः प्रवचनप्रयोगे च निपुणाः तेषाम्मुखतः दण्डनीतिं गृह्णीयात् अत्रेदं बोध्यम् आन्वीक्षिकी त्रयी वार्ताख्यास्त्रिस्रो विद्या दण्डाधीनस्थितिमत्यः दण्डश्च विनयाधीनस्थितिकस्सन्नेव प्रजानां योगक्षेमावहाः विनयो द्विविधः कृतकः स्वाभाविकश्चेति

In Public domain. Digitization Muthulakshmi Research Academy

क्रियया अभियोगलक्षणया निर्वृत्तः कृतकः अभियोगलक्षणक्रियां विनापि जन्मान्तरवासनावशात्सिद्धः स्वाभाविकः यथा संस्करणाभियोग-रूपश्शाणघर्षणादिः खन्यादि प्रभवं पाषाणादिविशेषं संस्करोति, न पुनरन्यं कमपि पाषाणादिखण्डं तथा विद्याभियोगोपि स्वतसिद्धशुश्रूषादि बुद्धि गुणसम्पन्नमेव जनं संस्करोति न तु तादृश बुद्धिगुणरहितं । ते च बुद्धिगुणा अष्टौ भवन्ति। शुश्रूषा श्रवण ग्रहण धारण विज्ञानोहापोह तत्वाभिनिवेशाख्याः श्रवणार्हेषु या श्रोतुमिच्छा सा शुश्रूषा।शुश्रूषायां सत्यमासे वा श्रवणं ।श्रुतार्थस्य ज्ञानं ग्रहणम्। गृहीतस्याविस्मरणं धारणम्। धारितेष्वर्थेषु साध्यसाधनादिस्वरूपविवेकज्ञानं विज्ञानम्। शब्दानुक्तस्य लिङ्गेंन वदतिरूहः युक्तिरहितस्य हानमपोहः वस्तु याथात्म्यज्ञानं तत्वाभिनिवेशः विद्याग्रहणकाले यस्या विद्यया य आचार्यस्तस्य तच्छिष्यं प्रति धर्मानुशासन-प्रभविष्णुत्वात्तदाचार्यानुशासनानतिक्रमेण विद्याग्रहणम् गुर्वागमनादिसमये प्रत्युत्थानादिकसमये प्रत्युत्थानादिकरूपविनयः गुरुवरिवस्य इति अपि च कृतचौलकर्मा अर्थात् पञ्चमे वर्षे नियमपूर्वमक्षराणि गणितञ्चाभ्यसेत्। कृतोपनयनस्त्रयीमान्वीक्षकीञ्च शिष्टेभ्यो गृह्णीयात्, वार्तामध्यक्षेभ्यो, दण्डनीतिं वक्तृप्रयोक्तृभ्योऽभ्यसेत्। आषोडशाद्वर्षाद् ब्रह्मचर्यं, ततो गोदानं दारकर्म च कर्तव्ये। कृतदारपरिग्रहस्यापि विनयवृद्ध्यर्थः विद्या-वृद्धानाम्परिचयो नित्यः शास्त्रसंस्कारस्य विद्यावृद्धानाम्परिचयप्रभवत्वात् किञ्च पूर्वस्मिन्नर्हभागे हस्तिहयरथचर्याः आयुधविद्याञ्च शिक्षेत अन्तिमेऽहर्भागे अभ्यसन् इतिहासश्रवणं कुर्यात्। ब्रह्मादिपुराणं रामायण-महाभारतादीतिवृत्तं, दिव्यमानुषादि चरित्ररूपाचाख्यायिका मीमांसाप्रभृतिन्यायोपन्यासशास्त्ररूपमुदाहरणम्, मनुस्मृत्यादिधर्मशास्त्रं बार्हस्पत्याद्यर्थशास्त्रञ्चेतिहासशब्देन व्यवह्रियते। मध्यमेऽर्भागे रात्रेस्तुरीय यामे च नूतनप्रमेयश्रवणं गृहीतानां धारणार्थं चिन्तनञ्च कुर्यात् ईषद्गृहीतान

In Public domain. Digitization Muthulakshmi Research Academy

सम्यग्ग्रहणार्थं पुनः पुनश्श्रवणञ्च कुर्यात् । एतत् श्रवणात्प्रज्ञाख्या त्रैकालिकी बुद्धिर्जायते। शास्त्रोक्तानुष्ठानश्रद्धा तया मनिस्वितोपजायत इत्येतावती विद्याशक्तिरिति ध्येयम् । वृत्तमार्या भेदो गीतिः। तदुक्तं वृत्तरत्नाकरे आर्या प्रथमदलोक्तं यदि कथमपि लक्षणं भवेदुभयोः दलयोः कृतियशोभां तां गीतिङ्गीतवान्भुजङ्गेशः। इति

इन्द्रियविजयः

इन्द्रियाणि श्रोत्रादीनि तेषां जयः इन्द्रियजयः। स द्विविधः स्वाभाविकः कृतक इति। शास्त्रसंस्कारमन्तरेण श्रोत्रादीनां स्वस्वविषयेषु शब्दादिषु अविरुद्धा प्रवृत्तिस्सः स्वाभाविक इन्द्रियजयः शास्त्रानुष्ठाननिष्ठावशाद्या शोत्रादीनां स्व स्व विषयेषु शब्दादिषु अविरुद्धा प्रवृत्तिः कृतक इन्द्रियजयः अस्य द्विविधमप्यत्रग्रहणम्

श्लो **षड्वैरिवर्गविजयेन जितेन्द्रियत्वं**
भूमीश्वरेण धरणीन्द्र ! समार्जनीयम् ।
शास्त्रस्य यत्फलतयागादितं यदेव
क्षोणीपतेरपतनस्य निदानभूतम् ॥ 18 ॥

षड्वैरीत्यादिना राज्ञश्श्रेयस्साधनं जितेन्द्रियत्वमार्जनीयमित्याह- षट्च ते वैरिणश्च षड्वैरिणः सप्तर्षय इत्यत्रैव **दिक्संख्येसंज्ञाया**मिति समासः। कामक्रोधलोभमानमदहर्षा एते षड्वैरिणः तेषां वर्गः तस्य विजयः निग्रहः तेन जितानीन्द्रियाणि येन तस्य भावः जितेन्द्रियत्वम् (सू) **निष्ठा** सम्+ आ इत्युपसर्गद्व्यपूर्वात् इत्यनेन निष्ठान्तस्य बहुव्रीहौ पूर्वप्रयोगः। समार्जनीयं समादनीय अर्जु-अर्जुनी इति धातोः(सू)**तव्यत्तव्यानीयरः** इत्यनीयरि साधुः। परस्त्रीविषयोभिलाषः कामःहिंसा-प्रवर्तकश्चित्तविकारःक्रोधः, परद्रव्येच्छालोभः, बालिश्यादात्मन्यनुपमत्व

In Public domain. Digitization Muthulakshmi Research Academy

बुद्धिर्मानः, धनविद्यादि प्रभवोगर्वो मदः,इष्टार्थप्राप्त्युपभोगजन्या प्रीतिर्हर्ष इति यत् जितेन्द्रियत्वं तस्य शास्त्रजन्यसंस्कारस्य अपतनस्य राज्याधिपत्यात्पतनाभावस्येत्यर्थः निदानभूतं आदिकारणम्। (नि) **निदान त्वादिकारणमित्यमरः।** वसन्ततिलकावृत्तम् । " उक्ता वसन्ततिलका तभजाजगौगः" इति लक्षणम् ॥

श्लो **कामेन दाण्डक्यमुखा विनष्टाः**
क्रोधेन नष्टा जनमेजयाद्याः ।
लोभेन याताः क्षतिमैलमुख्याः
कामादयः कं सुखयन्ति राजन् ॥ 19 ॥

कामेनेत्यादि श्लोकद्वयेनारिषड्वर्गजयाभावे दोषं सेतिहाससमाह कामेनेति हेतौ तृतीया दाण्डक्यः मुखं प्रधानः प्रारम्भो वा ये दाण्दक्यमुखा दाण्डक्य प्रभृतय इत्यर्थः। खन्यत इति मुखम् खनु अवधारणे इत्यस्मात् (सू)**डित्थनेर्मुट्सचोदात्तः** इत्युणादिसूत्रेण अच् सचडित् खनेर्मुडागमस्य चोदात्तः प्राक् ख नोमुडुदात्तश्च ततोऽच्च प्रत्ययो भवेत् । **प्रजासृजायितः खात् तस्मादाहुर्मुखं बुधाः** इति निरुक्तम्। **मुखं प्रधाने प्रारम्भे वक्रे निस्सरणेऽपि च। उपाये द्वारि ताम्रे** इति नानार्थरत्नमाला विनष्टाःकामाद्भोजवंश्य दाण्डक्यो नाम राजा ब्राह्मणकन्यामपहृत्य तत्पितृशापात्सबन्धुराष्ट्रो ननाश तथैव वैदेहः करालो नाम भूपतिर्ब्राह्मणीमभिलषन् विप्रशापान्नष्ट एवमन्यान्यप्यैतिह्यान्यनुसन्धेयानि। क्रोधेन जनमेजयतीति जनमेजय जनशब्दपूर्वकादेः जयतेः कम्पनार्थकातः (सू)**एजेंखश् (3-2-28)** इति खश् (सू) **अरुर्द्विषदजन्तस्यमम्** **(७-३-८४)** मितिजनशब्दस्य मुमागमः खशश्शित्त्वाण्णण्यन्तस्य एजेत्यस्य (सू) **सार्वधातुकार्धधातुकयो (6-3-67)** रितिगुणे अयादेशे च "जनमेजय" इति रूपं । जनमेजयाद्याः जनमेजय-

In Public domain. Digitization Muthulakshmi Research Academy

प्रभृतयः नष्टाः जनमेजयो नाम राजाऽश्वमेधयागे क्रोधाद्विप्रैर्विवदमानः तच्छापान्नष्टः। तथैव तालजङ्घो नाम भूपतिर्भार्गवेषु क्रोधाद्विक्रम्य तच्छापाद्विननाश । इलानाम्न्याः वैवस्वतमनुपुत्र्याः अपत्यं पुमान् ऐलः। पुरुरवा नाम राजा (सू) **शिवादिभ्योऽण् (४-१-११२)** इत्यण् ऐलमुख्याः पुरूरवप्रभृतयः लोभेन क्षितिं नाशं याताः त्रयोदशद्वीपाधिपतिरपि पूररवा लौभ्यादयुक्तमिदमेवेतीत्युत्क्रोशतामिति प्राणं रत्नानि जहार।तद्वरणाय ब्रह्मणा प्रेषितसनत्कुमारस्य पुरूरवाः दर्शनमप्यदत्वाऽवमेने । ततो विप्रा एनं शप्त्वा उन्मत्तमकार्षुरिति महाभारते आदिपर्वणि कथा श्रूयते। एतदीयाऽन्यपि कथा श्रूयते। एकदा नैमिशारण्ये मुनिभिः प्रवर्तितं सत्त्रयागं दिदृक्षुः पुरूरवास्तत्र गत्वा सुवर्णनिर्मितं यज्ञवाटं दृष्ट्वा लोभात्तदपहरणे मतिञ्चकार। तदा मुनयस्तं वज्रहतमकार्षुः एवमेव लोभात्सौवीरदेशाधिपतिः बिन्दुरपि नष्टः अतो राजन्! कामक्रोधलोभाः कं जनं सुखयन्ति । न कमपीत्यर्थः ।इन्द्रवज्रा वृत्तम् ।

श्लो **मानेन पौलस्त्यमुखाः प्रमीता**
दम्भोद्भवाद्यनिहतामदेन ।
हर्षेण वातापिमुखाः प्रणष्टा
दुष्टाश्रिताः के प्रभवन्ति राजन् ! ॥ 20 ॥

माने नेति पुलस्तेर्गोत्रापत्यं पुमान् पैलस्त्यः रावणः । (सू) **गर्गादिभ्यो यञ्** (4-1-105) इति यञ् रावणो मानेन हेतुना जनकनन्दिनीं रामाय प्रयच्छन् सपरिवारो मृतः, तथैव मानाद्दुर्योधनोऽपि पाण्डवेभ्यो राज्यभागमयच्छं तैर्युध्दे निहतः, मदेन हेतुना दम्भोद्भवो नाम राजा सर्वभूतान्यवमत्य गन्धमादने तपस्यन्तौ नरनारायणौ युद्धायाहूय ताभ्यां निहतः। एवमेव हैहयदेशनाथः कार्तवीर्यार्जुनो मदात्परशुरामस्य पित्रे

In Public domain. Digitization Muthulakshmi Research Academy

जमदग्निमहर्षये द्रुह्यन् परशुरामेण हतः। हर्षेण हेतुना वातापिर्नामाऽसुरः कुम्भसम्भवमृषिं मारयितुं प्रवृत्तस्तेनैव नाशितः। तथैव यादवाः दुर्वाससं वञ्चयितुं प्रवृत्तास्तच्छापहता अभूवन्नित्यादय इतिहासा अनुसन्धेयाः। राजन्! दुष्टश्रिताः के वा जनाः प्रभवन्ति न केऽपि प्रभवन्तीत्यर्थः । इन्द्रवज्रा वृत्तम् ।

श्लो **शत्रून् विजित्य षडमून् विजितेन्द्रियत्व-**
मासाद्य चक्रमखिलं धरणेरभञ्जन् ।
धात्रीतलेन्द्र! जमदग्निसुताम्बरीष
नाभागमुख्यवसुधावलयाधिनाथाः ॥ 21 ॥

अरिषड्वर्गजयस्य इन्द्रियजयः फलम्। इन्द्रियजयस्य फलं शत्रूनित्यादिना सोदाहरणमाह। जमदग्निसुतः परशुरामः, अम्बरीषो नाभगस्य सुतः नामक नाभाग अनयोः कथे भागवते नवमस्कन्धे चतुर्थाध्यायकथिते नृपतेः पुत्रः अम्बरीषस्य पिता । वसन्त तिलका वृत्तम् ।

श्लो **प्रज्ञां वृद्धसमागमेन नयनं चारेण चोद्योगतो**
योगक्षेमसमार्जनं नियमनाद्धर्मे नृणां स्थापनम् ।
शिक्षां बोधबलाज्जगद्दयिततां द्रव्यार्जनोत्सर्जनै-
र्वृत्तिम्पथ्यवशान्महीतलपते! कुर्वीत धात्रीपतिः ॥ 22 ॥

प्रज्ञामित्यादिना इन्द्रियजयसम्पादनानन्तरं राज्ञा प्रज्ञादिकं सम्पादनीयमित्याह। प्रज्ञा व्याख्याता वृद्धाः अन्वीक्षिक्यादि विद्याविशारदाः तैस्समागमो गुरुशिष्यत्वसम्बन्धः तेन प्रज्ञां कुर्वीत उत्पादयेत्, विकासयेच्च, चारेण गूढपुरुषेण नयनं चक्षुः कुर्वीत । गूढपुरुषं स्वपरराष्ट्रवृत्तप्रत्यक्षीकरणार्थं चक्षुस्थानीयं कुर्यादित्यर्थः। उद्योगतः **उत्थानाध्रित्** उत्थानं, उद्योगः अनुष्ठानमित्येते पर्यायाः योगः अलब्धस्वलाभः क्षेमः लब्धस्य परिरक्षणम् ।तयोस्समार्जनं सम्पादनं कुर्वीत नियमनं कार्यानुशासनम्

In Public domain. Digitization Muthulakshmi Research Academy

इदमीदृशमित्थं कर्तव्यमित्याज्ञापनमित्यर्थः। तस्मात् नृणां स्वधर्मस्थापनं नियन्त्रणं कुर्वीत। शिक्षां विद्याग्रहणं शिक्षाविद्योपादाने इति धातोःशिक्ष्यते **स्थानादिकमनयेति** कर्मणि **गुरोश्च** हलः इत्यणि **शिक्षाशब्दस्साधुः**। बोधबलात् विद्या ग्रहणबलात् अथवा विद्योपदेशबलात् कुर्वीत जगतो लोकस्य दयितः प्रियः इष्टः तस्य भावः जगद्दयितता ताम् द्रव्यस्य आर्जनं सम्पादनम् स्वीकार इत्यर्थः। उत्सर्जनं दानं पात्रेष्वर्पणमित्यर्थः। **(नि) त्यागो विहापितं दानमुत्सर्जनविसर्जने** इत्यमरः। वृतिं लोकयात्रां तदात्वायत्योर्यत्पथ्यं हितम् तद्वशात् कुर्वीत। शार्दूलविक्रीडितं वृत्तम्। "सूर्याश्वैर्मसजास्स्ततास्सगुरवश्शार्दूल विक्रीडितम्" इति लक्षणात्।

श्लो **असत्यवाचामतिमात्रनिद्रां**
चापल्यमौद्धत्ययुतञ्च वेषम्।
अधर्मसंयुक्तमनर्थयुक्तम्
त्यजेत्प्रभो! संव्यवहारमीशः ॥ 23 ॥

असत्येत्यादिना राज्ञः परित्याज्यानाह। असत्यवाचा मिथ्यावचनम्। ताम् उच्यत इति वाचा वच परिभाषणे इत्यस्मात् (वा) **क्विब्वचिप्रच्छ्यायतस्तु कटप्रुजुश्रीणां दीर्घोऽसम्प्रसारणं च**। इति क्विप् दीर्घः सम्प्रसारणाभावश्च तदनन्तरं (वा)**वष्टिभागुरिवल्लोपमवाप्योरुपसर्गयोः** आपञ्चैव हलन्तानां यथा **वाचानिशादिशा** इति वार्तिकादापोविधानम्। तेन वाचाशब्दस्साधुः(नि) **वाग्वाचे भारत्यां वचनास्त्रियो** इति मेदिनी। **ब्राह्मणी वचनं वाचा जल्पितं गदितं गिरा** इति शब्दार्णवः।अतिमात्रं निद्रां अयोधोचित- निद्राम् चापल्यं काल्यम्। औद्धत्ययुतं वेषं अविनीतानां यादृशो वेषस्तादृशं वेषमित्यर्थः। अधर्मेण संयुक्तं सहितम् अनर्थेन युतञ्च संव्यवहारम् ईशः प्रभुः त्यजेत्। अनेन परस्त्रीपरद्रव्यपरपीडापरिवर्जनं कर्तव्यमित्यपि सूचितम्। उपजातिवृत्तं

In Public domain. Digitization Muthulakshmi Research Academy

लक्षणं तूक्तमेव ।

श्लो **कामं निषेवेत तथा नृपालो**
धर्मार्थयोस्स्यान्नयथा विरोधः ।
यद्वात्रिवर्गं सममेव राज-
न्नन्योन्यसम्बद्धमुपाश्रयेत ॥ 24 ॥

काममित्यादिना त्रिवर्गसेवनप्रकारमाह। विरोधो बाधः कामेन धर्मार्थायोर्यथा बाधो न स्यात्तथा कामं सेवेत । ननिस्सुखस्स्यादित्येकः पक्षः **यद्वेत्यादिना पक्षाननन्तरं** दर्शयति अन्योन्यसम्बद्धं परस्परानुबद्धं त्रयाणां धर्मार्थकामानां वर्गः समूहस्त्रिवर्गः **त्रिवर्गो धर्मकामार्थेरित्यमरः** तं समं तुल्यमेव। **वाच्यलिङ्गोस्समस्तुल्यस्सदृक्षस्सदृशस्सदृक्साधारणस्समानश्चेत्यमरः। समासं वत्सरे स्त्रियाम् सर्वसाधासमानेषु समं स्यादभिधेयवदिति विश्वमेदिन्यां।** उपाश्रयेत परस्परसंसृष्टा धर्मार्थकामान् तुल्यमात्रया सेवेतेत्यर्थः । इन्द्रवज्रा वृत्तम् ॥

श्लो **धर्मार्थ कामेष्वतिमात्रमेको**
निषेव्यते चेदवनीश्वरेण ।
आत्मानमन्यौ हि निपीडयेताम्
समेन सत्यं नरपालमौले ! ॥ 25 ॥

धर्मार्थेत्यादिना त्रिवर्गस्य वैषम्येण सेवने दोषमाह । मात्रा अल्पतामतिक्रान्तं अतिमात्रम् अधिकमित्यर्थः। (सू) **अत्यादयः क्रान्ताद्यर्थे द्वितीयया** इति समासः। स एव अतिमात्रसेवितो वा स एव आत्मानम् अतिमात्रसेवितं धर्मादिष्वन्यतमम् अन्यौ धर्मकामौ धर्मार्थौ अर्थकामौ च निपीडयेतं बाधेयाताम् । उपजाति वृत्तम् ॥

श्लो **अर्थम्प्रधानमवदत्कौटिल्यो धर्मकाममूलमिति ।**
धर्मम्प्रधानमाहुर्धर्मज्ञा यं विना नतौ सेव्यौ ॥ 26 ॥

In Public domain. Digitization Muthulakshmi Research Academy

अर्थमित्यादिना त्रिवर्गस्य प्राधान्यमरोचमानानाम् । कौटिल्यः धर्मज्ञानां मते सहेतुके धर्मयति कौटिल्यः। कुटो घटः तं धान्यपूर्णं लान्ति सङ्गृह्णन्तीति- कुटलाः कुम्भीधान्या इत्यर्थः। "कुम्भीधानः" कुसूलधान्यो वा अश्वस्तनिक एवं वा इति णुमः **कुम्भीधान्या अलोलुपा** इति शिष्टलक्षणम्। तेषां गोत्रापत्यं कौटिल्यः इति नयचन्द्रिकायामर्थशास्त्रव्याख्यायां "कौटिल्य" इति व्यवहारस्तु प्रामाणिक इत्यभिज्ञाः धर्मकामयोर्मूलं कारणम् । मूलन्तु **नप्यन्ये पुंस्सप्यादि समीपयोः नक्षत्रभेदे पादे च भूरुहाणां वशीकृतौ स्वीये च कारणे चेति केशवः** इति अर्थं प्रधानंमुख्यम् अवदत्-अवोचत् अर्थ एव प्रधानम् इतरयोस्तदेकसाध्यत्वादित्युक्तेर्थधर्मकामयोरर्थसाध्यत्वात्त्रिवर्ग सेवने धर्मकामयोरप्राधान्यमर्थस्यैव प्राधान्यं देयमिति कौटिल्यमतम्। धर्मविरुद्धयोरर्थकामयोर्लाभेऽपि तत्सेवनस्य विधिदूषितत्वा-दर्थकामयोरप्राधान्यं धर्मस्यैव प्राधान्यं देयमिति धर्मज्ञमतम्। तथाचोक्तं पाद्मे **धर्मादर्थञ्च कामञ्च मोक्षञ्च लभते पुमान् । तस्माद्धर्मं समीहेत विद्वान्सविबुधस्मृतः**। उत्तरखण्डे 25 अध्याये पाद्मे पातालखण्डे ६५ अध्यायेऽपि । **परित्यजेदर्थकामौ स्यताञ्चेद्धर्मवर्जितौ । धर्मेण प्राप्यते सर्वं अर्थकामादिकं सुखम्**। इत्युक्तं किञ्च महाभारतेऽपि शान्तिपर्वणि वामदेवेन वसुमनसो राज्ञ उपिदिष्टे राजधर्मे **धर्ममेवानुवर्तस्व न धर्माद्विद्यते परम्। धर्मे स्थिता हि राजानो जयन्ति पृथिवीमिमाम्। अर्थसिध्देः परं धर्मं मन्यते यो महीपतिः। स धर्मेण विराजते।** (62 अध्यायः 612) **न भवेन्न च संरम्भान्नद्वेषात् धर्ममुत्सृजेत्।** (6-3-9) इति चोक्तम्। वृत्तन्त्वार्याभेदो गीतिः।

लक्ष्मैतत्सप्तगणा गोपेता भवति नेह विषमेजः ।
षष्ठोऽयं न लघू वा प्रथमेऽर्थनियतमार्यायाः ।

In Public domain. Digitization Muthulakshmi Research Academy

षष्ठे द्वितीयलात्परकेन्लेमुखलाच्च सयति पदनियमः ।
चरमेऽर्थे पञ्चमके तस्मादिह भवति षष्ठो लः ।

इत्यार्यालक्षणम्। गाथालक्षणन्तु

आर्या प्रथमदलोक्तं यदि कथमपि लक्षणं भवेदुभयोः ।
दलयोः कृतयतिशोभां तां गीतिङ्गीतवान्भुङ्तेशः ॥

इति वृत्तरत्नाकरे ।

वर्णधर्माः

श्लो **कर्माणि षट्स्वधर्मं राजन् विद्ध्यग्रजन्मनोऽध्ययनम् ।**
अध्यापनञ्च यजनं याजनदानप्रतिग्रहश्चेति ॥ 27 ॥

राज्ञो वर्णाश्रमधर्मान् पालकत्वनियमात्तत्पालनीयान्वर्णाश्रमधर्मान् एकादशभिश्श्लोकैराह । **कर्मणीत्यादिना** राजन् अग्रे —आदौ जन्म यस्य तस्य अथवा अग्रात् – मुखात् जन्म यस्य तस्य अग्रजन्मनो ब्राह्मणस्य **ब्राह्मणोऽस्यमुखमासीदितिश्रुतेः** अध्ययनं साङ्गवेदाध्ययनम्, **ब्राह्मणेन निष्कारणो धर्मष्षडङ्गो वेदोऽध्येयो ज्ञेयश्चेति** महाभाष्यवचनात् अध्यापनं साङ्गवेदाध्यापनम्। यजनं-यज्ञकरणम्,याजनं यज्ञकारयितृत्वम्। दानम् स्वस्वत्वनिवृत्ति पूर्वकपरस्वत्वापादनम्। प्रतिग्रहः विधिवद्दत्तस्य स्वीकारः इति षट् कर्माणि । स्वधर्मः श्रुतिस्मृतिविहितं स्ववर्णधर्मं । विद्धि जानीहि । विद ज्ञाने इत्यस्मादादादिकाल्लोण्मध्यम पुरुषैकवचने सेर्हित्वे (सू) **हुझल्भ्योहेर्धिः** रिति हेर्धित्वे विद्धीतिरुपम् । वृत्तन्तु गीतिः । लक्षणमुक्तम् ।

श्लो **कर्माण्यमानिनि राजन् जानीहि क्षत्रियस्य निजधर्मम् ।**
अध्ययनयजनदानान्यपि शस्त्राजीवोभूत रक्षा च ॥ 28 ॥

कर्माणीति राजन् क्षत्रियस्य अध्ययनयजनदानानि पूर्वश्लोकोक्तानि अपि च शस्त्रेण आयुधेन **आयुधन्तुप्रहरणं शस्त्रमस्त्रमित्यमरः** आजीवः जीविकावृत्तिः शस्त्राजीवः-आयुधजीविका न अभेदो जीविका वार्ता

In Public domain. Digitization Muthulakshmi Research Academy

वृत्तिर्वर्तनजीवने इत्यमरः च भूतरक्षाप्राणिपालनं च शस्त्रास्त्रजीवभूत रक्षेचेति पाञ्चालीनिजधर्मं स्ववर्णविहितं धर्मं जानीहि अवबुध्यस्व ज्ञा अवबोधन इत्यस्माल्लोण्यध्यमपुरुषैकवचनम् । वृत्तं गीतिः ।

श्लो **अध्ययन यजन दानान्यपि कृषिपशु पालनावणिज्याश्च ।**
प्राहुस्स्वधर्ममार्या वैश्यस्य वसुन्धरातलाधीश ॥ 29 ॥

वैश्यस्य वसुन्धरतलाधीश भूमीश्वर अध्ययनयजनदानानि पूर्वोक्तानि अपि च, कृषिपशुपालनावणिज्याः, कृषिः केदारेषु बीजावापपरिचर्यादि विधानम् । पशुपालना पशूनाङ्गवाश्वादीनां पोषणचिकित्सादिना वणिज्य - क्रयविक्रयव्यवहारः वैश्यस्य एते षट्, स्वधर्मं निजवर्णविहितं धर्मं आर्याः पूज्याः महर्षय इत्यर्थः प्राहुः ब्रुवन्ति । वृत्तम् आर्याभेदो गीतिः ।

श्लो **कारुकुशीलवकृत्ये द्विजशुश्रूषा कृषिर्वणिज्या च ।**
पशुपालनं स्वधर्मो नृपते! शूद्रस्य वेदवित्कथितः ॥ 30 ॥

कार्वित्यादि करोतीति कारुः— शिल्पी, (सू) कृवापाजिमिस्वदि-साध्यशूभ्य उण् (उणादि१.1) इत्युण् (नि) **कारुस्तु कारके शिल्पे विश्वकर्मणि शिल्पिनीति हेमचन्द्रः। तक्षे च तन्तुवायश्च नापितो-रजकस्तथा। पञ्चमश्चर्मकारश्च कारवश्शिल्पिनो मताः॥** इत्यभियुक्ताः। कुत्सितं शीलमस्येति कुशीलवः। **कुगतिप्रादय** इति समासः। अन्येभ्योऽपि दृश्यत इति वः यद्वा कुशीलं वाति गच्छतीति शालवः(सू)**अतोऽनुपसर्गे कः** इति(सू) **अतोलोपः (६-४-४८)** इति चेत्यालोपः चारणनामकनटविशेषः कुशीलवः कारु- कुशीलवयोः कृत्ये—कर्मणि **भरता इत्यपि नटा चारणास्तु कुशीलवा** इत्यमरः। कुशीलवस्तु द्वेमर्त्यजातिभेदौ यथाऽवऽदत्। वैदेहाज्जनितेऽम्बष्ठ्यां लङ्घनप्लवनादिना वर्तमाने नटानाञ्च प्रसिद्धे चारणे तथा। **कुशीसंज्ञा यो विकारलवेतुस्यात्पुमानयम्** इति केशवः। द्विजशुश्रूषा

In Public domain. Digitization Muthulakshmi Research Academy

कृषिः वाणिज्यं पशुपालनञ्चेति षट्कर्माणि नृपते-राजन् शूद्रस्य वेदविद्भिःकथितः-उक्तः वेदवित्कथितः स्वधर्मः— निजवर्ण विहितधर्मः शूद्रशब्दो द्विविधःयौगिकः रूढश्चेति तत्र चतुर्थवर्णवाचको रूढः योगवशादन्यत्र प्रयुक्तो यौगिकः। तद्यथा क्षत्रियं जानश्रुतिं प्रतिरैक्क आह अह हारे त्वाशूद्र तवैव सहगोभिरस्तु आजहारे माश्शूद्रानेनैव मुखेनालापयिष्यथ इति (छान्दोग्ये अ २५०) अत्र शुचाभिदुद्रुवे यद्वा शुचमभिदुद्राव अथवा शुचारैक्कमभिदुद्रावेति (शुच शोके इत्यस्मात् **शुचेर्दश्च** (उणादि २-१९) इति ठक् दश्चान्तदेशः उपधाया दीर्घश्च इति शूद्रशब्दसाधुः। अथ शूद्रादिकरणे शङ्करभगवत्पादैरुत्पादितः। वृत्तन्तु गीतिः।

आश्रमधर्माः

तत्र ब्रह्मचारिधर्माः

श्लो **अभिषेकः स्वाध्यायो भैक्ष्यं वृत्तमग्निकार्यमिति राजन्।**
उपकुर्वाणस्य पुनर्धर्मोऽयं ब्रह्मचारिणः कथितः ॥ 31 ॥

अभिषेकः इत्यादिभिः पञ्चभिः श्लोकैराश्रमधर्मान् विवक्षुस्तत्रादावुपकुर्वाण ब्रह्मचारिधर्ममाह। राजन् अभिषेकस्त्रिषवण स्नानम्, स्वाध्यायः, स्ववेदशाखाध्ययनम्, भैक्षं भिक्षावृत्तिः, व्रतं, गोदानान्तकर्म, अग्निकार्यमग्निशुश्रूषा उपकुर्वाणस्य ब्रह्मचारिणः ब्रह्म वेदः लक्षणया तद्ग्रहणोपयोगि दण्डाजिनधारणादिरूपं व्रतमपि ब्रह्म तच्चरितुं शीलमस्येति ब्रह्मचारी **व्रते** णिनिः ब्रह्चारिणः पुनरयं धर्मः आसमवर्तनादनुष्ठीय इत्यध्याहार्यः इति कथितः उक्तं श्रुतिस्मृत्यादिषु। वृत्तन्तु आर्याभेदोगीतिः।

श्लो **आचार्ये तदभावे तत्सुतसब्रह्मचारिणोर्विहिता।**
प्राणान्तिकेतिवृत्तिर्निष्ठावद्ब्रह्मचारिणो राजन् ॥ 32 ॥

In Public domain. Digitization Muthulakshmi Research Academy

ब्रह्मचारिणौ द्विविधौ उपकुर्वाणोनैष्ठिकश्चेति तत्रोपकुर्वाणश्च धर्मः पूर्वश्लोके कथितः। अत्र तु नैष्ठिकस्य धर्म उच्यते । आचार्य इत्यादिना निष्ठावद्ब्रह्मचारिणः नैष्ठिकब्रह्मचारिणः आचर्यत इत्याचार्यः आङ्पूर्वकच्चर-गतावितिधातोः **ऋहलोर्ण्यदिति ण्यत(३-१-१२४)** अत उपधायाः इति वृद्धिः **उपनीय तु यश्शिष्यं वेदमध्यापयेद्द्विजः। साङ्गञ्चसरहस्यञ्च तमाचार्यम्प्रचक्षते।** इति मनुः (नि) मन्त्रव्याख्याकृदाचार्यः अमरः आचार्ये अर्थाद्गुरुकुले तदभावे तस्य आचार्यस्य अभावे तत्सुत सब्रह्मचारिणोः तस्य आचार्यस्य सुते अथवा सब्रह्मचारिणि ब्रह्मवेदः तदध्ययन-व्रतमप्युपचाराद्ब्रह्मचारी तस्मिन् **व्रते** इति णिनिः। (सू) **चरणे ब्रह्मचारिणि** इति समानस्य अभावः प्राणान्तिकी प्राणोत्क्रमणपर्यन्तावृत्तिः स्थितिः विहिता वेदनस्मृतिभिश्च सब्रह्मचारी समानशाखाध्यायी वृद्धः उपकुर्वाणस्य समावर्तनपर्यन्तं व्रतानुष्ठानं नैष्ठिकस्य तु यावज्जीवमिति भेदः। वृत्तमार्यागीतिः।

<u>गृहस्थधर्माः</u>

श्लो **देवेषु पित्रतिथिभृत्यगणेषु दत्वा**
शेषान्नभुक्ति रसमर्षिभिरेव तुल्यैः।
उद्वाहकर्मकरणं निजकर्मवृत्तिं
धर्मः प्रभो! गृहपतेर्ऋतुगामिता च ॥ 33 ॥

देवे ष्वित्यादिना गृहस्थधर्ममाह। देवतार्चनवैश्वदेवपित्राद्यर्चनं अतिथीनां भृत्यानाञ्च अन्नदानं कृत्वा अनन्तरं शेषान्नस्य भोजनम्। तुल्यैः कुलादिनासमानैः असमर्षिभिः भिन्नर्षिगोत्रैरेव उद्वाहकर्मकरणं विवाह क्रियाकरणं । ऋतुगमिता ऋतुरजस्वला स्नानादिनादूर्ध्वं द्वादशरात्रयः तस्मिन् भार्यागमनशीलत्वम्। निजकर्मवृत्तिः स्ववर्णोक्तकर्मणा जीवनञ्च

In Public domain. Digitization Muthulakshmi Research Academy

गृहपतेर्गृहस्थस्य धर्मः वेदस्मृत्यादिबोधितो धर्मः। वसन्ततिलका वृत्तम्। **उक्तावसन्ततिलका तभजाजगौगः** इति लक्षणात् ।

वानप्रस्थधर्मः

श्लो **वानप्रस्थस्य धर्मोह्ययमजिनजटाधारणं चाग्निहोत्र-**
म्भूमौ शय्याऽभिषेकोऽतिथिपितृसुमनःपूजनं ब्रह्मचर्यम् ।
वन्याहारश्च धात्रीवर विधिविहितश्शास्त्रमेव प्रमाणं
कृत्वा पूर्व्यैरनेकैरपिधरणितलेऽनुष्ठितो धर्मशीलैः ॥ 34 ॥

वानप्रस्थस्येत्यादिना वानप्रस्थधर्ममाह। प्रकर्षेण तिष्ठन्ति अस्मिन्नितिप्रस्थः(य) फञ् र्धेकविधानमित्यादिकारणीकप्रत्यये साधुः वने प्रस्थः वनप्रस्थः वनैकदेशः तत्रभव इत्यर्थे (सू) **तत्र भवः**(4-3-38) इति वने प्रकर्षेण तिष्ठतीति वनप्रस्थः स एव वानप्रस्थः (सू) **प्रज्ञादिभ्यश्चेति** (5-4-38) स्वार्थेऽण् इति कश्चित् अजिनजटाधारणम् अजिनस्य कृष्णमृगचर्मणः उपचाराद्वल्कलादेरपि जटानां व्रतिनां लग्नकचात्मकशिखाधारणम्। (नि) **व्रतिनां तु जटासटेत्यमरः** । (नि)**जलूलग्नक चेमूलेमांस्या मितिमेदिनी** । अग्निं ये हविराज्यादि यस्मिंस्तदग्निहोत्रं सायम्प्रातरनुष्ठेयमग्निकार्यं भूमौस्थण्डिले शय्या शयनम् अभिषेकः त्रिषवणस्नानम् अतिथिपितृसुमनःपूजनं पूजा ब्रह्मचर्यं ऊर्ध्व रेतस्कत्वम्। वने भवः वन्यः स चासौ आहारश्च वन्याहारः कन्दमूलफलादिभक्षणम् अयं हि धर्मः वानप्रस्थस्य विधिना शास्त्रेण विहितः अत एव धर्मशीलैः पूर्वैः अनेकैः द्विजैरितिशेषः।धरणीतले शास्त्रमेव प्रमाणं कृत्वा कष्टतरोऽपि अनुष्ठितः ।अतो भवतोऽप्यनुष्ठेय इति सूचितम् । स्रग्धरा वृत्तम् । **म्रभ्नैर्याणां त्रयेण त्रिमुनियतियुता स्रग्धरा** कीर्तितेयमिति लक्षणात्।

In Public domain. Digitization Muthulakshmi Research Academy

परिव्राजकधर्मः

श्लो अनेकत्र भैक्षं वशित्वं निवासो
वने बाह्यमाभ्यन्तरञ्चापि शौचम् ।
अनारम्भनिष्किञ्चनत्वे असङ्गः
परिव्राजकस्य प्रभो! धर्म एषः ॥ 35 ॥

अनेकत्रेत्यादिना परिव्राजकधर्मा माह प्रभो ! परित्यज्य सर्वं व्रजतीति परिव्राजकः सन्न्यासी परीत्युपसर्गपूर्वकाद्व्रजधातोः(सू) **ण्वुल्** तस्य अनेकत्र बहुषु गृहेषु नह्येकस्मिन् भैक्षं भिक्षाणां समूहःप्राणयात्रामात्रपर्याप्तस्यान्नस्य भिक्षित्वात् ग्रहणम्। (सू) **भिक्षादिभ्योऽण्** इत्यण् वशे जितेन्द्रियत्वम्। वने अरण्ये निवासः बाह्यमाभ्यन्तरञ्चापि शौचं कायवाङ्मानसानां नैर्मल्यं अनारम्भःनैष्कर्म्यम् च निष्किञ्चिनत्वम् निस्सत्वञ्च असङ्गश्च परिव्राजकान्तरेणापि संसर्गपरिहारश्च निष्किञ्चिनत्वे असङ्ग इत्यत्र (सू) **ईदूदेद्द्विवचनं प्रगृह्यमिति** (1-1-11) प्रगृह्यसंज्ञा।

(सू) **प्लुतप्रगृह्या अचि नित्यमिति(६-१-१२५)** प्रकृतिभावश्च । एष धर्मः। भुजङ्गप्रयातं वृत्तम्। **भुजङ्गप्रयातं भवेद्यैश्चतुर्भिरिति**- लक्षणात्।

सर्ववर्णसाधारणधर्मः

श्लो क्षमाऽहिंसा सत्यशौचेऽनसूयाऽनृंशंसता ।
सर्वेषामपि वर्णानां धर्मस्साधारणः प्रभो ! ॥ 36 ॥

क्षमेत्यादिना सर्ववर्णसाधारणधर्मानाह। क्षमा तितिक्षा "क्षमूष्"—सहने इति धातोः (सू) **षिद्भिदादिभ्योऽङ्** इति अङ् **अषितः क्षाम्यतेः क्षान्तिः क्षमूषः क्षमते क्षमा** इति सिद्धान्तकौमुद्याम् अषितः क्षाम्यतेः श्यन्विकरणपठितस्य **क्षमू सहने** इति धातोः क्तिनि क्षान्तिरितिरूपम्

In Public domain. Digitization Muthulakshmi Research Academy

। अस्य अषित्वात् **षिद्भिदादिभ्योऽङिति अङ्** न किन्तु क्तिनेव भ्वादि पठितस्य क्षमूष् सहने इति धातोस्तु षित्वात् क्तिनं बाधित्वा अङि क्षमेति आत्मनेपदित्वात् शपि क्षमते इति रूपञ्चेति तदर्थः । (नि) **क्षमा तितिक्षा पृथ्वी च शक्ते हिते क्षममिति** धरणिः। अहिंसा बन्धनताडनवधादित्यागः सत्यं तथ्यवचनम् सति साधुः तत्र (सू) **साधुरिति** यत् शौचः आभ्यन्तरं बाह्यञ्च नैर्मल्यम् अनसूयागुणपक्षपातःअनृशंसता अक्रौर्यम्। अनुष्टुप् वृत्तम् ।

श्लो **स्वर्गानन्त्यफलप्रदायकतया शास्त्रे स्वधर्मो मत**
स्तस्यातिक्रमणे जगत्सकलमप्युच्छिद्यते सङ्करात् ।
तस्मादव्यभिचारयन्नर पतिर्नृणां स्वधर्मं सदा
जीवन्नत्र मृतः परत्र च भवेदानन्दपूर्णः प्रभो ॥ 37 ॥

स्वर्गेत्यादिना स्वधर्मपालने फलं तदतिक्रमणे दोषञ्चाह स्वर्गः परलोकसुखम् आनन्त्यं इह लोके अविनाशः यद्वा मोक्षः तद्रूपफलप्रदायकतया शास्त्रे वादे धर्मशास्त्रे च स्वधर्मः मतः तस्य धर्मस्य अतिक्रमणे कृते सति सकलं जगदपि उच्छिद्यते उत्सादं प्राप्नोति तत्र हेतुः सङ्करादिति वर्णाश्रमधर्माणां अनुष्ठातृव्यवस्था विरहेण कर्मसङ्करः वर्णसङ्करश्च भवेत् तस्मात् सकलस्य जगत उच्छेदो भवति । तस्मात् नरपतिः नृणां स्वधर्मं स्ववर्णाश्रमधर्मं सदा अव्यभिचारयन् जीवन् अत्र इह लोके मृतः परत्र परलोके स्वर्गादौ च आनन्देन पूर्णो भवेत् । अत्रायमाशयः वर्णाश्रमधर्मा हि यथोक्ता अविवादसिद्धलोकयोगक्षेमहेतवः। ते च तदुपासक बीजक्षेत्र सङ्क्रान्त तदनुष्ठानवासनासनाथैस्तत्तद्वर्णाश्रमिभिरेव स्वकुलधर्मत्वबुध्या भक्ति -श्रध्दापुरस्सरमनुष्ठीयमानास्सन्तः सौष्ठवविशेषं प्रतिपत्तां लोकोपकारे च कमपि कमप्यतिशयमाधातुञ्च समर्था भवन्ति । ते चेदव्यवस्थमन्यैः कथञ्चिदनुष्ठीयेरन् । तर्हि हृतसौष्ठवाद्दीयेरन्, लोकोपकारे च नैवातिशय-

In Public domain. Digitization Muthulakshmi Reseach Academy

मादधीरन् अनुष्ठानबाह्यताञ्च क्रमेण साधयेयुः किञ्चेदानीन्तनानामिव स्ववर्णेतर वर्णद्वेषं परस्परवादनप्रवृत्तिञ्च जनमेयः।तेन प्रजाकल्लोलोदया-दन्यदेश्यानां दण्डयात्रा करणावकाशः धर्मव्याकुलीभावाल्लोकविनाशश्च स्यादिति। वृत्तम् शार्दूलविक्रीडितम् लक्षणन्तूक्तमेव ॥

कार्यामात्याः

श्लो **विद्यावृद्धसमागमेन्द्रियजयेष्वेतेषु सिद्धेष्वपि**
क्ष्मापालेन विना सहायमविनिर्वोढुं न तच्छक्यते ।
तस्मात्कर्मसु दक्षतापदगतान् युक्तान्गुणैर्मन्त्रिणः
कार्यामात्यपदे नरेन्द्र! पुरुषान् राजा प्रतिष्ठापयेत् ॥ 38 ॥

विद्येत्यादिना प्रकरणशुद्धिप्रदर्शनपूर्वकं कार्यामात्यस्थापनमाव-श्यकमित्याह। नरेन्द्रेति राज्ञस्सम्बोधनम् । विद्यावृद्धसमागमेन्द्रियजयं विना अर्थात्केवलेन क्ष्मापालेन राज्ञा अवनिः वोढुं न शक्यते। यथा एकं चक्रं चक्रान्तरसहायरहितं शकटादियोजितं न सम्यक्शकटा दिशं वहति। तथैव क्ष्मापालोऽपि सहायहीनोऽवनिं न सम्यग्वहतीति भावः। तस्मात् कर्मसु कर्तव्येषु कर्मसु दक्षतापदगतान् दक्षानित्यर्थः, मन्त्रिणः प्रधानमन्त्रिणः गुणैः वक्ष्यमाणैः पादोनैरर्थोनैरिरिति च आदिः। युक्तान् समुपेतान् पुरुषान् राजा कार्यामात्यपदे, प्रतिष्ठापयेत्, प्रतिष्ठितान् कुर्यात् । शार्दूल विक्रीडितं वृत्तम् ॥

कार्यामात्यकरणे मतभेदाः

श्लो **भारद्वाज उवाच कर्मसचिवान् राज्ञस्सहाध्यायिनो**
नेतुर्गुह्यसधर्मणः किल विशालाक्षोऽवदत्तान् प्रभो! ।
तानेवाह पराशरो नरपतेरापत्ययुर्धारकाः
निष्ठं साधयतोऽथवा तदधिकम्प्रोवाच तान्नारदः ॥ 39 ॥

Public domain. Digitization Muthulakshmi Research Academy

के वा कार्यमात्यपदव्यां स्थापनीया इत्यत्र भरद्वाजादीनामाचार्याणां मतानि **भारद्वाज** इत्यादिभिश्चतुर्भिश्लोकैर्वर्णयति। भारद्वाजो द्रोणाचार्य इति कौटिल्यार्थशास्त्रव्याख्यायां नयचन्द्रिकायां भारद्वाजऋषिविशेषः। राज्ञः सहाध्यायिनः कर्मसचिवान् कार्यामात्यान् कर्तव्यानीति शेषः। उवाच अध्ययनकाले सहाध्यायिनां मनश्शुद्धिः कर्मनैपुण्यञ्च राज्ञा दृष्टं भवेत्। ते च विश्वसनीयाःभवेयुः तस्मादमात्यपदव्यां ते नियोज्या इति भारद्वाजस्याशयः। विशालस्तन्नामधेयः अर्थशास्त्ररचयिता नेतुर्नायकस्य राज्ञः गुह्यसधर्मणः गुह्ये शीलच्युतौ परदारावमर्यादे रहस्यकर्मणि सधर्माणः तान् गुह्यसधर्मणः (सू)**धर्मादन्चिकेवलादित्यनिच्** तान् कार्यामात्यान् कर्तव्यान् अवदत् अब्रवीत्। किलेति **वार्तायां वार्तासम्भाव्ययोः किलेत्य**मरः। यद्वा किलेत्यस्मिन् मते अरुचिद्योतकः **वार्तायामरुचौ किलेति** त्रिकाण्डशेषः। गुह्यसधर्माणस्तु कार्यामात्यपदव्यां स्थापिताः राजाऽप्यस्माभिस्समानदोषः अतः अस्माकं मर्मज्ञानीव सौष्ठवं सम्पाद्य स्वकर्मसम्यगनुतिष्ठन्तो राज्ञे नापराध्यन्ति। भरद्वाजोक्त सहाध्यायिनश्चेत्सहक्रीडितत्वाद्राजा-नमवजानीयुरतो भारद्वाजमतं निराकरणीयमिति विशालाक्षस्याशयः। पराशरो वसिष्ठपौत्रः व्यासस्य पिता स तु नरपतेः आपत्सु उद्धाराकानेव प्राणापायकरापद्भ्यो राज्ञस्समुद्धारकान् उद्धर्तॄनेव, तान् कार्यामात्यान् कर्तव्यानाह ब्रूते ब्रूञ् व्यक्तायां वाचीत्यस्मात्परस्मैपदे लटि प्रथमपुरुषैकवचनं **ब्रुवः पञ्चोनामादित आहोब्रुवः** इति ण्वुल् ब्रुवः आहदेशश्च तेन आहेतिरूपम् प्राणपायकरापद्भ्यो राज्ञस्समुद्धारकाणां दृष्टोपकारत्वेन राज्ञि प्रेमातिशयस्स्यादिति त एव कार्यामात्याः कार्याः न तु गुह्ये सधर्माणः यथा ते स्वमर्मविदो राज्ञो बिभ्यति तथैवराजाऽपि स्वमर्मविद्भ्यवः स्वस्वमान दुश्शीलेभ्यस्तेभ्यो भीतः असुष्ठु कृतान्यपि तत्कर्माण्यनुमन्येत तस्माद्विशाला-क्षमतं परिहरणीयमिति पराशरमुनेर्हृदयमपि परिगणितद्रव्योत्पत्तिकर्मसु

In Public domain. Digitization Muthulakshmi Research Academy

नियुक्तानिति शेषः इष्टं राज्ञा आदिष्टमर्थम् अथवा तदधिकम् आदिष्टादधिकं वा धनं साधयतस्सम्पादयितृ पुरुषान् तान् कार्यामात्यान् कर्तव्यान्नारदः प्रोवाच स्वशरीरनैरपेक्ष्येण राज्ञः आपत्समुद्धारकत्वं नाम सेवाधर्मः न तु बुद्धिकुशलता अतः पराशरमतं त्याज्यम् ये तु बुद्धिकौशलाद्राज्ञा आदिष्टं तदधिकं वाऽर्थं सम्पादयेयुस्तानेव कार्यामात्याद्दृष्टगुणतावत्कुर्यादिति नारदस्याकूतम् । शार्दूल विक्रीडितं वृत्तम् ।

श्लो **विश्वासेनायातान् भूनेतुः पितृपितामहक्रमतः ।**
प्रोवाच कर्मसचिवान् कौणपदन्तो वसुन्धराधीश! ॥ 40 ॥

विश्वासेनेति विश्वासेनेति हेतौ तृतीया । इदमनुरागादीनामप्युपलक्षणं । नारदोक्तानाममात्यानां धनसम्पादनातिरिक्ताः विश्वास्यत्वानुरक्तत्वादि गुणा न सन्तीति तन्मतं न सम्मतम् । अतः पितृपितामहक्रमतः आगतान् पुरुषानिति शेषः । अत एव साक्षाद्दृष्टपूर्वचरित्रत्वात् विश्वास्यत्वं तेन हेतुना भूनेतुः कर्मसचिवान् कार्यामात्यान् कर्तव्यान् कौणपदन्तः कुणपदन्तस्य पूतिगन्धदन्तस्य शन्तनोरपत्यम् (सू) **तस्यापत्यमित्यण्** भीष्मः इत्यर्थशास्त्रव्याख्यायां नयचन्द्रिकायां प्रोवाच ऊचे। एतत्कुल - क्रमागतास्तेस्वपूर्वपुरुषशालविश्वास्य गुणत्वेन कार्यामात्यपदवीमर्हन्ति। किञ्च आत्मापहारिणमपि राजानं ते परिचयवशाद्गावः परिचितगोगणनमिव न त्यजेयुरिति कौणपदन्तस्याशयः । वृत्तन्त्वार्याभेदो गीतिः । तदुक्तं वृत्तरत्नाकरे

आर्या प्रथमदलोक्तं यदिकाथमपि लक्षणं ।
भवेयुरुभयोः दलयोः कृतयति शोभां ताङ्गीतिङ्गीतवान्भुजङ्गेशः ॥ इति ।

श्लो **नूतनान्नीतिकुशलान् कार्यामात्यान् महीभृतः ।**
वातव्याधिरिहप्राह राजन् ! शिष्यो बृहस्पतेः ॥ 41 ॥

In Public domain. Digitization Muthulakshmi Research Academy

नूतनानिति हे राजन्! बृहतां वाचां पतिः तस्य बृहस्पतेस्सुरगुरोः (गणसूत्रं) **तद्बृहतोः करपत्योश्चोरदेवतयोः सुट् तलोपश्च** इत्यनेन बृहतस्तकारलोपे पतिशब्दस्य सुडागमे च कृते बृहस्पतिरितिरूपम्। तदुक्तं शिशुपालवधे **निशम्य ताश्शेषगवीरभिधातुमधोक्षजः शिष्याय बृहतां पत्युः प्रस्तावमदिशद्दृशा (2-68)** इति इह अमात्यनिर्णयप्रकरणे वातव्याधि-रुद्धवः श्रीकृष्णस्य मन्त्री तदुक्तं शिशुपालवधे **विवक्षितामर्थविदस्तत्क्षण प्रतिसंहृताम्। प्रापयन् पवनव्याधेर्गिरमुत्तरपक्षताम्। (2-15)** इति महीभृतः महीं बिभर्तीति महीभृत् राजा तस्य **(सू) क्विप्चेति** क्विप् नीतौ राजनीत्यां कुशलान् नूतनान् नव्यान् कार्यामात्यान् कर्तव्यानितिशेषः। प्राह ब्रवीति। कुलक्रमादागतानाममात्य पदव्यां स्थापने परिचयवशाद्राजविभवं राजवत्ते सर्वमप्यवष्टभ्याराजवत्ते व्यवहरेयुः। अतः कौणपदन्तमतं त्याज्यम्। राजनीतिविदो नूतनास्तु कार्यामात्यपदव्यां स्थापिताः राजानं यमवदुग्रदण्डं मन्यमानाः नापकुर्युरित्युद्धवस्य हृदयम्। अनुष्टप् छन्दः।

श्लो **स्वाम्यनुरागसमेतान् शुद्धान्वयसम्भवान्।**
शुचीन् प्राज्ञान् प्रोवाच बाहुदन्ती पुत्रो राज्ञः प्रभो! ॥ 42॥

स्वामीति प्रभो बाहुदन्तीपुत्रः इन्द्र इति कौटिलीयार्थशास्त्रव्याख्यायां नयचन्द्रिकायामुक्तम्। स्वामिनि अनुरागः भक्तिः तया समेतान्। शुद्धान्वयसम्भवान् शुचीन् उपधाशुद्धान्, स्वाम्यनुरागसमेतान् शुद्धान्वय सम्भवान् शुचीनित्यत्र **(सू) स्तोश्चुनाश्चुरिति श्चुत्वे शश्छोटीति**(८-४-४०) छत्वं च प्राज्ञान् प्रज्ञा मेधा विशेषः तत्सहितान् उत्साहशक्तियुतानित्यप्यूह्य राज्ञः क्रियामात्यान् कर्तव्यान् प्रोवाच सम्यगधीतनीतिशास्त्रोऽपि तदुक्तार्था-नुष्ठानविकलः कार्यामात्यकर्मणि सम्यङनिऽर्वहेत्। अत उद्धवमतं न ग्राह्यम् गुणानामेव प्राधान्यात् स्वामिभक्त्यादिस्वोक्तगुणान्वितानेव कार्यामात्यान् कुर्यादिति बाहुदन्ती पुत्रस्याशयः। आर्याभेदो गीतिर्वृत्तम्। लक्षणन्तूक्तम्।

In Public domain. Digitization Muthulakshmi Research Academy

श्लो दृष्ट्वा तत्तद्योग्यतापूर्वमुक्ता
नेतांत्सर्वान्देशकालानुपूरोधात् ।
कार्यामात्यान् भूपतेःकार्यसिद्ध्यै
कुर्याद्राजा मन्त्रिणो न प्रधानान् ॥ 43 ॥

इत्थं भरद्वाजविशालाक्षपराशरनारदकौणपदन्तवातव्याधि बाहुदन्ती पुत्रमतानि प्रदश्र्य कौटिल्यमतानुरोधेन कविस्स्वमतं **दृष्ट्वे**त्यादिना प्रतिपादयति। राजा तत्तद्योग्यताः सहाध्यायित्वगुह्यसधर्मत्व आपत्समुद्धारकत्व धनार्जकत्व विश्वसनीयकत्व राजनीति कुशलत्वभक्तिपरायणत्वादिरूपतत्वयोग्यताः दृष्ट्वा परिशील्य देशकालानुरोधात् यस्मिन्देशे यस्मिन्कालो यस्य कर्मणस्सुष्ठु निर्वहणे यो गुणोऽपेक्ष्यते तत्तद्गुणवन्तं तदानुकूलेन कार्यसिद्ध्यै पूर्वोक्तसहाध्यायिप्रभृतिषु मनश्शुद्ध्यादिगुणाः परिभवकरणादि दोषाश्च सन्तीति तेषामपरिहार्यत्वं प्रधानमन्त्रि पदव्यामस्थापनीयत्वञ्च इति कवेर्मतम्। शालिनीवृत्तम्। **शालिन्युक्ताम्तौतगौगोब्धिलोकैरिति** लक्षणात् ॥

प्रधानमन्त्री

पाज्ञो जानपदोविशुद्धकुलजो दक्षस्सु भावग्रहः
चक्षुष्मान्प्रतिपत्तिमान् श्रमसहोवाग्मी प्रगल्भश्शुचिः ।
सोत्साहो बलशीलसत्त्वसहितश्चारोग्यवान्भक्तिमान् -
शिल्पज्ञः प्रियदर्शनो जनपतेर्मन्त्री प्रधानःप्रभुः ॥ 44 ॥

तर्हि कीदृक्प्रधानामात्यः कार्य इत्यत्र **प्राज्ञ** इत्यादिना आह । प्राज्ञः सहजबुद्धिमान् इदमविस्मरणशीलत्वपदं वस्तु अत्रेति अधिकरणे (सू)**खनोघ** चेति घे कृते जनपद इति रूपम् जनपदो राष्ट्रम्। ततः तत्र भव इत्यणि जानपदः विजिगीषु राष्ट्रभव इत्यर्थः । (सू) **ननु खनो घ** चेति खन एव विहितोघः कथं पदधातोर्भवतीति चेत् स्वनोण्यतारितिकुत्वप्राप्ति

In Public domain. Digitization Muthulakshmi Research Academy

योग्यवर्णस्यैवाभावाद्यर्थं सत् खनोऽन्यत्रापि घो भवतीति ज्ञापयति तेन पदेरपि घस्सिध्यति ननु तर्हि (सू) **पुंसि किमर्थं सामर्थ्याश्रयणमिति न चोदितव्यम्**। अनेन सूत्रेण पुंसि घस्य विधानात् पदमिति नपुंसकलिङ्गशब्दस्य सिद्ध्यर्थं सामर्थ्याश्रयणस्यावश्यकत्वात्। भयलिङ्गभगपदानि नपुंसके इति लिङ्गानुशासनसूत्रात्पदशब्दस्य नपुंसकत्वम्। विशुध्दकुलजः निर्दोषवंश-सञ्जातः दक्षः क्षिप्रं कार्यकरणसमर्थः सुभावग्रहिः सुखेन अवग्रहीतुं प्रामादिका कार्यप्रवृत्तेर्निवारयितुं शक्यः चक्षुष्मान् चक्षुः नयनस्थानीयमर्थशास्त्रम् तद्वान् अर्थशास्त्राभिज्ञ इत्यर्थः प्रतिपत्तिमान् प्रतिपत्तिरिति कर्तव्यतानिश्चयः तद्वान् जितश्रमः वाग्मी युक्तियुक्तसम्भाषण- पटुः **वाचोयुक्तिपटुर्वाग्मीत्यमरः** वाचोवाग्मिनिरिति साधुः प्रगल्भः प्रौढमान् शुचिः चतुर्विधोपधाशुद्धः सोत्साहः उत्साहशक्तियुक्तः इदम्प्रभुमन्त्र शक्तिमत्वस्याप्युपलक्षणम्। बलं देहः शक्तिं शीलं सत्प्रवर्तनं सत्वं धैर्यं तैस्सहितः आरोग्यवान् निर्व्याधिः भक्तिमान् राज्ञि अविचाल्यं अनुरागयुक्तः शिल्पज्ञः शिल्पं गजाश्वारोहणरथचर्या युद्धायुधानां चतुष्षष्टिकलाकौशल्यादिकञ्जानातीति शिल्पज्ञः। ज्ञा अवबोधने इत्यस्मात् **आतोनुपसर्गे कः** इति कः **अन्त्यस्य** इति **चेत्यालोपे** च साधुः प्रियदर्शनं इष्टदर्शनः सौम्यदर्शन इति यावत्। च शब्दोऽनुक्तसमुच्चयार्थः तेनास्तम्भत्वाचापल्ययोरवैर- कर्तृत्वमैत्रत्वयोश्च सङ्ग्रहः। एतैः पञ्चविंशतिगुणैर्युक्तो जनपतेः प्रधानो मन्त्री कार्य इति शेषः। वृत्तम् शार्दूल विक्रीडितं वृत्तम्।

मध्यमाधममन्त्रिणौ

श्लो **एतस्योत्तममन्त्रिणो गुणगणात्पादोनतामाश्रिता**
दृष्टा यस्य गुणास्समाध्यमपदं मन्त्रे भवेत्प्रापितः।
अर्धोनत्वमुपागता गुणगणा यस्याऽभवन् वीक्षिता
स्तम्प्राज्ञाः प्रवदन्त्यमात्यमधमं भूमण्डालाधीश्वर! ॥45॥

In Public domain. Digitization Muthulakshmi Research Academy

एतस्येत्यादिना मध्यमाधममन्त्रिणस्स्वरूपमाह। उत्तममन्त्रिणः प्रधानमन्त्रिणः दृष्टाः वीक्षिताः प्रत्यक्षपरोक्षानुमानैः परीक्षिताः इत्युभयत्राप्यर्थः प्रधानमन्त्रिगुणेषु चतुर्थांशगुणहीनो मध्यमन्त्री कार्यः अर्धांशगुणहीनोऽधमामात्याः कार्य इत्याशयः। वृत्तं शार्दूल विक्रीडितं वृत्तम्।

मन्त्रिपरीक्षणम्

श्लो **तेषाञ्ज्ञानपदत्वं मवग्रहमत्यतः परीक्षेत।**

शास्त्रज्ञताञ्च शिल्पं राजन् विद्यात्समानविद्येभ्यः ॥ 46 ॥

तेषामित्यादि श्लोकषट्केन प्रधान मध्यमाधममन्त्रिणः जानपदत्वादिगुणपरीक्षासाधनान्याह। तेषमुत्तममध्यमाधममन्त्रिणाम्। जानपदत्वं अवग्रहं च आप्यतः आप्तुं विश्वसितुं योग्यः आप्यः तस्मात् विश्वासयोग्यजनात् यथा दृष्टार्थवादिरूपाप्तजनादित्यर्थः। परीक्षेत परीक्ष्य जानीयात्। शास्त्रज्ञतामर्थशास्त्राभिज्ञत्वम् शिल्पञ्च समानविद्येभ्यः तुल्यविद्याविद्भ्यः। विद्यात् जानीयात् जानपदावग्रहशिल्पशब्दा व्याख्याताः। वृत्तमार्याभेदो गीतिः॥

श्लो **आरम्भेषु कृतीनाम्प्रज्ञाञ्चधारयिष्णुत्वम्।**

वाग्मित्वम्प्रागल्भ्यं प्रतिभाञ्च क धाम भूपते! विद्यात् ॥ 47 ॥

आरम्भेष्विति क्रियन्त इति कृतयः(सू) **स्त्रियां क्तिन्** कृतीनां कर्मणां आरम्भेषु अनुष्ठानेषु प्रज्ञां त्रैकालिकीं धियम् दक्षस्य भावः दाक्ष्यमक्षिप्रकार्यकारित्वं दक्षशब्दात् (सू) **गुणवचनब्राह्मणादिभ्यः कर्मणि च**। ष्यञ् धारयिष्णुत्वं धारणशीलत्वम् अविस्मरणशीलत्वमित्यर्थः। तौदादिकाधृञ्वस्थान इत्यस्माद्धेतुमण्णित् ततः(सू) **णेश्छन्दसि तेष्णु** (सू)

In Public domain. Digitization Muthulakshmi Research Academy

अयामन्ताल्वाय्येत्विष्णुषु घ इत्यनेन णेरयादेशे धारयिष्णुरितिरूपम् । यद्यप्ययं छान्दसः क्वचिद्भाषायाम्प्रयुज्यते इति कैयटरीत्या साधुः । अत एवं **त्रियम्बकं संयमिनं ददर्शेति** कुमरसम्भवे कालिदासः जगत्प्रभोरप्रभविष्णुवैष्णवमितिमाघः विष्णुना प्रभविष्णुना भ्राजिष्णुना लोहितचन्दने नेत्यादयोन्येषां प्रयोगाश्च साधवः । कथासु प्रसङ्गेषु वाग्मित्वं प्रागल्भ्यं प्रतिभां नवनवोन्मेषशालिनीम्प्रज्ञां विद्यात् परीक्ष्य जानीयात् । वृत्तमार्याभेदो गीतिः ॥

श्लो **आपद्यदि जानीयातेशसहत्वं प्रभावमुत्साहम् ।**
संव्यवहाराच्छौचं मैत्नत्वं भक्तिमत्त्वमपि राजन् ॥ 48 ॥

आपदीति आपदि आपत्काले क्लेशसहत्वञ्जितश्रमत्वम् भवत्सनेनेति भावः **श्रेणीभुवोनुपसर्गे** इति घञ् प्रकृष्टो भावः "प्रभावमगतिप्रादय" इति समासः तं प्रभावं प्रभुशक्तिं **शक्तय स्तिस्त्रः प्रभावोत्साहमन्त्रजा** इत्यमरकोशः । दण्डबलं प्रभुशक्तिरित्यभियुक्ताः, उत्साहं उत्साहशक्तिम् उत्पूर्वात् षह मर्षण इत्यस्मात् हिलश्चेत् घञ् विक्रमबलमुत्साह शक्तिरित्यभियुक्ताः अभिजानीयात्। परीक्ष्य जानीयात् शौचं चतुर्विधोपधा शुद्धत्वम् मैत्रत्वं सर्वत्रस्निग्धव्यवहारत्वम् भक्तिमत्त्वमपि राज्ञि अविचाल्यं अनुरागयुक्तत्वञ्च संवव्यवहारात् सम्यगाभरणात् अभिजानीयादिति सम्बन्धनीयः । वृत्तमार्याभेदो गीतिः ।

श्लो **अस्तम्भमचापल्यं शीलबलारोग्यसत्त्वयोगं च ।**
विद्यात्संवासिभ्यो रत्नाकरमेखलातलाधिपते ॥ 49 ॥

अस्तम्भमिति रत्नानामाकरः मेखला रशना यस्यास्सा रत्नाकरमेखला भूमिः मुखं गतिं लातेति मेखला (सू) **आतोऽनुपसर्गे कः अदन्तत्वाट्टाप् पृषोदरादित्वादस्य एत्वम्** । (नि) **स्त्रीकट्यां मेखला काञ्ची सप्त-**

In Public domain. Digitization Muthulakshmi Research Academy

कीरशनेत्यमरः तलस्या अधिपतिः भूपते इत्यर्थः अस्तम्भं गर्वराहित्यम्। आचापल्यं स्थिरप्रकृतितत्वम्। शीलस्य बलस्य आरोग्यस्य सत्वस्य च योगः संयोगः शीलबलारोग्यसत्वयोगः तम्। शीलादयो व्याख्याताः। संवासिभ्यः सहवासिजनेभ्यः विद्यात् जानीयात्। वृत्तमार्याभेदो गीतिः।

श्लो **प्रियदर्शनतां वैरस्याकर्तृत्वञ्च भूमीन्द्रः।**
प्रत्यक्षं जानीयाद्राजनयज्ञाः प्रभो इति ब्रुवते ॥ 50 ॥

प्रियेत्यादि हे प्रभो ! भूमीन्द्रो राजा प्रियदर्शनतां इष्टदर्शनत्वम् वैरस्या स्त्री भूम्यादिनिमित्तस्य विरोधस्य अकर्तृत्वमनुत्पादकत्वं शामकत्वञ्च प्रत्यक्षं स्वयं दृष्ट्वा जानीयादिति राजनयज्ञाः राजनीतिविदः ब्रुवते वदन्ति प्रभो इतीत्यत्र, **"सम्बुद्धौ शाकल्यस्येतावनार्षे"** इति प्रगृह्यसंज्ञायां **"प्लुतप्रगृह्य अचिनित्यमिति"** प्रकृतिभावः। वृत्तन्तु आर्याभेदः उद्गीतिः।

लक्षणन्तु आर्याशकलद्वितय व्यत्ययरचितम्भवेद्यस्याः।
सोद्गीतिः किल कथिता तद्वद्यत्यंश भेदसंयुक्ता इति वृत्तरत्नाकरे ॥

श्लो **प्रत्यक्षेण परोक्षेणाऽप्यनुमानेन भूपते !।**
त्रितयेन प्रमाणानां राजवृत्तेर्विनिर्णयः ॥ 51 ॥

प्रत्यक्षेणेति भूपते राजन् प्रत्यक्षेण स्वयं दृष्टं प्रत्यक्षम्, तेन परोक्षेण परैराप्तैर्यथादृष्टवादिभिरुक्तम्। परोक्षं तेन अनुमानेन अनुष्ठितकर्मांशेन करिष्यमाणकर्मांशपरिणामस्योत्प्रेक्षणमनुमानम्, तेन एतद्रूपेणेतिशेषः प्रमाणानां प्रत्यक्षपरोक्षानुमानानां तत्र येन त्रयेणात्र योऽयवये **अस्य बृहस्यति** त्रयम् तेन तिशब्दात् संख्याया अवयवे तयप् इति तयपि त्रितयशब्दस्साधुः राजवृत्तेः दण्डनीतिप्रतिपाद्यस्य राजव्यवहारस्य निर्णयो विशेषेण निर्णयः कार्य इत्यध्याहारः। राजकार्याणि नाम बहूनि बहुविधानि बहुप्रदेशस्थानि भवन्ति। क्वचित्तानसव्यः कार्याणि न भवन्ति। अतस्तानि सर्वाणि साक्षादेव

In Public domain. Digitization Muthulakshmi Research Academy

राज्ञा स्वयमनुष्ठातुं न शक्यन्ते यथादेशकालं तेषामनुष्ठानायावश्यम्परीक्षितगुणा अमात्या नियोज्याः एवञ्च कार्याणि सम्यक्कृतानि सिद्धानि च भवन्ति। अतः प्रत्यक्षानुमानयोरिव परोक्षस्याऽपि प्रामाण्यमवश्यमङ्गीकरणीयमित्याशयः। वृत्तमनुष्टुप्।

श्लो **आधाय पूर्वमधिकारपदेष्वमात्यान्**
साधारणेषु नृपतिः परिशोधयेत्तान्।
शुद्धिर्नचे द्गुणगणा विफलास्समस्ता
विद्या यथाजनवरेण्य! नयच्युतानाम् ॥ 52 ॥

आधायेति जनवरेण्य जनश्रेष्ठ! नृपतिः राजा अमात्यान् पूर्वं प्रथमं। साधारणेषु अप्रधानेषु अधिकारपदेषु अधिकारस्थानेषु आदाय संस्थाप्य तान् अमात्यान् परिशोधयेत्। उपधाभिरित्यादिः शुद्धिः तेषामुपधाशुध्दत्वं न चेत् समस्तास्सर्वे गुणगणा नयच्युतानां नीतिभ्रष्टानां विद्यया इव निष्फलाः। विदुषां नीतिमत्त्वमिव अमात्यनामुपधाशुद्धत्वमत्यावश्यकमित्याशयः। वसन्ततिलकावृत्तम्। **उक्ता वसन्ततिलका तभजा जगौ गः** इति लक्षणात्।

श्लो **एकैकस्यां शुध्दिं प्राप्तानुपधा चतुष्टये राजन्।**
विनियोजयेदमात्यां स्तत्तद्योग्यक्रियासु राजेन्द्रः ॥ 53 ॥

एकैकस्यामिति हे राजन्! राजेन्द्र विजिगीषुः उपधाचतुष्टये उपधानां धर्मार्थकामोभयरूपाणां बलानाम् चतुष्टयं तस्मिन् तत्परः अवयवा अस्य बृन्दस्येति चतुष्टयं संख्याया अवयवेङ्गिति चतुश्शब्दात् (सू) **आदेशप्रत्यययोरिति सस्य षत्वम्** एकैकस्याम् उपधासु चतुर्विधासु एकस्यामेकस्याम् (सू) **नित्यवीप्सयोरिति** वीप्सायाः द्विर्भावः व्याप्ति प्रतिपिपादयिषा वीप्सा शब्दार्थः (सू) **एकं बहुव्रीहिवदिति** बहुव्रीहिवद्भावात्सुब्लोपः पूर्वभागस्य पुंवद्भावः समुदायस्य प्रातिपदिकत्वं ततस्सुप्च(सू) न

In Public domain. Digitization Muthulakshmi Research Academy

बहुव्रीहिः इति सर्वनामसंज्ञा निषेधस्तु तस्य सूत्रस्य भाष्यमते प्रत्याख्यानान्नभवति सूत्रकारमतेऽपि तत्सूत्रमलौकिकविग्रहवाक्ये बहुव्रीह्यर्थके निषेधकं न तु बहुव्रीहाविति दीक्षितचरणाः शुद्धिं शौचं प्राप्तान् परीक्षितानित्यर्थः। अमात्यान् तत्तद्योग्यक्रियासु तेषां तेषां योग्यायाः क्रियास्तासु विनियोजयेत् नियुञ्ज्यात्। नत्वपरोक्षितान् अनेन जानपदत्वादि-गुणेषु सत्स्वपि उपधाशुद्धिहीनममात्यपदव्यां न स्थापयेदित्युक्तं भवति। उपधाशुद्धिप्रकार उत्तरश्लोकव्याख्याने विव्रियते धर्मच्छलशुध्दानमात्यान् धर्मस्थापनानुबन्धिषु कर्मसु कण्टकशोधनेषु च अर्थच्छलशुद्धान् धनसम्पादनादि लक्षणेषु धनरक्षणलक्षणेषु च कर्मसु कामच्छलशुद्धान् भोगिन्यादीनामन्तः पुरस्त्रीणाञ्चरक्षणकर्मसु भयच्छलशुध्दान् इप् **ञप्** शरावरक्षणादिकर्मसु च विनियोजयेत् । वृत्तमार्याभेदो गीतिः।

श्लो **सर्वोपधाविशुद्धं कुर्यात्सचिवम्प्रधानमविशुद्धान् ।**
तमसाद्यकर्मकारान्कुर्यादाचार्य मतदृशा राजन् ॥ 54 ॥

सर्वोपधेतानि हे राजन्! राजेति शेषः आचार्याणामर्थ-शास्त्राचार्याणाम् मतमाशयाः तस्य दृशा परिशीलनेन सर्वाश्चता ता उपधा सर्वोपधाः पूर्वश्लोकव्याख्यानविवृताः धर्मोपधायाः ताभिर्विशुध्दः तं प्रधानं मुख्यं सचिवं मन्त्रिणम् । (नि) **मन्त्री सहायस्सचिवः** इत्यमरः कुर्यात् उपधाशुद्धिप्रकारो यथा धर्मप्रधानपुरुषशोधनोद्युक्तो राजा पुरोहितकृत्येषु प्रवृत्तं पुरोहितमयाज्ययाजनाद्यधर्मकार्येषु नियोज्य तदसहिष्णुं तं स्वस्थाना च्यावमेत् स्थानच्युतस्सपुरोहितस्सत्रिमुखेन शपथपूर्वमेकैक ममात्यमधर्म-प्रवृत्तोऽयं राजा अतः एतद्राजकुलोत्पन्नमन्यं वा, एतत्पुत्रादिकं राज्यार्हं वंशोद्भवमितरं वा, सर्वजनपूजितमन्यं वा, सामन्तराजं वा, अटवीपतिं वा, अस्माभिस्सर्वैरपि सम्भूय निर्णेयं पुरुषं वा धार्मिकमस्य राज्ञः स्थाने

In Public domain. Digitization Muthulakshmi Research Academy

नियोजयामः एतदितरमन्त्रिणां सर्वेषामपि सम्मतं कस्तवाशय इत्युपजापयेत्। यस्त्वित्थं भेदितोऽमात्यो नाहमेतादृशं कर्म कुर्यामितीरस्येत् स शुद्धः। तं धर्मस्थापनानुबन्धिषु च समवाये इत्यस्मात् (सू) **सर्वधातुभ्य इन्** इत्यौणादिक इन् सचिं वातीति सचिवः वा गतिगन्धयोरिति धातोः **आतोनुपसर्गे कः** इति के अलोपे च कृते सचिव इति रूपम्। अधीतसामुद्रवनीकरणेन्द्रजालस्मृति निमित्तपक्षिशस्तरादयो देशसञ्चारिणो गूढचारविशेषास्सत्रिणः तन्मुखेन कर्मसु कण्टकशोधनेषु च नियोजयेत्। अर्धप्रधानपुरुष शोधनोद्युक्तो राजा सेनापतिः पूज्यस्य पूजने नियोजयेत्। तदसहिष्णुं सेनापतिमर्थमानाभ्यां हापयेत् परिभूतस्ससेनापतिस्सत्रिमुखेन शपथपूर्वं लाभयेत् यस्त्वित्थं भेदितो निरस्येत्सु शुध्दः तं धनसम्पादनरक्षणलक्षणेषु कर्मसु नियोजयेत्। कामप्रधानपुरुषशोधनोद्युक्तो राजा अन्तःपुरोपलब्धि विश्वासया राजमहिषीभिः पूजितया परिव्राजकया एकैकममात्यः राजमहिषी त्वां कामयते। समागमोपायश्च कल्पितः। तवार्थलाभोऽपि महाविष्यतेत्युपजापयेत्। यस्त्वित्थमुपजापितो नाङ्गीकरोति सशुद्धः तं भोगिन्यादीनामन्तःपुरस्त्रीणां च रक्षणादिकर्मसु नियोजयेत्। भयप्रधानपुरुषशोधनोद्युक्तो राजा जलस्थलयात्राक्रीडोद्यान भोजनादि(रूप) गोष्ठे कौतुकाहूता न्यमन्त्रिणं मन्त्रिणमसहमान इतरामात्यैस्साकमर्दमान - पहाराङ्गिनाऽपकुर्यात्। राज्ञा पूर्वमपकृत श्छात्र एकैकममात्यम-सत्कार्यप्रवृत्तोऽयं राजा एवं वा त्वाऽन्यमस्य स्थाने स्थापयामः। अन्येषां सर्वेषां मन्त्रिणामिदं रोचते कस्तवाशय इति राजसकाशाद्भेदयेत्। यस्त्वित्थमुपजापितोन्नानुमनुते। स शुद्धः तं शरीररक्षणादिकर्मसु विनियोजयेत् विशुद्धाः न भवन्तीत्यविशुद्धाः तान् उक्तोपधाशुद्धिरहितान्पूर्वोक्तगुणसमेतान् पुरुषानितिशेषः तनुसाध्यकर्मकारान् शरीरायससाध्यकार्यकर्तॄन् कुर्यात्। वृत्तमार्या भेदो गीतिः।

In Public domain. Digitization Muthulakshmi Research Academy

श्लो **लक्ष्यं कृत्वा बाह्यं चतसृषु मृगयेत**
नृपतिरुपधासु अयमेवाध्यापकाध्येतृवृत्तिः।
कापटिकाख्याचारविशेषःसत्रिभिरमात्य
शौचाशौचे कौटिल्यमतदृशा राजन् ॥ 55 ॥

अमात्यशुद्धिपरीक्षणे आचार्यमतमभिधाय " लक्ष्यं कृत्वे" त्यादिना कौटिल्यमतमाह। नृपतिः कौटिल्यमतदृशा कूटो घटः तं धान्यपूर्णं लान्ति सङ्गृह्णन्तीति कुटलाः कुम्भीधान्या इत्यर्थः। कुम्भीधान्याः कसूलधान्यो वा अश्वस्तनिक एव नेति मनुः " कुम्भीधान्याः"अलोलुपा इति शिष्टलक्षणम्। कुटलानां गोत्रापत्यं कौटिल्यः गर्गादिभ्यो यञिति यञ् तस्य मतानुसारेण चतुसृषु उपधासु पूर्वोक्तासु बाह्यं बहिरङ्गमेव राजा महिषीचान्तरङ्गे तयोर्भिन्नं बहिरङ्गं तत् लक्ष्यं कृत्वा सत्रिभिरधीत सामुद्रिकवशीकरणेन्द्रजालस्मृति निमित्तपक्षिशास्त्रादिकाः देशसञ्चारिणी गूढचारविशेषाः सत्रिणः तैः अमात्यशौचे अमात्यानां शौचं राज्ञि अदुष्टभावत्वम्। अशौचं राज्ञि दुष्टभावत्वञ्च मृगयेत अन्विष्येत्। मृग अन्वेषणे इत्यर्थेच्चेरादिका-दगर्वीयादिलिङ्गकवचनम्। कौटिल्यमते इदमाकूतम्। अमात्य शौचाशौच-परीक्षणे राजस्वमहिषीमात्मानं च नैव विषयं कुर्यात् । यदि कदाचिद-दृष्टोऽप्युपधावशाद्दुष्ट स्वान्तो भवेत्तदासोऽशक्य प्रतिकारमुपकारं कुर्यात्। अतोऽन्तरङ्गं लक्ष्यं विहाय बहिरङ्गमेव लक्ष्यमाश्रयेदिति। वृत्तमार्याभेदो गीतिः।

<u>पुरोहितः</u>

श्लो **जातोविप्रकुलेषडङ्गसहिते वेदे च दैवे क्षमो**
हर्तादैवमनुष्यजातविपदां मन्त्रैरुपायैरपि ।
सच्छीलोऽपि च दण्डनीतिकुशलस्संस्थापनीयः
पुमान्राज्ञा धर्मविदा पुरोहितपदे विश्वम्भराधीश्वर ॥ 56 ॥

In Public domain. Digitization Muthulakshmi Research Academy

दैविकमानुषिकपदां वारकत्वादलब्धलाभसम्पादकत्वात्सर्वकार्येषु प्रमाणत्वाच्चावश्यग्राह्यपुरोहितस्वरूपं **जात** इत्यादिना आह। विश्वं बिभर्तीति विश्वम्भरा पृथिवी डुभृञ् भरणे इत्यस्मात् **संज्ञा भूभृतृवृजिधारिसहितपिदमः(३-२-४६) इति खच् अरुर्द्विषदजन्तस्य** (६-३-६) इति मुम् (नि)**विश्वम्भरोऽच्यते शक्रे पुंसि विश्वम्भरा भुवु** इति मेदिनी **रसाविश्वम्भरास्थिरा धराधरित्रीत्यम**रः। तस्याम् अधीश्वरः प्रभाः तस्य सम्बुद्धिः विश्वम्भराधीश्वर! धर्मं वेत्तीति धर्मवित् तेन (सू)**सत्सूद्विषद्रुहदुहयुज विदभिदबच्छिदजिनीराजामुपसर्गेऽपि क्विप् (3-2-61)** इति क्विप् राज्ञा विप्रकुले जातः षडङ्गानि शिक्षाव्याकरणच्छन्दोनिरुक्तज्योतिषकल्पाख्यानि तैः सहिते वेदे, दैवे, पूर्वजन्मकर्मपरिपाकलक्षण दैवप्रतिपादके ज्योतिश्शास्त्रे च क्षमः शक्तः पण्डित इत्यर्थः। (नि) **क्षमा तितिक्षा पृथ्वी च योग्ये शक्ते हिते क्षममिति** धरणिः देवादागतं दैवम् (सू)**तत आगत** इत्यण् प्राक्तनशुभाशुभकर्मत्वेन मनुष्यैश्च मनोर्जातवञ्ञतेषु क्क इति मनुष्यशब्दसिद्धिः जाताः विपदः तासां मन्त्रैः अथर्ववेदमन्त्रजपैः उपायैः सामदानभेददण्डैरपि हर्ता सति योग्यशीलमस्य सच्छीलः अपि च दण्डनीति कुशलः, राजनीतिनिपुणः पुमान् पुरः अग्रे दीयते सर्वकार्येषु प्रमाणत्वेन स्थाप्यत इति पुरोहितः तस्य पदं स्थानं तस्मिन् संस्थापनीयः स्थाप्य इति पुरोहितः। वृत्तं शार्दूल विक्रीडितम् लक्षणमुक्तम्॥

श्लो **अनुवर्तेत पुरोहितमवनिपतिः स्वामिनं यथा भृत्यः।**
गुरुमिव शिष्यः पितरं पुत्र इव क्ष्मातलाधिपते! ॥ 57 ॥

अनुवर्तेतेत्यादिना राज्ञः पूर्वोक्तगुणगणसहितस्य अनुवर्तनप्रकारामह। अवनिपतिः राजा स्वामिनं प्रभुम्। (सू) **स्वामिन्नैश्वर्ये** इति ऐश्वर्य वाचकात्स्वशब्दान्मत्वर्थे आमिनच् प्रत्यये स्वामिन्शब्दस्साधुः। भ्रियत इति

In Public domain. Digitization Muthulakshmi Research Academy

भृत्यदासः(नि) **नि भृत्योदासे द्वयोः स्त्रियां भृत्यस्याद्वैतने** इति केशवः डुभृञ् भरणे इत्यस्मात्कर्मणि (सू) **भृञोऽसंज्ञायामिति** क्यप् (सू) **ह्रस्वस्य पितिकृति तुगितितुक् यथा इव** (नि) **ववा यथातथेवैवं साम्येत्यमरः.** गृणात्युपदिशतीति गुरुः। तम् ग्रूनि इत्यस्मात् (सू) **कृग्रोरुच्च** इत्यौणादिकः कुप्रत्ययः उश्चान्तदेशः रपरत्वञ्च (नि) **गुरुर्बृहस्पतौ बुध्दमुनौ पित्रादिके तथा पुरोहिते च गोधूमेऽप्युनीत्यादिकारिणि इति** केशवः। शिष्यते गुरुभिरनुशास्यत इति शिष्यः शासु अनुशिष्टाविति धातोः (सू) **एतिस्तु शास्वृदृजुषःक्यप्** (सू) शास इदङ्हलोः इतीतत्वे (सू) **शासिवसिवसीनाञ्चेति षत्वम्** । (नि) **छात्रान्तेवासिना शिष्ये** इत्यमरः।शिष्य इव छात्र इव पाति दक्षतीति पिता जनकः तं पितरम् (नि) **तातस्तु जनकः पितेत्यमरः**(सू)**नप्तृनेष्टुत्वष्टुहोतृ पोतृजामातृमातृपितृदुहितृ** इत्युणादिसूत्रे निपातनात्साधुः।पुत्र इव तनय इव पुनातीति पुत्रः। (सू) **सुपीतियोगविभागात्त्रायते कः** पुन्नाम्नोनरकाद्यस्मात्पितरं त्रायते सुतः।तस्मात्पुत्र इति प्रोक्तः। स्वयमेव स्वयम्भुवा इति मनुः अनुवर्तेत अनुसरेत्। आर्यावृत्तं लक्षणन्तूक्तम् ॥

श्लो **वृध्दिं साधुपुरोहितेन गमितं संरक्षितं मन्त्रिणा**
शास्त्रेणैव च शस्त्रितं विजयते क्षत्रं महीमण्डले ।
केतक्याः कुसुमं यथामधुलिहस्तस्मिन्निधातुं पुन-
स्सर्वे बिभ्यति शात्रवाः प्रतिपदं सर्वं सहावल्लभ!! ॥ 58 ॥

इति श्री चिदम्बरकविकृते राजधर्मे प्रथमसर्गः।

वृद्धिमिति सर्वं सहा इति सर्वं सहा भूमिः **षह मर्षणे** इत्यस्मात् (सू)**पूःसर्वयोर्दारिसहो इति खच् अरुर्द्विषदजन्तस्यमुम्** इति मूम् **सर्वं सहावसुमतीत्यमरः** तस्याः वल्लभनाथेति सम्बुद्धिः पुरोहितेन पूर्वोक्तगुणेनेत्यादिः साधु सम्यक् वृद्धिं गमितं प्रापितम् मन्त्रिणा प्रधानसचिवेन संरक्षितम्। शास्त्रेणैव दण्डनीतिशास्त्रोक्तार्था न्नृप्रोनैनेव

In Public domain. Digitization Muthulakshmi Research Academy

निर्णयःशास्त्रितं सञ्जातं शस्त्रम् ।(सू) तदस्य सञ्जातं **तारकादिभ्य इतच्** इतीतच् शास्त्रैणैवेत्येवकारेण दण्डनीतिशास्त्रोक्तानुनातिरिक्तशस्त्रा-नपेक्षित्वं सूचितं । क्षत्रं क्षत्रियकुलम् क्षणु हिंसायामित्यस्मात् **सम्पदादिभ्यः क्विप्** बिति क्विपि गमादीनामिति वक्तव्यमित्यनुनासिकलोपे **ह्रस्वस्य पिति कृति तुक्** तुकि च कृते क्षदिति रूपं क्षतः हिंसायाः त्रायत इति क्षत्रम्। (सू)**सुपिष्ठु** इत्यत्र सुपीतियोगविभागत्कः यद्वा क्षद संवरणे इत्यस्मात् सौत्रधातोः (सू)**सर्वधातुभ्यः ष्ट्रन्** इत्येणादिकः ष्ट्रन् अथवा क्षणुहिंसायमित्यतः क्त प्रत्यये (सू)**अनुदात्तोपदेशवनतितनोत्यादीनामनुनासिकलोपो झलि ङ्किति** इत्यनुनासिकलोपे क्षतमिति रूपम् । क्षतात्त्रायत इति क्षत्रम् । (सू) **आतोऽनुपसर्गे कः** इति पृषोदरादित्वादकारलोपः। "**ब्राह्मणानां क्षतात्त्राणात्ततःक्षत्रिय उच्यते**" इति महाभारते तथा च कालिदासः **क्षतात्किलत्रायत इत्युदग्रः क्षत्रस्य शब्दो भुवनेषु रूढः** । (रघु २-५३) महीमण्डले भूमण्डले विजयते सर्वोत्कर्षेण वर्तते अवर्तत वर्तिष्यते च(सू) **विपराभ्यां जेरित्यात्मनेपदम्** (सू)**वर्तमानसामीप्ये वर्तमानवद्वेति वर्तमाने लट्** किञ्च सर्वे शात्रवाः रिपवः शत्रव एव शात्रवाः (सू)**प्रज्ञादिभ्य श्चेति स्वार्थेऽण्** तत् क्षत्रम्। सन्निधातुं समीपं प्राप्तुं केतक्याः तृणद्रुमविशेषस्य कितनिवासे इत्यस्मात् (सू)**ण्वुल् तृचा विति ण्वुलि** गौरादित्वात् ङीषि केतकीति रूपम् । **कुसुमं सुमम् मधुपुष्परसम्(नि) मधुमध्ये पुष्परसे क्षौद्रेऽपीत्य**मरः लिहन्तीति मधुलिहः भृङ्गाः यथा इव लिह आस्वादने इत्यस्मात् क्विप् चेति क्विप् **मधुव्रतोमधुकरो मधुलिण्मधुपालिनः** इत्यमरः पदं पदम्प्रति प्रतिपदम् अव्ययीभावः। योग्यतावीप्सापदार्थानतिवृत्ति सादृश्यानि यथार्था इत्युक्तेः त्रस्यन्तीति ञिभी भये इत्यतः जुहोत्यादिकात् लटि प्रथमपुरुषबहुवचनं **श्लाविति** द्वित्वम् । **अदभ्यस्तादित्यत् झोऽन्त** इत्यस्यापवादः यणादेशः परिमलयुतस्यापि केतकीकुसुमस्य

In Public domain. Digitization Muthulakshmi Research Academy

कण्टकावृतत्वाद्यथा भ्रमरास्समीपगमने प्रतिपदं त्रस्यन्ति तथा पुरोहितमन्त्रिदण्डनीतिरक्षितं क्षत्रं रिपवस्सन्निधातुं बिभ्यतीत्युपमालङ्कारः। वृत्तं शार्दूलम् ॥

इति श्री भारद्वाजसगोत्र कनकाम्बा सीतारामतनूभव श्रीचिदम्बरकवीन्द्रानुजसंस्कृतान्ध्रभाषाविशारद अभिनवनन्नपार्य भिरुद-भासुर विश्वेश्वरसुधीवरविरचितायां राजधर्मव्याख्यायां जयाख्यायां प्रथमसर्गः ॥

In Public domain. Digitization Muthulakshmi Research Academy

द्वितीयसर्गः

मन्त्राधिकारः

श्लो **सर्वारम्भा मन्त्रमूला मता य**
त्तस्मात्कुर्यान्मन्त्रणादौ क्रियाणाम् ।
गुप्तो मन्त्रो न प्रकाशो यथा स्या-
द्राजा कुर्यात्सर्वथा राजमौले! ॥ 1 ॥

प्रथमसर्गे सर्वोपधाशुद्धो मन्त्री कार्य इत्युक्तम् । तत्रापेक्षितं मन्त्रस्वरूपोत्पादकं सर्वारम्भा इत्यादिना आह। राजमौले! यत् यस्मात् आरम्भणान्यारम्भाः कार्योपक्रमाः आङ्पूर्वकाद्रभ राभस्ये इत्यतः(सू) **भावे इति (सू)घञि रभेरशब्लिटोरिति** नुम् । सर्वे च ते आरम्भाश्च सर्वारम्भाः **प्रथमस्यादुपक्रमः स्यादख्यादानमुद्धात आरम्भः** इत्यमरः। मन्त्रमूलाः मन्त्र्यत इति मन्त्रः रहस्यभाषणं मत्रि गुह्यभाषण इति धातोः कर्मणि **अकर्तरि च कारके संज्ञायामिति** घञ् **"निमन्त्रो वेदविशेषेस्यार्थे वादीनाञ्चसाधने गुह्यवादेऽपि पुमान्"** इति मेदिनी। मूलं प्रथमः येषान्ते मन्त्रमूलाः मूलतीति मूलम्। मूल प्रतिष्ठायामिति धातोः **इगुपधज्ञाप्रीकिर** इति कः मूलमध्ये शिषाभंयोरित्यमरः मताः लोक विदां अर्थशास्त्रविदां च सम्मतोः तस्मात् क्रियाणां कार्याणाम् आदौ मन्त्रं कुर्यादित्यन्वयः प्रथमं मन्त्रःततः कार्यारम्भ इत्येष क्रमः लोके नियतः स एव च क्रमोऽत्रार्थशास्त्रेऽप्याश्रीयत इति भावः। गुप्तः रक्षितः मन्त्रः मन्त्रितो मन्त्रः प्रकाशः स्फुटः(नि) **"प्रकाशोऽतिप्रसिद्धे स्यात्प्रहासातपयोः स्फुटे"** इति विश्वः यथा न स्यात् राजा तथा इति शेषः सर्वथा सर्वप्रकारैः प्रकारवचने लृ धाथा इति थल् कुर्यात्। मन्त्रस्य प्राकाश्ये बहवो दोषा भवन्तीत्याशयः वृत्तं शालिनी। **शालिन्युक्ताम्तगौगोऽब्धिलोकै रितिलक्षणात् ।**

In Public domain. Digitization Muthulakshmi Research Academy

श्लो **पञ्चाङ्गविहीनश्चेन्मन्त्रो न कदाऽपि सिद्धिमभ्येति ।**
तस्मात्पञ्चाङ्ग्युतं मन्त्रं कुर्वीत जनपती राजन् ॥ 2 ॥

पञ्चाङ्गेत्यादिना मन्त्रस्य पञ्चाङ्गसाहित्यमावश्यकमित्याह। मन्त्रः पञ्चानामङ्गानां समाहारः पञ्चाङ्गं **तद्धितार्थोत्तरपदसमाहारे** चेति समाहारे द्विगुः (सू)**द्विगुरेकवचनम्** इत्येकवत्त्वम् **(2-4-1)**। (सू) **स नपुंसकमिति (2-4-17)** नपुंसकत्वञ्च तेन विहीनः पञ्चाङ्गविहीनः चेत्यादि कदापि सिद्धिं न अभ्येति प्राप्नोति। तस्मात् राजन् जनपतिः प्रभुः मन्त्रम् पञ्चाङ्ग्युतं कुर्वीत कर्मणामारम्भोपायः पुरुषद्रव्यसम्पत् देशकालविभागः विनिपातप्रतीकारः कार्यसिद्धिश्चेति मन्त्रस्य पञ्चाङ्गानि, तेषां स्वरूपं यथा विजिगीषुः विषये दुर्गादिनिर्माणं लक्षणानि शत्रुविषयं दुर्गादिनिर्माणकुशलाः तक्षायस्कारादयः पुरुषाःविशालपत्रयुतानि दारव्यवृक्षादीनि द्रव्यानि शत्रुविषये सन्धि विग्रहाद्यनुष्ठाननिपुणाधूतसेनापतिप्रभृतयः पुरुषाः रत्नस्वर्णादीनि द्रव्याणि तेषां सम्पत्गुणवत्वं समृद्धिश्च स्व विषये ये दुर्गाद्यारम्भे जनपदमध्यान्तादिः अनूपादिश्च देशः सुभिक्षदुर्भिक्षादिर्वसन्तादिश्च कालः शत्रुविषये सन्धि-विग्रहादौ महाफलभूम्यादिर्देशः अभियोगानभियोगाद्यवस्थाकालः तयोर्देश-कालयोर्विभागो विवेकः विनिपातप्रतीकारः। विनिपातो नाम दुर्गनिर्माणादेः सन्धिपुरुषप्रेषणादेश्च विघ्नः तस्य प्रतीकारः प्रशमनं । कार्यसिध्दिः क्षयः स्थानं वृद्धिश्चेति त्रिविधं कर्मफलम्। क्षयो नामापचयः वृध्दिरुपचयः स्थानमुपचय-पत्यराहित्यम्। एतादृशपञ्चाङ्गसमेत एव मन्त्रः सेत्स्यति। तत स्सएवा-श्रयणीय इति तात्पर्यम्। जनपती राजन् इत्यत्र ससजुषोरुरितिरुत्वम् रोरि (८-३-१४) इति रेफस्य लोपः ढ्रलोप पूर्वस्यदीर्घोऽणः (६-३-११) इतीकारस्य दीर्घः। वृत्तं गीतिः।

In Public domain. Digitization Muthulakshmi Research Academy

श्लो **मन्त्रस्य भङ्गे सकलस्य भङ्गो**
भवेत्ततो भूपतिरेक एव ।
सम्मन्त्रयेतेत्यवदन्महात्मा
पुरा भरद्वाजमुनिर्नरेन्द्र ॥ 3 ॥

मन्त्रणं कियद्भिः कार्यमित्यत्र भारद्वाजादीनामर्थशास्त्रकर्तॄणां मतानि मन्त्रस्येत्यादिभिष्षड्भिः श्लोकैः प्रदर्शयति। नरेन्द्र महान् पूज्यः आत्मा स्वभावः यस्य सः यद्वा महान् आत्मा शास्त्रज्ञानं यस्य सः महात्मा । **(सू)आन्महतस्समानाधिकरणजातीययोरित्यात्त्वम्** (नि)**आत्मार्कचन्द्र - वाताग्नि जीवेषु परमात्मनि** (नि) **देहे यत्नेधृतौ कीर्तौ बुद्धौ मनसि च श्रुते। धर्मे स्वभावे पुत्रेऽर्थे परस्य प्रतियोगिनि** इति केशवः। भरद्वाजमुनिः बृहस्पतिपुत्रो भरद्वाजनामा मुनिः(नि) **भरद्वाजगुरोः पुत्रे व्याघ्राटाख्य विहङ्गमे इति मेदिनी** । मन्त्रस्य पूर्वोक्तपञ्चाङ्गसमेतस्य मन्त्रस्य भङ्गे भञ्जने भेदे सति। **भङ्गस्तु नातरङ्गेस्याद्भञ्जने च स्त्रियाम्पुनः । मातुलान्याह्वये धान्ये भङ्गौ** इति केशवः। **भङ्गस्तरङ्गे भेदे च रुग्विशेषे पराजये । शौटिल्ये भयविच्छित्त्यो रितिहैमश्च,** सकलस्य राज्ञः तदायत्तादीनाञ्च भङ्गः विच्छित्तिः भवेत्ततः तस्मात् भूपतिः राजा एकः एकाकी एव सम्मन्त्रयेत सम्यङ्मन्त्रणं कुर्यात् । इति पुरा पूर्वकाले अवदत् अब्रवीत् । वद व्यक्तायां वाचीत्यस्माल्लङि प्रथमपुरुषैकवचनम्। भरद्वाजस्यत्वयमाशयः राजा रहस्यं यद्येकेनाऽपि मन्त्रिणा मन्त्रयेत तदा स मन्त्री अन्येन मन्त्रयेत सोऽप्यन्येन। यतो मन्त्रिणामपि मन्त्रिणो भवेयुः तेषामप्यन्ये। इत्थं मन्त्रिपरम्परामन्त्रं भिन्द्यात्। तस्माद्राज्ञश्चिकीर्षितं कर्म फलेनैवान्यैर्विज्ञेयमिति ।अत एवोक्तम्। फलानुमेयाः प्रारम्भाः। इतिवृत्तमुपजातिः ।

In Public domain. Digitization Muthulakshmi Research Academy

श्लो **एकस्यमन्त्रसिद्धिर्नभवेत्तस्मात्सुशिक्षितैस्सचिवैः ।**
सम्मन्त्रयेत भूपतिरित्यवदज्जनपतेविशालाक्षः ॥ 4 ॥

पूर्वोक्तभरद्वाजमतमर्थशास्त्रकर्ता विशालाक्ष आक्षिपतीत्याह। एकस्येत्यादिना अज्ञातस्य ज्ञानम्। ज्ञातस्य निश्चयेन दृढीकरणम् । इदमदोवेत्यर्थयोर्द्विधाभवने सन्देहनिवर्तनम्। अंशेनोपलब्धव्यां शास्त्रानुमितिरित्येव ज्ञातीयं कार्यं भवति ततः प्रत्यक्षपरोक्षानुमानरूपप्रमाणत्रयमवश्यमङ्गीकार्यमित्युक्तं प्राक् (१.५१) अत एव कस्य मन्त्रो न सिध्यतीति सुशिक्षितैरर्थशास्त्रे सचिवैर्मन्त्रणङ्कुर्वीतेति च विशालाक्षस्याशयः तदुक्तं महाभारते सभापर्वणि। पञ्चामाध्याये त्रिंशत्तमे श्लोके

कच्चिन्मन्त्रयसे नैकः कच्चिन्न बहुभिस्सह ।
कच्चित्ते मन्त्रितोमन्त्रो न राष्ट्रं परिधावति ॥इति

अन्यत्र च अषट्कर्णोमन्त्रः इति। वृत्तन्तु गीतिः ।

श्लो **कार्यं स्वकीयमभिगोप्यसमानकार्य**
मन्यन्निरूप्य नृपतिर्व्यवहारदृष्ट्या ।
कुर्यादमात्यजनमन्त्रमिति ब्रुवन्ति
पाराशरो निजमतं जनपालमौले! ॥ 5 ॥

कार्यमित्यादिना विशालाक्षमतमिदं मन्त्रज्ञानानुकूलम्। न तु मन्त्रगोपनानुकूलमित्यतः पराशरशिष्यविशालाक्षमतं नाङ्गीकुर्वन्तीत्याह। नृपतिःराजा स्वकीयमात्मीयं कार्यमन्त्रणयोग्यं अभिगोप्य गोपयित्वा अन्यत् इतरत् समानकार्यं स्वीयकार्येण समानं कार्यं लोककथागतं पुराणेतिहासादि गतं वेति शेषः। निरूप्य इदं कार्यमनेन प्रकारेण निष्पन्नं चेत् अथवा अनेन प्रकारेण निष्पाद्यं चेत् तत्केन प्रकारेणानुष्ठेयमित्यापृच्छ्य, व्यवहारदृष्ट्या स्वव्यवहारदृशा अमात्यजनमन्त्रम् अमात्यजनैस्सह मन्त्रणम् मत्रि गुप्तपरि

In Public domain. Digitization Muthulakshmi Research Academy

भाषणे इतिधातोः (सू) **भावे** इति घञ् अकर्मकधातुभिर्योगे देशः कालो भावो **गन्तव्योध्वा च कर्मसंज्ञक** इति वाच्यम्। इति कर्मसंज्ञायां (सू) **कर्मणिद्वितीयेति** द्वितीया कुर्यात् इति पाराशराः पराशरशिष्याः निजमतं स्वमतम् ब्रुवन्ति आहुः। जनपालमौले! इति जिगिषोर्बोद्धव्यस्य सम्बोधनम्। यद्येवं राजमन्त्रिणामाशयं जानीयात्तदा मन्त्रज्ञानोपलब्धिर्मन्त्ररक्षणं च भवतीति पराशरशिष्याणामाशयः। वृत्तन्तु वसन्ततिलाका। लक्षणमुक्तम्।

श्लो **ये येषु कर्मसु समर्थदृशा नियुक्ता**
स्तै स्तेषु कर्मसु नृपस्सहमन्त्रयेत ॥
इत्याह नारदमुनिस्स्वमतं नरेन्द्राः
कुर्वन्ति कार्यमखिलं परिशील्य राजन् ॥ 6 ॥

ये येष्वित्वादिना नारदमतं ब्रूते। हे राजन्! येषु कर्मसु कृत्येषु ये मन्त्रिणः समर्थदृशा तत्कर्मनिर्वहणे तत्कर्मविषयकमन्त्रिणे तन्मन्त्ररक्षणे च समर्था इति बुद्ध्या नियुक्ताः मन्त्रिपदे स्थापिताः तैर्मन्त्रिभिः सह तेषु कर्मसु नृपो राजा मन्त्रयेत मन्त्रणं कुर्वीत। इति नारदमुनिः स्वमतं आह ब्रूते (सू) **ब्रुवः पञ्चानामादित आहो बुवः** ब्रूञ् व्यक्तायां वा चीति धातोर्लटि प्रथमपुरुषैकवचने णलि आह। देशे च रूपम्। नरेन्द्राः अखिलं सर्वं कार्यं परिशील्य राजनीतिदृशा परीक्ष्य कुर्वन्ति आचरन्ति। पाराशरोक्तदृशा राजा यदि स्वाभिलषितमन्यथा पृच्छेत् तदा मन्त्रिणोऽनादरेण सम्यगनालोच्य ब्रूयुः। अथवा अस्मास्वविश्वस्तोऽयं राजा अत एवास्मदनुष्ठेयमपि कार्यमस्मासु न प्रकाशयतीति कोपान्मन्त्र मन्येषां कथयेयुः। ततो मन्त्रगोपनं न स्यात्। अतः पाराशरमतं न युक्तमिति स्वोक्तदिशा तत्तत्कर्म नियुक्तमन्त्रिभिस्सह मन्त्रणे मन्त्रज्ञानं मन्त्रगोपनञ्च भवतीति नारदस्याशयः। वसन्ततिलका वृत्तम्।

श्लो **सम्मन्त्रयेत नृपति स्सचिवैर्निपुणैस्त्रिभिश्चतुर्भिर्वा ।**
नेचेत्प्रभो! प्रसक्ति स्स्यादनवस्थाख्यदोषस्य ॥ 7 ॥

In Public domain. Digitization Muthulakshmi Research Academy

कौटिल्यमतानुसारी कविर्नारदमतमनवस्थादोषदूषितमसहमानः सम्मन्त्रयेतेत्यादिना स्वमतमाह। हे प्रभो! नृपतिर्जिगीषू राजा त्रिभिश्चतुर्भिर्वा निपुणैः राजनीतिकुशलैः सचिवैर्मन्त्रिभिः सम्मन्त्रयेत सम्यङ्मन्त्रणं कुर्यात्। नोचेत् अन्यथा अनवस्थाख्यदोषस्य अनवस्था इयत्तया अनिर्णयः तन्नामकदोषस्य प्रसक्तिः प्रसङ्गः स्यात् अत्रायमाशयः राजा यद्येकेन मन्त्रिणा सह मन्त्रयेत तदा मन्त्री क्लेशेन निर्धारणीयेषु कार्येषु यथेष्टं निष्प्रतिद्वन्द्वं वक्ति अनुतिष्ठति च राजा च कार्यस्य निश्चयं नाधिगच्छेत् ।यदि द्वाभ्यां मन्त्रयेत तदायं दोषः यदा तौ मन्त्रिणावेकाशयौ तदा राजानं स्ववशं नयतः, यदा तु परस्परविरुद्धाशयै तदा कार्यहानिं कुरुतः। त्रिभिश्चतुर्भिर्वा मन्त्रणे पूर्वोक्तमहानर्थस्य हेतुभूतं राज्ञो वशीकरणम्। कार्यहानिश्च न हि नियमेन भवतः। यदि कदाचिदुत्वार्यमानावसि महताप्रयत्नेनोत्पाद्यते। नाल्पौ न यत्नेन किञ्च चिन्त्यमानं कार्यं मन्त्रनिश्चयेन मन्त्ररक्षणेन च उपपत्तियुक्तं भवतीति ।त्रिचतुराधिकमन्त्रिभिर्मन्त्रणे कार्यनिश्चयो न सुलभसाध्यः। मन्त्रगोपनञ्च कृच्छ्रसाध्यम्भवतीति। कदाचिद्देश कालकार्यवशाद्राजमन्त्रि-सामर्थ्यमनुसृत्य एकेन मन्त्रिभ्यामथवा राज्ञा एकाकिनैव वा मन्त्रणं कार्यम्भवतीति कौटिल्यस्याशयः। आर्या वृत्तम् लक्षणन्तूक्तम्॥

मन्त्रिपरिषत्

श्लो **मन्त्रे द्वादशमन्त्रिणः परिषदः प्रोक्ता मते मानवे**
बार्हस्पत्यमते तु षोडष मताः काव्ये मते विंशतिः।
कौटिल्यस्य मते तु नैपुणवशासङ्ख्या मता मन्त्रिणां
राजन्! सूक्ष्मदृशा विचार्य सकलं सम्मन्त्रयेत प्रभुः॥ 8॥

राजनिर्णीतकार्याणामनुष्ठाने राजनिर्णेयनवनवकर्मजातोल्लेखनादि सर्वराष्ट्रकर्मणां निर्वहणे च प्रधाना मन्त्रिपरिषत्काचिद्राज्ञो भवति। तत्र राज्ञा

In Public domain. Digitization Muthulakshmi Research Academy

कति मन्त्रिणो नियोज्या इत्यत्र तत्तन्मतानि मन्त्रे इत्यादिना प्रदर्शयति।हे राजन्! मनोरिदं मानवं (सू)**तस्येदमित्यण्** तस्मिन्(नि) **मानवस्तु मनुष्ये द्वे मनुसम्बन्धिनि त्रिषु** इति केशवः। मते मन्त्रे मन्त्रणे विषये परिषदः मन्त्रिपरिषदः द्वादश मन्त्रिणः प्रोक्ताः। बृहस्पतेरिमे बार्हस्पत्याः बृहस्पतिशिष्याः (सू) **तद्बृहतोः करपत्योश्चोरदेवतयोस्सुट्** तलोपश्च **दित्यदित्यादित्यपत्युत्तरपदाण्ण्यः** (सू)**तद्धितेष्वचामादेः** (सू) **यस्येति च** इति साधुः तेषां मतम् । तस्मिन् तु मन्त्रिण इत्यनुञ्चनीयम् । षट्च दशच षोडश (वा) **ष ष उत्वं दतृदशधासूत्तरपदादेष्टुत्वञ्च** धासुवेति वाचनम् । इति साधुः मताः इष्टाः काव्यस्य शुक्रस्येदं काव्यम् **तस्येदमित्यण्** तस्मिन् शुक्रसम्बिन्धिनि (नि) **शुक्रो दैत्यगुरुः काव्य इत्यमरः** मते मन्त्रिणः विंशतिः विंशतिसंङ्ख्याकाः (नि) **विंशत्याद्यास्सदैकत्वे** (नि) **सङ्ख्यास्सङ्ख्येयसंख्ययोरित्यमरः** महाभाष्येऽपि आदशभ्यस्सङ्ख्या-सङ्ख्ये ये वर्तते उर्ध्वसङ्क्याने सङ्ख्येये चेत्युक्तम् । कौटिल्यस्य चाणक्यस्य मते तु मन्त्रिणां सचिवानां सङ्ख्या नैपुणवशात् कार्यनुष्ठातृपुरुषसामर्थ्याधीना, मानवाद्युक्तसंख्याकावात न्यूना सङ्ख्या का वा तदधिकसंख्या मन्त्रिसामर्थ्यं कार्यञ्चानुसृत्य निर्णयेति भावः। मता इष्टा प्रभुः जिगीषुः सकलं अर्थशास्त्रमथवा चिकीर्षितं कार्यशास्त्रमितिशेषः सूक्ष्मदृशा सूक्ष्मबुद्ध्या विचार्य परिशील्य सम्मन्त्रयेत मन्त्रणं कुर्यात् । अत्रेदमप्यनुसन्धेयम्। अत्र परिषदि नियमितैर्मन्त्रिभिः राजपक्षगतं परपक्षगतञ्च कार्यजातं समीक्षापूर्वमनुष्ठेयम् । कार्याणां मध्ये अकृतस्य कार्यस्य अनुष्ठानोपक्रमः।आरब्धस्य कार्यस्य परिसमापनम्, परिसमापितस्य शोभाजनकः संस्कारः तत्तत्कर्मकराधिकाराणां गुणवत्तां बाहुल्यञ्च करणीयम्। राजा च सन्निहितैर्मन्त्रिपरिषत्सभ्यैस्सह कार्याणि पश्येत्। असन्निहितैस्तु मन्त्रिपरिषल्लिखितसकलविषयाणां लेखानां प्रेषणेन मन्त्रणं

In Public domain. Digitization Muthulakshmi Research Academy

कुर्यात्। इत्थं बहुमन्त्रिबुद्धिसाहाय्येन कार्यमन्त्रणं बहुफलं भवतीति किञ्च राजा प्राणापायशङ्कावहे कार्ये प्राप्ते मन्त्रिणो मन्त्रिपरिषदञ्चाहूय कार्यं वदेत् । तत्र यद्बहवो ब्रूयुस्तत्कुर्यात्। अथवा अल्पसंख्यका अपि यत् कार्यसिद्धिकरं ब्रुयुस्तदनुतिष्ठेदिति। वृत्तन्तु शार्दूलविक्रीडितम् ॥

गूढपुरुषनियोजनम्

श्लो **सत्रितीक्ष्णसदांश्च भिक्षुकीं गूढदूत्यकरणे नियोजयन् ।**
अर्थगैरवपुरस्सरं प्रभु स्तोषयेत्प्रतिपदं क्षमापते! ॥ 9 ॥

अमात्यादीनां शौचाशौचपरीक्षणस्य गूढपुरुषसाध्यत्वेन सत्रितीक्षणेत्यादिना गूढपुरुषनियोजनादिकामाह। राज्ञस्सम्बन्धिनोऽविश्यपोष्याः सामुद्रिकशास्त्रादिकं शिक्षाव्याकरणादिवेदाङ्गषट्कं अङ्गस्पर्शेन शुभाशुभ-ज्ञानजनितां विद्यां वशीकरणान्तर्धानविद्यां, इन्द्रजालविद्यां, मन्वादिधर्मशास्त्रं, कपिञ्जलरुतपूर्णकुम्भदर्शनाडीफलज्ञापकं निमित्तशास्त्रं पक्षिभिश्शुभज्ञापकं पक्षिशास्त्रमधीत्य विदन्तः कामशास्त्रतदनुबन्धि गीतनृत्तादिशास्त्राणि (चाधीयानावादेशसञ्चारिणसत्रिण) येतावज्जनपदेशू-रास्सन्तो द्रव्यहेतोश्शरीरनिरपेक्षं हस्तिव्याघ्रादीन् योधयेयु स्ते तीक्ष्णार्दिः ये तु बन्धुषु निस्नेहः आततायिनः अलसाः विषप्रयोगेऽपि निश्शङ्कास्तेरसदाःतान् सत्रितीक्ष्णरसदाञ् भिक्षुकीं परिव्राजिकाम् या तु दरिद्रा वृत्तिकामा विधवा प्रगल्भा ब्राह्मणी राजान्तःपुरे कृतसत्कारा सत्कारा स्वीकाराद्यर्थमसकृदमात्य गृहागमनशीला सा भिक्षुकी अनेन ब्राह्मणपरिव्राजिकाकथनेन तत्समानाचाराः बौद्धभिक्षुक्यः शूद्राश्च ग्राह्याः रसदांश्चेत्यत्रच शब्दात् कापटिकोदास्थित गृहपतिकवैदेहकतापसव्यञ्जनान्, गृह्णीयात् परमर्मज्ञः प्रौढोऽध्यापकाध्येतृ वृत्तिर्निष्परिग्रहत्वाच्छरीरमात्रपरिच्छदः राजकार्यैकपरः

In Public domain. Digitization Muthulakshmi Research Academy

कापटिक उच्यते सन्न्यासाश्रमं स्वीकृत्य तस्माच्युतः बौध्दशैवादिव्रतच्युतश्च प्रज्ञया शौचेन च युक्तः उदास्थितनामाकृषिवृत्त्या क्षयं प्राप्तः प्रज्ञाशौचयुक्तः कृषिशीलो गृहपतिकसंज्ञितः धनादि विरहाद्वाणिज्यवृत्तिच्युतः प्रज्ञाशौच-युक्तो वैदेहकसंज्ञकः मुण्डितमस्तकः परिव्राजकक्षपणकादिः जटाधारी शैवपाशुपतादिव्रतपरायणश्च वृत्तिकास्तापसनामकाः कापटिकादयः पञ्चसंस्थाशब्दवाच्याः स्वस्थाने सम्यक् तिष्ठन्तो राजकार्यमनुतिष्ठन्तीति संस्थाः न त्वेते देशे सञ्चरन्ति सत्रितीक्ष्णरसदभिक्षुक्यस्तु स्वपरदेशे तत्र तत्र सञ्चरन्त एव राजकार्यमनुतिष्ठन्तीति सञ्चारशब्दवाच्याः गूढं रहस्यं च तत् दूत्यं दूतस्य भावकर्मणि इति यत् (नि) **दूत्यं तद्भावकर्मणोरित्यमरः**तस्य करणमाचरणम् । तस्मिन् गूढदूत्यकरणे अर्थो धनम् गौरवं बहुमानचिह्न-सुवर्णपदकभूषणबिरुदप्रदानादिकः, तत्पुरस्सरं प्रभुः जिगीषुः नियोजयन् प्रतिपदं पदे पदे तोषयेत् हर्षयेत् । इदमत्रानुसन्धेयम् । सञ्चार संज्ञकस्य त्रिप्रभृतय मन्त्रिसहायरहितेन केवलराज्ञेव नियोज्याः मन्त्रिपुरोहितादि शुध्दिपरिज्ञानायाऽपि तेषां नियोज्यत्वात् संस्थासंज्ञकाः कापटिकादयस्तु मन्त्रिसहितेन राज्ञा नियोज्या इति भेदः। राजा सञ्चारान् स्वस्मिन् जनपदे मन्त्र्याद्यष्टादशपुरुषाणां शुद्धिज्ञानाय तेषु चारयेत्। मन्त्रिणः पुरोहितः सेनापतिः युवराजः द्वारपालकःअन्तः पुराधिकृतः स्कन्धावारनिवेशयिता राजार्थसमाहरणम् १) दैवारिकः- प्रतिहारी २) अन्तर्वंशिकः ३)प्रशास्ता ४) समाहर्ता कर्ता भाण्डागाराधिकृतः कण्टकशोधनाधिकृतः एकद्विसहस्रपदाति सेनानियुक्ताः पुरमुख्यः अथवा परिषदध्यक्षः, दण्डपालः, दुर्गपालः, अन्तपालः, अयमेव राज्यसीमारक्षकः वीवधाध्यक्ष इत्यस्त्यैव संज्ञान्तरम् अरण्यराज्याधिपतिः एतेषु अष्टादशपुरुषेषु विश्वसनीयदेश वेषशिल्पभाषाभिजननिर्देशान् सञ्चारान् भक्तिसामर्थ्यानुरूपकर्म नियुक्तान् कृत्वा चारयेत्। तत्र तीक्ष्णाः छत्र भृङ्गारव्यजनपादुकासनयान-

In Public domain. Digitization Muthulakshmi Research Academy

वाहनोपग्राहिणो भूत्वा मन्त्रादीनां बाह्यं समाचारं विदित्वा सत्रिणां निवेदयेयुः। रसदायस्तु अन्नपाचक भक्ष्यपाचकस्नापक संवाहकशय्या-द्यास्तरक क्षुरक, प्रसाधक, जलहारक, कृत्येषु नियुक्ता भूत्वा मन्त्र्यादीनां गृहान्तर्गतं समाचारं ज्ञात्वा निवेदयेयुः भिक्षुक्यस्तं समाचारं संस्थासु समर्पयेयुः किञ्चकुब्ज-वामनकिरातजाड्यमूकबधिरान्धच्छद्मानः ५. सन्निधाता ६.प्रेदष्टा ७.नायकः ८.पौरव्यवहारिकः ९. कर्मान्तिकः १०.सैन्यसेनामुखादिनेता पूर्वोक्त सेनापतिस्तु अक्षौहिणी नायक इत्यनयोर्भेदः ११.आटविकः एतान्यर्थशास्त्रोक्तसाङ्केतिकपदानि।

नर्तकगायकवीणावंशादिवाचकपौराणिककुशीलवाःषण्डाः अभ्यन्तर-चारिण्यो दास्यादिस्त्रियश्च मन्त्र्यादीनां गृहान्तर्गतं वृत्तान्तं ज्ञात्वा भिक्षुकीनां निवेदयेयुः। भिक्षुक्यस्तु तं वृत्तान्तं संस्थासु विनिवेदयेयुरिति। रथोद्धता, **रान्नराविहरथोद्धता** लगा वितिलक्षणात् ॥

श्लो **निजरिपुविषयस्थानां कृत्यानामप्यकृत्यानाम् ।**

उपसङ्ग्रहम्प्रकुर्यादुपजापाद्यैः प्रभू राजन्! ॥ 10 ॥

निजरिप्वित्यादिना पूर्वोक्तैर्गूढपुरुषैः किं कर्तव्यमित्यत्राह । विषयोपदेशः (नि) **विषयो गोचरे देशे तथा जनपदेऽपि च। प्रबन्धाद्यस्य यो ज्ञातस्तत्ररूपादिके पुमानिति** मेदिनी । निजस्वकीयस्य जिगीषोरित्यर्थः। रिपोश्शत्रोश्च विषयौ तयोः तिष्ठन्तीति निजरिपुविषयस्थानि तेषाम् (सू)**आतोऽनुपसर्गे कः** इति कः (नि) **निजं स्वीये च नित्ये चेति** मेदिनी(नि) निजन्तु त्रिस्सनातने (नि)**आत्मीये च स्वभावे तु क्लीपुंसित्वात्मनिस्मृत** इति केशवः। कृत्यानां शत्रुभिर्भेद्यानां क्रुद्धलुब्धभीतावमानितानां कृत्यानां पूर्वोक्त कृत्यविपरीतानां अपि प्रभुर्जिगीषुः उपजापाद्यैः सामदानभेददण्डोपायैः सञ्चारप्रयुक्तैरित्यर्थः । उपसङ्ग्रहं कुर्यात् स्वायत्तीप्रकुर्यात्। राजा स्वदेशे

In Public domain. Digitization Muthulakshmi Research Academy

कृत्यान् भेददण्डाभ्याम् अकृत्यान् धनेन, स्वर्णकटकबिरुदादि प्रदानैश्च संगृह्णीयात् , परदेशे कृत्यान् सामादानाभ्याम्, अकृत्यान् भेददण्डाभ्यां तद्देशीयप्रभौ दोषप्रदर्शनेन च सङ्गृह्णीयात् । एतत्सर्वमपि सत्रि प्रभृति गूढपुरुषैकसाध्यम् अतस्तत्सङ्ग्रहोऽत्यावश्यक इत्याशयः। वृत्तमुपगीतिः। **आर्याद्वितीयेकेऽर्थे यद्गदितं लक्षणं तत्स्यात् । यद्युभयोरपि** दलयोरुपगीतिं तां **मुनिर्ब्रूते** इति लक्षणात् ॥

दूतनियोजनम्

श्लो **दूतां स्त्रिविधान्नृपते विद्धि निसृष्टार्थपरिमितार्थौ द्वौ ।**
शासनहरस्तृतीयःस्वयमुत्तममध्यमाधमाःक्रमतः ॥ 11 ॥

मन्त्रनिर्णयानन्तरं दूतसम्प्रेषणस्यावश्यकत्वात्तदुपयोगिदूतस्वरूप-भेदादिकं दूतां स्त्रिविधा नित्यादिभिश्चतुर्भिः श्लोकैराह ।

हे नृपते! राजन् दूतान् सन्देशहरान् (नि) **स्यात्सन्देशहरो दूत** इत्यमरः। त्रिविधान् त्रिप्रकारान् स्वयं विद्धि जानीहि। विद ज्ञाने इत्यादादिकाल्लोण्मध्यमपुरुषैकवचनम्। के ते दूता इत्यत्राह। निसृष्टार्थश्च परिमितार्थश्च ।निसृष्टार्थपरिमितार्थौ द्वौ त्रयाणां पूरणस्तृतीयः(सू) **त्रेस्सम्प्रसारणञ्च** इति त्रेः डटि सम्प्रसारणे च सति साधुः शासनहरः एते त्रयः क्रमतः क्रमात् उत्तम- मध्यमाधमा दूताः ।वृत्तन्तु आर्याभेदो गीतिः ।

श्लो **दूतत्रितये प्रथमो जानपदत्वाद्यमात्यगुणपूर्णः ।**
पादार्थगुणविहीनावन्यौ दूतौ क्रमेण राजेन्द्र ॥। 12 ॥

दूतेति हे राजेन्द्र! पूर्वश्लोकोक्तनिसृष्टार्थपरिमितार्थ शासनहर-नामकदूतानां त्रितयेत्र्यवयवकसमुदाये(सू) **संख्याया अवयवे तयप्** चेति तयपि त्रितयशब्दस्साधुः क्रमेण प्रथमदूतो निसृष्टार्थः स च प्रथमसर्गे प्राज्ञो

In Public domain. Digitization Muthulakshmi Research Academy

जानपद इत्यादि(१-४४) श्लोकोक्त प्रधानमन्त्रिगुणैः पञ्चविंशतिसंख्याकैः पूर्णः। अन्ये इतरौ दूतौ परिमितार्थशासनहारौ पादार्थगुणविहीनौ प्रधान-मन्त्रिगुणेषु पादगुणहीनः परिमितार्थः, प्रधानमन्त्रिगुणयुतः शासनहरस्तु अधममन्त्रिगुणयुतः इति (२-५५) ज्ञेयम्। वृत्तमार्याभेदो गीतिः।

श्लो **दूतान् स्वकर्मकुशलान्विनियोजयेत**
स्वीयान्परीक्ष्य नृपतिर्ननु दूतकृत्ये।
दूतान्परस्य निजदेशगतान् स्वचारै-
स्संशोधयेदयमिलाधिप राजधर्मः ॥ 13 ॥

दूतानिति हे इलाधिप भूपते (नि) **"इला कलत्रे साम्यस्य धरित्र्यां गवि चापि चेति"** मेदिनी। नृपतिर्जिगीषुः स्वकर्मकुशलान् दूतकर्मणि निपुणान् स्वीयानात्मीयान् दूतान् परीक्ष्य ननु दूतसामर्थ्यं परीक्ष्यैव(नि) **प्रश्नावधारणानुज्ञानुनयामन्त्रणेननु** इत्यमरः। दूतीकृत्ये दूत्यकरणे विनियोजयेत नियोजयेत्। निजं स्वीयं देशं गतान् प्राप्तान् द्वितीयातत्पुरुषः परस्य शत्रोः (नि) **अभियातिपरारातिप्रत्यर्थिपरिपन्थिन** इत्यमरः। दूतान् स्वचारैः स्वीयसञ्चारैः संशोधयेत् परिशोधयेत् सम्यक् परिशोधयेत्। यथापराधा दूताः स्वराष्ट्रे मित्रसङ्ग्रहादिकर्म न कुर्युस्तक्ष्णादि तच्चेष्टितानि सत्रीतीक्ष्णादिभिः स्वचारैः परिशीलयेत्, अन्यथा परस्य दूता महान्तमनर्थ-मुत्पादयेयुरित्याशयः। दूतकृत्यसङ्ग्रह उक्तः कौटिलीयेऽर्थशास्त्रे तद्यथा **प्रेषणं सन्धिपालत्वम्प्रतापो मित्रसङ्ग्रहः। उपजापस्सुहृद्भेदो, दण्डगूढातिसारणम् ॥**

बन्धुरत्नापहरणं चारज्ञानं पराक्रमः।
समाधिमोक्षो दूतस्य कर्मयोगस्य चाश्रयः॥

इति। अस्यार्थः प्रेषणं शत्रुदेशं प्रतिगमने शत्रोःस्वप्रभुशासन-निवेदनार्थं, शत्रुदेशवृत्तान्तस्य स्वज्ञातस्य स्वप्रभोर्निवेदनार्थं च, सन्धिपालत्वं

In Public domain. Digitization Muthulakshmi Research Academy

कृतसन्धिरक्षणम्। प्रतापः यथापेक्षं शत्रोर्विक्रमणम् मित्रसङ्ग्रहः शत्रुदेशे मित्राणां सम्पादनम्। उपजापः चारसाहाय्येन शत्रुकार्याणाम्भेदनम्। सुहृद्भेदः शत्रुमित्राणाम्भेदनम्। दण्डगूढातिसारणम् दण्डस्य सेनायाः गूढानां तीक्ष्णरसादादिसञ्चाराणाञ्च, अतिसारणम् आक्रमणं बन्धुरत्नापहरणम् बन्धूनां रत्नानां च स्वीकरणम्। चारज्ञानं गूढपुरुषानुष्ठानसौष्टवपरिज्ञानम्। पराक्रमः अवसरे विक्रयणम् । समाधिमोक्षः, सन्धिविश्वासार्थ स्थापितः पुत्रादिस्समाधिः तस्य मोक्षः विमोचनम्।योगस्य औपनिषदिकनामके चतुर्थदशादिकरणे कौटिलीयार्थशास्त्रे कथितस्य मारणादि प्रयोगस्य आश्रयः आचरणञ्च दूतस्य कर्मकृत्यम्। भवतीत्यध्याहार्यम् । वसन्ततिलाका वृत्तम् ।

श्लो **राजानो दूतमुखास्तस्माद्राजा स्वधर्मपरतन्त्रः ।**

परवाचिकमप्रियमपि वदतो दूतान् न संहरेद्राजन् ॥ 14 ॥

राजान इति दूतः सन्देशहारः मुखं येषां ते दूतमुखाः राजानःदूताः स्वकीयस्वामिन आशयस्य प्रियस्य वा अप्रियस्य वा वक्तारः एतादृश कृत्यं दूतधर्मः। तस्मात् स्वधर्मपरतन्त्रः राजधर्मपालकः राजा अप्रियमपि अनिष्टुरमपि सन्देशवाचम् । सन्दिष्टोऽर्थः यया उच्यते ते सा वाक् वाचिकम्। वाचो व्याहृतार्थायामिति स्वार्थे ठकि साधुः स्वार्थिकाः प्रकृतितो-लिङ्गवचनान्यतिवर्तन्त इति नपुसंकत्वम्। (नि)**सन्देशवाग्वावाचिकं स्यादित्यमरः**। वदतः ब्रुवतः दूतान् न संहरेत् । तद्वचनस्य परकीयत्वात्, परकीयवचननिवेदनस्य दूतधर्मत्वात् परकीय वचन निवेदनस्य दूतधर्मत्वात्। किञ्च स्वकीयानामपि प्रियाप्रियवाचिकनिवेदनस्य धर्मत्वात् तेषां हननं नकार्य मित्याशयः। तथा च वाल्मीकिरामायणे सुन्दरकाण्डे विभीषणवचनानि

साधुर्वा यदि वासाधुः परैरेषसमर्पितः ।

ब्रुवन् परार्थं परवान्नदूतो वधमर्हति ।रामायणम् 5-52-19

In Public domain, Digitization Muthulakshmi Research Academy

दूतस्य वधातिरिक्तदण्डा अपि तत्र कथिताः

वैरुप्यमङ्गेषु कशाभिघातो
मौण्ड्यं तथा लक्षणसन्निपातः ।
एतान्हि दूते प्रवदन्ति दण्डान्
वधस्तु दूतस्य न नः श्रुतोऽस्ति ॥ रामायणम् 5-52-15

वृत्तमार्याभेदो गीतिः ।

राजव्यापारः

श्लो **राजा स्वकार्यनिरतो यदि भृत्यवर्ग-**
स्स्वस्वक्रियास्वभिरतो भवति क्षितीन्द्र ।
राजा प्रमादमयते यदि सप्रमादा
भृत्याः क्रियाः क्षितिपतेर्विनिपातयेयुः ॥ 15 ॥

राजेत्यादिभिश्चतुर्विंशतिश्लोकैः राज्ञो योगक्षेमसाधनभूतं व्यापार-माह । हे क्षितीन्द्र! राजजिगीषुः स्वकार्येषु धर्मशस्त्रे अर्थशास्त्रे च राज्ञकर्तव्यतया विहितेषु कार्येषु निरतः आसक्तो यदि भृत्यानां मन्त्रिपुरोहिताद्यष्टादशपुरुषाणां संस्थानां सत्त्रिप्रभृतिसञ्चाराणां च वर्गः संज्ञः स्व स्व क्रियासु स्वेषां स्वेषां विहित कर्मसु अभिरतः आसक्तो भवति राजा प्रमादं स्व विहितकृत्याचरणे अलसत्वम् आयते यदि प्राप्नोति चेत् भृत्याः पूर्वोक्ताः सप्रमादाः अलसास्सन्तः क्षितिपतेर्जिगिषोः क्रियाः कार्याणि विनिपातयेयुः नाशयेयुः । वृत्तं वसन्ततिलका ।

श्लो **ततो भवेयुर्विगतानुरागाःप्रजास्समस्ता अपि भूमिपाले ।**
तदेव रन्ध्रं समवेक्ष्य राजन् प्रभुं सपत्नाः परिभावयेयुः ॥ 16 ॥

In Public domain. Digitization Muthulakshmi Research Academy

तत इति ततः भृत्यानामालस्याद्राजकार्यनाशो भवति तस्मात् भूमिपाले राज्ञि समस्ता अपि प्रजाः विगतानुरागा अनुरागरहिताः भवेयुः तदेव प्रजानुरागरहितत्वमेव रन्ध्रं दोषम् अपराधं (नि) **क्लीतुरन्ध्रवाक् विवादेचापराधे च भूषणेत्वपरे विदुः। लग्नाद्यष्टमे राशौ विदुस्यां वत्सरा इदम् । मर्त्यजात्यन्तरे तु द्वे विप्रमैत्रीसमुद्भवे** इति केशवः समवेक्ष्य ज्ञात्वा सपत्नः रिपवः सपत्नीव सपत्नः वीञ् सपत्ने इति निर्देशादकारः(नि) **रिपौवैरि सपत्नारिद्वेषद्द्वेषणदुर्हृदः** इत्यमरः। प्रभुं जिगीषुं परिभावयेयुः तिरस्कुर्युः । वृत्तमुपेन्द्रवज्रा।

श्लो **तस्मादनर्थमखिलं नृपतिर्विचिन्त्य**
वर्तेत कर्मसु निजेष्वति जागरूकः।
तद्वर्तनं सकलमप्यवबोधनीयं
शास्त्रोदितं क्षितिपते! श्रृणु सावधानम् ॥ 17 ॥

तस्मादिति तस्मात् पूर्वोक्तात् हेतोः अखिलं समस्तम् अनर्थं उपद्रवम् विचिन्त्य पर्यालोच्य नृपतिर्जिगीषुः निजेषु स्वस्य विहितेषु कर्मसु कृत्येषु अतिजागरूकः अतिशयेन जागरणशीलः अतिपूर्वज्जागृनिद्राक्षये इत्यस्मात् जागरूकः इत्यनेन ऊक प्रत्यये साधुः जागुरिति पञ्चम्यन्तम् । तदुक्तं **जागर्तेरूकः स्या**दिति जागरूक इति सिध्दरूपमेव तु न निपातितम् । उत्तरसूत्रे ऊकस्यानुवृत्तेस्सत्त्वादिति तत्वबोधिनी अतः काशिका वृत्त्यादिषु दृश्यमानः जागरूक इति सूत्रपाठः प्रामादिक इति बोध्यम्। वर्तेत हे क्षितिपते! राजन् शास्त्रोदितं अर्थशास्त्रेण प्रोक्तम् । (नि) **उक्तं भाषितमुदितं जल्पित-माख्यातमभिहितं लपितमित्यमरः** । तस्य राज्ञो वर्तनम् , सकलमपि अवबोधयं अवगम्यम् । अतः सावधानम् चित्तमैकाग्र्यसहितं यथा भवति तथा श्रुणु। श्रु श्रवणे इत्यस्माल्लोण्मध्यमपुरुषैकवचनम् । (सू)**श्रुवः श्रुच** इति साधुः । वसन्ततिलकावृत्तम् ॥।

In Public domain. Digitization Muthulakshmi Research Academy

श्लो **दिनमष्टधा विभज्य प्रथमे भागे प्रभुः शृणुयात् ।**
आयव्ययौ च रक्षां विधिमपि विश्वम्भराधिपते ॥ 18 ॥

दिनमित्यादिभिः राज्ञः कर्तव्यानां कर्मणां कालविभागनियमञ्च तत्तत्कालेष्वनुष्ठेयानि कर्माणि दिन आह दो अवखण्डने इत्यस्मात् द्यति खण्डयति तमः निर्व्यापारस्थितिञ्चेति दिनं । (सू) **द्यतेः किनन्** इत्युणादिसूत्रेण किनिन् प्रत्यये साधुः (नि) "**घस्रोदिनाहनीवातुक्लीबेदिवसवासरावित्यमरः**, अष्टधा अष्टौ दिनस्य अधिकरणविचारे च इति धा प्रत्ययः विभज्य एकस्याह्नः अष्टौ भागान् प्रकल्प्येत्यर्थः। भागकल्पनञ्च घटिकाभिः घटिका षष्टिविघटिकात्मिका घटिका प्रमाणेन दिनस्य रात्रेश्च प्रत्येकमष्टौ भागान् कल्पयेत्। तत्र एकोऽष्टमभागः पादोनघटिका चतुष्टयात्मकः तेषु दिनस्याष्टस्वष्टमभागेषु प्रथमे भागे प्रभुर्जिगीषुः आयव्ययौ पूर्वस्याहोरात्रस्य सम्बन्धिनौ द्रविणागम द्रविणविनियोगौ रक्षाविधिमपिपूर्वरात्रिश्रुतं रक्षाविधानमपि पूर्वरात्रिश्रुतं रक्षाविधानमपि श्रुणुयात् । वृत्तमुपगीतिः। । लक्षणन्तूक्तम् ।

श्लो **विमृशेद्द्वितीयभागे नरपालः पौरजानपदकार्यम् ।**
कुर्यात्तृतीयभागे स्नानस्वाध्यायभोजनं राजन् ॥ 19 ॥

विमृशेदिति हे राजन् ! द्वितीयभागे दिवसस्य द्वितीयांशे नरपालः जिगीषु पुरे भवाः पौराः(सू) **तत्र भवः** इत्यण् (नि) **पौरं त्रिषु पुरोद्भूते कत्तृणेपुंनपुंसकमिति मेदिनी** । जनपदे विजिगीषु राष्ट्रे भवाः जानपदाःतेषां कार्यं कृत्यजातं, विमृशेत् मृश आमर्शने इयस्माद्विपूर्वद्विधिलिङ्गप्रथमपुरुषैक वचनम्। आमर्शनं स्पर्शः विशेषेण स्पृशेत्। विशेषेण स्पृशेत् परीशीलयेदित्यर्थः। तृतीयभागे तृतीयांशे स्नानं च स्वाध्यायो वेदाध्ययनम् च भोजनञ्च एषां समाहारः स्नानस्वाध्यभोजनम् । कुर्यात् आर्याभेदो गीतिः ॥

In Public domain. Digitization Muthulakshmi Research Academy

श्लो **द्रविणं च चतुर्थभागे गृह्णीयात् पूर्वदिनसमायातम् ।**
विनियुञ्जीताध्यक्षान् कार्यविशेषेषु मेदिनीनाथः ॥ 20 ॥

द्रविणमिति। चतुर्णां पूरणं चतुर्थः(सू) **तस्यपूरणे डटिति** डटि (सू) **षट्कुतिकतिपयचतुरां धुक्** इति थुकि च सति चतुर्थ इति रूपम् । चतुर्थश्चासौ भागश्च चतुर्थभागः तस्मिन् पूर्वदिनसमायातम् ।द्रविणं हिरण्यादिरूपं धनम् । गृह्णीयात् स्वीकुर्यात् , किञ्च अध्यक्षान् अर्थशास्त्रे अध्यक्षप्रचारे कथितान् सुवर्णकोष्टागारपण्य, कुप्यशुल्कायुधागार, सूत्र, सीता, सुरा, सूना,गणिका, नौ, गवश्व, हस्ति, रथ, मुद्राद्यध्यक्षान् कार्यविशेषेषु तत्तत्कर्तव्यकृत्येषु , विनियुञ्जीत नियोजयेत् । वृत्तं गीतिः ।

श्लो **सम्मन्त्रयेत सचिवैः पत्त्रद्वारेण पञ्चमे भागे ।**
बुध्येत चारमुखतो राजन् कार्याणि रहसि बोध्यानि ॥ 21 ॥

सम्मन्त्रये पञ्चमे भागे अंशे सचिवैः दूरदेशस्थितैर्मन्त्रिपरिषत्सभ्यैः पत्त्रद्वारेण लेख्यार्थकलितलेखसम्प्रेषणेन सम्मन्त्रयेत सम्यङ् मन्त्रणं कुर्यात् । किञ्च चारमुखतः गूढपुरुषद्वारेण रहसि रहः प्रदेशे बोध्यानि ज्ञेयानि कार्याणि,बुध्येत अवगच्छेत् । वृत्तमार्याभेदोगीतिः ।

श्लो **विश्रान्तिकृते विहरेदथवा कुर्यात्क्षमापतिर्मन्त्रम् ।**
षष्ठे, सप्तमभागे पश्येद्धस्त्यश्वरथपदात्यादीन् ॥ 22 ॥

विश्रान्तीति। विश्रान्तिकृते विश्रमार्थं षष्ठे षष्ठभागे विहरेत् । स्वच्छन्दमवस्थीयेत। अथवा यद्वा क्षमापतिः जिगीषुः मन्त्रं राजकार्य-विषयकमन्त्रणम् कुर्यात्। सप्तमभागे सप्तमांशे हस्तिनश्च अश्वाश्च रथाश्च पदातयश्च हस्त्यश्वरथपदाति (सू) **द्वन्दश्चप्राणितूर्यसेनाङ्गनामित्येकवद्भावः**। हस्त्यश्वरथपदातिः आदि येषां तान् हस्त्यश्वरथपदात्यादीन् सेनाङ्गप्रभृतीन् पश्येत् । वृत्तं गीतिः ।

In Public domain. Digitization Muthulakshmi Research Academy

श्लो **सेनापतिसहितोऽष्टमभागे सञ्चिन्त्य विक्रमं राजा ।**
पर्यवसिते तु दिवसे सायं सन्ध्यामुपासीत ॥ 23 ॥

सेनापतीत्यादि राजा जिगीषुः अष्टमभागे दिवसस्य अष्टमेंऽशे सेनापतिसहितः सेनापतिना समेतः विक्रमं स्वेषाम्परेषाञ्च शक्तिसम्पदम्(नि) **विक्रमस्तु पुमान् क्रान्तिमात्रे स्यात् शक्तिसम्पदि"** इति मेदनी । सञ्चिन्त्यसम्यक्चिन्तयित्वा, दिव, अह्नि पर्यवसिते तु परिस (नि) **"तु पादपूरणे भेद समुच्चयेऽवधारणे, पक्षान्तरे वियोगे च, प्रशंसायां विनिग्रहे"** इति मेदिनीत्यमरसुधा । सायं सायं मितियान्तमव्ययम् सायङ्काले (नि) **सायं साये** इत्यमरः सन्ध्याम् । सायङ्कालिकसन्ध्यादेवताम् उपासीत उपासनया सेवेत । वृत्तमार्या ।

श्लो **दिनवद्विभज्य रात्रिं प्रथमे वीक्षेत पूरुषान् गूढान् ।**
कुर्याद्द्वितीयभागे स्नानस्वाध्यायभोजनं राजन् ॥ 24 ॥

दिनवदिति रात्रिं दिनवत् दिनेन आह्ना तु तुल्यां दिनवत् । (सू) **"तेन तुल्यं क्रियाचेद्वति"** रितिवत्। विभज्य अष्टधा विभक्तं कृत्वा प्रथमे भागे गूढान् पुरुषान् गूढपुरुषान् वीक्षेत पश्येत्। तैस्सह रहस्यविषयज्ञानाय सम्भाषणं कुर्यादित्यर्थः। द्वितीयभागे, द्वितीयांशे स्नानञ्च स्वाध्यायो वेदाध्ययनञ्च भोजनञ्च एषां समाहारः स्नानस्वाध्यायभोजनं कुर्यात् । आर्याभेदो गीतिः ॥

श्लो **प्राप्तस्तृतीयभागे गीतादिश्रवणजनितसुखवशताम् ।**
राजा चतुर्थपञ्चमभागौ कुशलं शयीत राजेन्द्र ! ॥ 25 ॥

प्राप्त इति हे राजेन्द्र ! राजश्री राजा जिगीषुः तृतीयभागे रात्रौ तृतीयांशे गीतं गानम् आदिर्यस्य तत् गीतादि तस्य श्रवणं, तेन जनितं उत्पादितं सुखं तस्य वशताम् अधीनताम्। **"गीतं गानमिमे समे"** इत्यमरः ।(नि) **वशातु स्त्री**

In Public domain. Digitization Muthulakshmi Research Academy

वन्ध्यायां दुहितर्यपि स्त्री मात्रे चेति केषाञ्चिन्मतमन्ये तु मन्वते । **"वन्द्ये स्त्रियां वन्द्य गव्यामित्यथोगजयोषिति"** ।अग्निमन्थाख्यवृक्षेनात्वायत्तत्वप्रभुत्वयोः जने स्पृहायां त्रिष्वेषु आयत्ते द्वौ तु मानुषे शरणीवैश्यसम्भूते स्यात् इति केशवः ।प्राप्तस्सन् चतुर्थपञ्चमभागौ तुरीयपञ्चमभागयोरित्यर्थः(सू) **कालाध्वनोरत्यन्त संयोगे** इति द्वितीया कुशलं क्षेमं यथा भवति तथा क्रिया विशेषणं यद्वा पूर्णं पर्याप्तम् । (नि) **"कुशलं निपुणे त्रिः क्षमेऽपि च क्षेमे मङ्गलयुक्ते च दीक्षितेऽप्यजयोऽथनप् । पर्याप्तौ मङ्गले पूर्णेस्यादिति"** केशवः शयीत स्वप्यात् । वृत्तं गीतिः ॥

श्लो **षष्ठे तूर्यरवेण प्रतिबुध्दश्चिन्तयेन्महीपालः ।**
कर्तव्यताञ्च शास्त्रं सर्वव्यवहारकर्मसु स्वामिन् ! ॥ 26 ॥

षष्ठ इति हे स्वामिन् ! प्रभो ! महीपालः जिगीषुः षष्ठे षण्णां न पूरणे भागे (सू)**तस्य पूरणे डट्** इति षट्चब्धाड्डुटि (सू) **षट्किति कतिपयतुरां थु गिति** थुकि (सू) **ष्टुनाष्टुरिति** ष्टुत्वे च षष्ठ इति रूपम् । तूर्याणां मुरजादि वाद्यानां रवेण ध्वनिना (नि) **"तूर्योऽस्त्री वाद्यनिर्घोषे स तु वाद्ये नपुंसकमिति"** केशवः । प्रतिबुध्दःनिद्रायाः प्रतिबोधं प्राप्तस्सन् सर्वव्यवहाराश्च कर्माणि क्रियाश्च तेषु, कर्तव्यतां कालोचितकार्यपरिपाटीम् । शास्त्रं अर्थशास्त्रञ्च चिन्तयेत् । वृत्तमार्याभेदोगीतिः ॥

श्लो **सप्तमभागे मन्त्रं कुर्वीत प्रेषयेच्च गूढजनान् ।**
भागेऽष्टमे यथाविधि गृह्णीयादाशिषो द्विजातिभ्यः ॥ 27 ॥

सप्तमेत्यादि सप्तानां भागानामंशानां पूरणस्सप्तमः (सू) **पूरणेज डिति** डटि तस्य नान्तादसङ्ख्यादौर्मडिति मडागमे सप्तम इति रूपम् । स चासौ भागश्च सप्तम भागः तस्मिन् जिगीषुरितिशेषः ।मन्त्रं मन्त्रणं कुर्वीत गूढजनान् गूढपुरष नियोजने कथितान् सत्रिप्रभुतिगूढपुरुषान् प्रेषयेत् यत्र यत्र कार्ये ये प्रेषणीयाः तत्सर्वं मनसि प्रणिदध्यादित्यर्थः । अष्टमे अष्टानां पूरणे भागे

In Public domain. Digitization Muthulakshmi Research Academy

त्रिंशेविधिं शास्त्रमनतिक्रम्य यथाविधि " **अव्ययं विभक्तीत्यादिना य धर्मेऽव्ययीभावः**"। द्विजातिभ्यो ब्राह्मणेभ्यः (नि) **द्विजात्यग्रर्याजन्मभूदेव-बाडभाः विप्रश्च ब्राह्मण** इत्यमरः जिगीषुर्याजकाचार्य पुरोहितसहित इति पूरणीयम् आशिषः माङ्गलिकमन्त्रपाठपूर्वाण्याशीर्वचनानि, स्वस्त्ययनानी-त्यर्थः नीत्या गृह्णीयात् । वृत्तं गीतिः ।

श्लो **अपि च चिकित्सकपाचक मौहूर्तिक भाषणं च कुर्वीत ।**
तदनु सवत्सां धेनुं वृषभं भूपः प्रदक्षिणीकुर्यात् ॥ 28 ॥

अपि चेत्यादिना अष्टमभागेऽन्यदपि कर्तव्यमित्याह । अपि च किञ्च चिकित्सकेन वैद्येन " **कितनिवासे रोगापनये**" चेत्यास्मात्(सू) " **गुप्तिज्किद्भ्यः सन्** " कितेर्व्याधिप्रतीकारे इति सन्नन्तात् (सू) "**ण्वुल्तृचाविति**" ण्वुल् (नि) "**रोगहार्यगदङ्कारोभिषग्वैद्य श्चिकित्सके**" इत्यमरः । पाचकेन पाककर्त्रा मुहूर्तमधिकृत्य कृतोग्रन्थः मुहूर्तः "**अधिकृत्य कृते ग्रन्थे**" इत्यण् संज्ञापूर्वक- विधेरनित्यत्वान्नवृध्दिः । मुहूर्तमधीते वेद वा मौहूर्तिक (सू) ऋतूक्थादि सूत्रान्ताट्ठक् इति ठक् । (नि) " **सांवत्सरो ज्योतिषिको दैवज्ञगणकावपि**"। **स्युर्मौहूर्तिकमौहूर्तज्ञानिकार्तान्तिकावपि** इत्यमरः तेन भाषणं सम्भाषणं कुर्वीत कुर्यात्। चिकित्सकेन सम्भाषणं स्वशरीरोपरिज्ञानार्थम् पाचकेन भाषणं कर्तव्याभीष्ट हारपदार्थकथनार्थं, मौहूर्तिकेन भाषणं तद्दिवसीय शुभाशुभग्रह-सम्पद्विज्ञानार्थम् । तदनु पश्चात् भूपः जिगीषुः सवत्सां धेनुं नव प्रसूतां गाम् (नि) " **धेनुस्स्यान्नवसूतिके**" त्यमरः यद्वा गाम् (नि) " **धेनुर्गोमात्र-केदाग्ध्यामिति**" हैमः । वृषभं बलीवर्धम् । वृषभः श्रेष्ठव्यषयोतिरिति मेदिनी प्रदक्षिणी कुर्यात् । वृत्तमार्याभेदो गीतिः ॥

श्लो **कृत्वा तथा प्रदक्षिण मेयादास्थानमण्डपं स्वीयम् ।**
कार्यार्थिनां जनानां सर्वेषां सुलभदर्शनो भवतु ॥ 29 ॥

In Public domain. Digitization Muthulakshmi Research Academy

कृत्वेति। तथा पूर्वोक्तप्रकारेण सवत्सायाः धेनोः वृषभस्य च प्रदक्षणं कृत्वा, राजा स्वीयां स्वकीयं आस्थानमण्डपं राजसभामण्डपं एयात् गच्छेत्। अज्पूर्वकादिणो विधिलिङ् प्रथमपुरुषैक वचनम्। किमर्थमास्थानमण्डपगमनमिति चेत्तत्राह। कार्यार्थिनां तत्तत्कार्यनिवेदनपरिष्कारादीनर्थयताम्। सर्वेषां जनानां सुलभं, सुखेन लभ्यं दर्शनं यस्य सः सुलभदर्शनः सुपूर्वाल्लभेः (सू) **"ईषद्दुसुषु कृच्छाकृच्छ्रर्थेषु खल्"** इति खलि (सू) **"लभेश्चेति"** सूत्रेण प्राप्तस्य नुमः नसदुर्भ्यां केवलभ्यामिति निषेधात् सुलभमितिरूपम् भवतु। वृत्तं गीतिः।

श्लो **अथवात्मबलानुकूल्यतो**
दिवसं रात्रिमपि क्षमापतिः।
प्रविभज्य विलोकयेत्क्रमा-
न्निजकार्याण्युदितानि भूपते! ॥ 30 ॥

औत्सर्गिकाः पूर्वोक्ता इमे अहोरात्रविभागाः कार्यद्रष्टा अन्यथा कल्प्यमाना अपि न दुष्यन्तीति अथो वेत्यादिना आह हे भूपते! अथवा यद्वा आत्मबलानुष्ठानशक्तिः तस्य आनुकूल्यतः आनुगुण्येन सार्वविभक्तिकः तसिः क्षमापतिःराजा, जिगीषुरित्यर्थः दिवसं दिनम्, रात्रिमपि प्रविभज्य उदितानि पूर्वोक्तानि निजकार्याणि क्रमात् विलोकयेत् पश्येत्। निर्वहेदित्यर्थः। वियोगिनी वृत्तम्। विषमे ससजा समे गुरु सभरालोऽथगुरु- र्वियोगिनी इति लक्षणात्।

श्लो **यदि प्रभुर्दुर्लभदर्शनो भवे-**
त्क्रियाकलापस्य भवेद्विपर्ययः।
अहङ्क्रियाविष्टमतीन् कथं स्पृशे
न्महीभृतां सन्निहितान् नयः प्रभो! ॥ 31 ॥

यदीत्यादिना राज्ञो दुर्लभदर्शनत्वे दोषमाह। हे प्रभो! राजन् प्रभर्जिगीषुः दुर्लभं दुःखेन लभ्यं दर्शनं यस्य सः दुर्लभदर्शनं (सूः) **"ईषद्दुस्सुषु**

In Public domain. Digitization Muthulakshmi Research Academy

कृच्छाकृच्छार्थेषु ख लिविदुष्पूर्वाल्लभेः खलि" (सू) लभे श्चेतिप्राप्तस्य नुमः (सू) **"न सुदुर्भ्यां केवलाभ्यामिति निषेधादुर्लभमिति"** रूपम् ।भवेत् यदि चेत् (नि) **" पक्षान्तरे चेद्यदि च"** इत्यमरः। क्रियाकलापस्य स्वकीयकार्या कार्यसमूहस्य(नि) **" कलावस्तुपमानयं काञ्ची तूणीसमूहेषु भूषणे बर्हि बर्हके"** इति केशवः। विपर्ययरूपो व्यत्यासःभवेत्। उत्तरार्धेन तादृश विपर्यासभवने हेतुमाह। अहङ्क्रियाविष्टमतीन् अहङ्काराविष्टमतीन् अहङ्काराविष्टहृदयान् महीभृतां राज्ञां सन्निहितान् समीपस्थितसेवकान् यद्वा सन्निहित बन्धून् नयः राजनीतिः कथं केन प्रकारेण स्पृशेत् । प्राप्नुयादित्यर्थः। राजावलम्बनप्राप्त- मदोन्मत्त्वात्तेषाम्। वृत्तं वंशस्थं जतौतु वंशस्थमुदीरितं जरौ ॥

श्लो **व्यत्यासोत्कृति वितती: प्रभो! प्रभुस्स्या**
द्द्वेष्यो वा प्रकृतिततेर्द्विषद्वशो वा ।
तद्धेतोः स्वयमखिलं च कार्यजातं
संपश्येत्सचिवपुरोहितादियुक्तः ॥ 32 ॥

व्यत्यासादिति हे प्रभो ! कृतिवितती: कार्यकार्यसमूहस्य व्यत्यासात् विपर्ययात् प्रभुः जिगीषुः प्रकृतिविततेः अमात्यादिना, समूहस्य **"स्वाम्यामात्याश्चराष्ट्रञ्चदुर्गं कोशो बलं सुहृत् । परस्परोपकारीदं सप्ताङ्गं राज्यमुच्यते"** इति। पौरश्रेणिभिस्सहराज्य मष्टाङ्गमिति च कामन्दकीये कथितम्। **स्वाम्यमात्यसुहृत्कोश राष्ट्रबलानि च राज्याङ्गानि । प्रकृतयः पौराणां श्रेणयोऽपि** च इत्यमरः। स्वामी राजा स्वामी पुरोहित इति श्रीधरःअमात्य मन्त्री सुहृत् मित्रम् कोशः सुवर्णरत्नादिमयोभाण्डारः राष्ट्रं जनपदवती भूमिः, दुर्गं पर्वतोदकादिभिर्दुर्गमं पुरम् । बलं सैन्यम् पौराणाम् श्रेणयः एक मुख्याः सजातीयानां समूहाः एतेऽष्टापि राज्याङ्गशब्देन

In Public domain. Digitization Muthulakshmi Research Academy

प्रकृतिशब्देन च वाच्या इत्यर्थः तदुक्तः कात्येन अमात्याद्याश्च पौराश्च सद्भिः प्रकृतयस्मृताः इति द्वेष्यः द्वेष्टुमर्हः द्विष अप्रीतावित्यस्मात् (सू) **ऋहलोर्ण्यदिति** ण्यत् वायिद्याद्विषद्यशोहि द्विषतां शत्रूणां **द्विषद्वेषणदुर्हृद** इत्यमरः। वशः अधीनो वा स्यात् भवेत्। स चासौ हेतुश्च तद्धेतुः तस्मात् तस्मात्कारणादित्यर्थः सचिवो मन्त्री दृष्टा दृष्टफलेषु कर्म सुपुरोऽग्रेधीयते स्म। पुरोहितश्च (सू) **निष्ठा** इति कर्मणिक्तः तस्मिन् विचरताम् आसक्तानां तापसानामित्यर्थः बालाश्च वृध्दाश्च आतुराः रोगिणश्च बालवृध्दातुराः तेषाम् आतोतोर्ती त्यमरः। आङ्पूर्वात् तुर त्वरणे इत्यस्मा ज्यौहोत्यादिकात् इगुपदज्ञाप्रीकरः इति क प्रत्यये साधुः यद्यप्ययं छान्दसो धातुः तथाऽपि छान्दसा अपि क्वचिद्भाषायां प्रयुज्यन्ते इति कैयटाद्युक्तदिशा अस्य लोके साधुत्वमुन्नेयम् । अत एवामरेण आमयीव विकृतोव्याधितोऽपटुः आतुरोभ्यमितोऽभ्यान्तं इत्युक्तम्। बहुभिर्महाकविभिः प्रयुक्तश्च आपन्नानाम् आपत्सु मग्नानां दुःखोपहतानामित्यर्थः। आपन्नआपत्प्राप्तस्या- दित्यमरः पशूनां तिर्यग्जातीनाम्। तिर्यग्जातौ पशुः प्रोक्तः प्राणिषु पुंस्ययम् । इति सुधा पशुमृगादौ भगले प्रमथे च पुमानयमिति रभसः गतिविरहवतां गतिरहितानां पोषकाभावात् पुण्यतीर्थस्थलानां सेवकपुण्यप्रदानां गंगादितीर्थानां काशी बदर्यादिपुण्यक्षेत्राणाञ्च योषाणां स्त्रीणाम्। स्त्रियोषिदबलायोषानारीत्यमरः कार्यं व्यवहारं क्रमेण अस्मिन् श्लोके उक्तेन क्रमेण अवकलयेत्परिशीलयेत् दधातेर्हिरितिश्च हिः सचिवपुरोहिता आदी येषां ते सचिवपुरोहितादयः तैरुक्तः सहितस्सन् प्रभुरित्यनुषज्यते स्वयम्। अखिलं सकलम्। कार्यजातं कृत्यनिचयम् स सम्पश्येत् सम्यङ्निरीक्षेत। वृत्तम् प्रहर्षणी **म्नौज्रौगस्त्रिदशयतिः प्रहर्षणीयमितिलक्षणात्**

In Public domain. Digitization Muthulakshmi Research Academy

श्लो **देवानां श्रोत्रियाणां तपसि विचरतां बालवृध्दातुराणा-**
मापन्नानां पशूनां गतिविरहवताम्पुण्यतीर्थस्थलानाम् ।
योषाणाञ्चक्रमेण प्रभुरवकलयेद्भूपते कार्यमादौ
सर्वाभ्योऽपि क्रियाभ्यःपुनरधिकगुणं यत्तदाहुर्महान्तः ॥ 33 ॥

देवानामित्यादिना राज्ञो विचारणीयकार्याणां क्रममाह । हे भूपते ! प्रभुः जिगीषुः देवानां देवतानां अर्थद्देवतासम्बन्धि पूजालयभूम्यादीनाम्। यश्चन्दो वेदमधीते सः श्रोत्रियः। (नि) **“श्रोत्रिय च्चान्दसौ समावित्यमरः”**। तेषां तपः कृच्छ्रचान्द्रायणादि व्रतम् यद्वौधर्मः(नि) तपस्तुनपिकृच्छ्रचान्द्रयणादौ धर्मसन्तापयोरपि। लग्नान्नवमराशौ च प्राहुस्सांवत्सरा इदम् शिशिरर्तौ त्वचिप्राहुश्शाश्वतः पुन्नपोः पुनः माघमासे इति केशवः यद्यप्यत्र श्लोके कौटिलीयार्थशास्त्रोक्तक्रमः किञ्चिद्विपर्यस्तस्तथाऽपि मुख्यविषयेषु विपर्यासो न कृतः तस्माद्देवताश्रमपाषण्डश्रोत्रियपशुपुण्यस्थानानां बालवृध्द व्याधित-व्यसन्यनाथानां स्त्रीणाञ्च क्रमेण कार्याणि पश्शेदिति यत् यस्मात् सर्वाभ्यः क्रियाभ्योऽपि राजकार्येभ्योऽपि अधिको गुणो यस्मिन् तत् अधिकगुणम् । पुनस्तु तत्पूर्वोक्त देवादिकार्यम् । आदौ प्रथमं कर्तव्यमिति शेषः। महान्तः महापुरषाः आहुः । स्रग्धरा वृत्तम् **म्रभ्नैर्यानां त्रयेण त्रिमुनि यतियुता स्रग्धरा कीर्तितेय**मिति लक्षणात् ॥

श्लो **अत्यावश्यकतामवेक्ष्य श्रुणुयात्सर्वञ्चकार्यं प्रभु-**
स्त्यक्त्वा प्रागुदितक्रमं सुसमये नैवं यदि स्याच्छ्रुतम् ।
कार्यं स्यात्सुतरामसाध्यमथवाकृच्छ्रेण साध्यम्भवेत्
ज्ञात्वा सर्वमिदं प्रभो प्रभवता कार्यो न कालात्ययः ॥ 34 ॥

अत्यावश्यकतामित्यादिना पूर्वोक्तक्रमस्यापवादमाह। हे प्रभो ! प्रभुः जिगीषुःकार्यस्येत्यादिः अत्यावश्यकताम् अतिमुख्यताम् उत्थायावश्यकं

In Public domain. Digitization Muthulakshmi Research Academy

कृत्वा मनुस्मृतिः (४-६३)। एतेष्वावश्यकस्त्वसौ कारिकावलिः इत्यादि प्रयोगानुसारेण आवश्यक शब्दस्य विशेष्यनिघ्नताप्यङ्गीक्रियते । पाणिनीये तु **ओरावश्यके** आवश्यकाधमर्ण्ययोर्णिनिः ण्य आवश्यके इत्यादिषु आवश्यक शब्दस्य आवश्यं भाव इत्येवार्थो वर्णितो भाष्यादिषु अवेक्ष्य दृष्ट्वा परिशील्यत इत्यर्थः। सुसमये प्रागुदितक्रमं पूर्वोश्लोकोक्तक्रमं त्यक्त्वा, सर्वं कार्यं श्रृणुयात्। एवम् इत्थं कार्यं यदि श्रुतम् अनुष्ठितमित्यप्यनुसन्धेयम् । न स्यात् तदा कार्यं सुतराम् अत्यन्तम् असाध्यम् । साधितुम् शक्यं स्यात् अथवा यद्वा, साध्यत्वेऽतिकृच्छ्रेण क्लेशेन, साध्यम् भवेत्। इदं सर्वं ज्ञात्वा प्रभवता वृध्दिं प्राप्नुवता जिगीषुणा कालस्य कार्यकरणयोग्यसमयस्य अत्ययः अतिपातः अतिक्रमणमित्यर्थः, न कार्यः । वृत्तं शार्दूलम् ।

श्लो **आचार्येण पुरोहितेन च युतश्चिह्नैः प्रभोर्वर्जितः ।**
प्रत्युत्थान नमस्क्रिया विरचयन् भक्त्यर्पितप्राञ्जलिः ॥
अग्रेर्धाम्नितपस्विनाञ्च विदुषाङ्कार्याणि पश्येन्नृप-
स्साम्राज्यं सकलम्प्रभो तदुभयायत्तं यतश्श्रूयते ॥ 35 ॥

आचार्येणेत्यादिना तापसविद्वत्कार्यपरिष्करणे विशेषं तत्र हेतुञ्च प्रतिपादयति आचर्यत इत्याचार्यः चरगतावित्यस्मात् ऋहुलोर्ण्यदितिण्यत् (श्लो) **उपनीय तु यश्शिष्यं वेदमध्यापयेद्द्विजः। साङ्गञ्चसरहस्यञ्च तमाचार्यम्प्रचक्षते** । इति मनूक्तलक्षणः ।आचार्यः यद्वा मन्त्र (वेद) व्याख्याता (नि)**मन्त्रव्याख्या कृदाचार्य** इत्यमरात् आचारं ग्राहयतीत्याचार्य इति निरुक्तोक्तेर्वैदिकाचारबोधको वा अत्राचार्य शब्दप्रयोगौपचारिक इति ध्येयम्। तेन पुरोहितेन पुरोधसा च युतस्सहितः प्रभोः राज्ञः चिह्नैः छत्रचामरादिभिः वर्जितः इदं गर्वराहित्यादि विनयप्रदर्शनार्थम्। प्रत्युत्थानं आसनादुत्थायागतान्प्रत्यभिमुखगमनम्। नमस्क्रियाः नमस्काराः ताः

In Public domain. Digitization Muthulakshmi Research Academy

विरचयन् कुर्वाणः भक्त्या अर्पितः कृतः प्राञ्जलिरञ्जलिर्येन सः भक्त्यर्पित-प्राञ्जलिः सन् विधेयविशेषणमेतत् नृपो राजा अग्रेर्धाम्नि अग्निगृहे आहिताग्नित्वाद्राज्ञः अग्निगृहस्यातिपवित्रत्वाच्च। तपस्विनां तपः एषामस्तीति तपस्विनः **तपस्सहस्राभ्यां विनीनी** इति विनिः तपस्वी तापसः पारिकाङ्क्षी त्यमरः तेषां विदुषां साङ्गत्रयीविदाञ्च कार्याणि पश्येत् विचारयेत् । हे प्रभो ! यतः यस्मात्कारणात् सकलं कृत्स्नं साम्राज्यम् । सम्यक् राजतीति सम्राट् (सू) **सत्सूद्विषेत्या**दिना सम्पूर्वकाद्राजेः क्विप् **मोराजिसमः क्वौ** इति समोमस्य मकारविधानमनुस्वारनिवृत्त्यर्थम्। येनेष्टं राजसूयेन मण्डलस्येश्वरश्चयः शास्त्रियश्चाज्ञयाराज्ञः स सम्राट् इत्यमरः । अत्र अमरव्याख्याकाराणां मतभेदो दृश्यते । तद्यथा राजसूय याजी सम्राट् केवलद्वादशराजमण्डलेश्वरोऽपि सम्राट् किञ्च केवलं सर्वनृपतीनां शासनोऽपि सम्राडित्यन्ये । सम्राजो भावः कर्म वा साम्राज्यम्। **गुणवचनब्राह्मणादिभ्यः ष्यञ् कर्मणि च** इति ष्यञ् तच्च तदुभयञ्च तदुभयं तपस्विनो विद्वांसश्च तस्य आयत्तम् (नि) **अधीनं अधीनोनिघ्न आयत्त** इत्यमरः श्रूयते श्रुत्या प्रोच्यते ततः पश्येदिति पूर्वेणान्वयः यदि तपस्विनस्याङ्गत्रयी विश्वकुप्येरंस्तदासर्वसाम्राज्यनाशोभवेदिति सकल-साम्राज्यस्य तदुभयायत्तत्वमुक्तम्। तथा बहवः कथाश्श्रूयन्ते श्रुति पुराणेतिहासादिषु । वृत्तम् शार्दूलम् ।

श्लो **उद्योगो यजनं क्षमा वितरणं कार्यस्थितेर्निर्णयो-**
दीक्षापूरकतासमव्यवहृतिर्मित्रेष्वमित्रेष्वपि ।
एतत्सर्वमिलापतेर्व्रतमिति प्राहुर्बुधाश्शास्त्रतः
शास्त्रज्ञेत्प्रमितिर्नृपोव्रतमिदं राजन्नुपेक्षेत कः ॥ 36 ॥

उद्योग इति उद्योगः नित्योत्थितत्वम् यजनम् क्रमानामनुष्ठानं क्षमा सहनम् । वितरणं दानं कार्याणां स्थितिः कार्यस्थितिः तस्याः

In Public domain. Digitization Muthulakshmi Research Academy

निर्णयोनिश्चयकरणम् दीक्षापूरकताम् अवभृथनिर्वर्तन- मिति यावत् मित्रेषु सुहृत्सु अमित्रेषु शत्रुषु अपि समव्यवहृतिः गुणदोषापेक्षया तुल्यं व्यवहरणम् । इत्येतत्सर्वं इलापतेर्भूपतेः व्रतं नियमः नियमोव्रतमस्त्रीत्यमरः इति शास्त्रतः शास्त्रमनुसृत्य बुधाः अर्थशास्त्रविदः प्राहुः ब्रुवन्ति । शास्त्रं शास्तीति शास्त्रम् शासु अनुशिष्टा विति धातोः **सर्वधातुभ्यः ष्ट्रन्** इत्यौणादिकः ष्ट्रन् वेदः तन्मूलकाः मन्वादिस्मृतयः शुक्र बृहस्पति कौटिल्यादिप्रणीतमर्थशास्त्रञ्चात्र-शास्त्रशब्देनोच्यन्ते । प्रमितिः **प्रमाज्ञानविषयं चेत् प्रमितिः प्रमेत्यमरः** हे राजन् इदं पूर्वोक्तं व्रतम्, कः नृपः जिगीषुः उपेक्षेत । नवोऽप्युपेक्षते वेदशास्त्रप्रमाणको राजेति भावः । वृत्तं शार्दूलविक्रीडितम् । **सूर्याश्वैर्मसजास्सतास्सगुरवश्शार्दूलविक्रीडितम्** इति लक्षणात् ॥

श्लो **प्रियं प्रजानां प्रियमेव राज्ञो**
हितम्प्रजानां हितमेव राज्ञः ।
प्रियं हितं वा नृपतेर्नकिञ्चित्
प्रभुः प्रजार्थं जनितः क्षितीन्द्र ॥ 37 ॥

प्रियमिति प्रजानां पाल्यमानजनानां (नि) **प्रजास्यात्सन्ततौ जने** इत्यमरः । यत्कार्यमितिशेषः । प्रियमभीप्सितं (नि) **अभीष्टेऽभीप्सितं हृद्यं दयितं वल्लभं प्रियमित्यमरः** तदेवराज्ञः जिगीषोः प्रियम् हृद्यम् । प्रजानां यत् कार्यं, **हितं पथ्यं हितं पथ्येगते धृते इति** मेदिनी । तदेव राज्ञः हितं पथ्यं प्रभुः जिगीषुः राजेत्यर्थः यत इत्यध्याहार्यम् । प्रजार्थं ब्रह्मणेति शेषः जनितः उत्पादितः ततः नृपतेर्जिगीषोः प्रियं हितं वा आत्मसम्बन्धीत्यनुसन्धेयम् । किञ्चित् कार्यम् । तन्नास्ति तदुक्तमर्थशास्त्रे कौटिल्येन **"प्रजासुखे सुखं राज्ञः प्राजानान्तु प्रियं हितम्"** इति । वृत्तमुपेन्द्रवज्रा ।

श्लो **ततः प्रजार्थं प्रभुरर्थमूलं समाश्रयेदुद्यममार्यतुल्यम् ।**
अनुद्यमन्तावदनर्थमूलमनार्यतुल्यं धरणीन्द्र ! जह्यात् ॥ 38 ॥

In Public domain. Digitization Muthulakshmi Research Academy

तत इति हे धरणीन्द्र ! हे भूपते ! ततः जिगीषोः प्रजाप्रियहित-साधतिरिक्त कार्यस्याभावात् प्रभुः जिगीषुः प्रजार्थम् प्रजायै अयं प्रजार्थः तं प्रजार्थमित्यस्वपदविग्रहः। (वा) **अर्थेन नित्यसमासो विशेष्यलिङ्गता च वक्तव्यमि**ति वार्तिकात् प्रजाप्रियहित कार्यसाधकमित्यर्थः। अर्थमूलं अर्थस्य अर्थसिध्देः मूलं कारणम् उपायभूतमित्यर्थः। (नि) **मूलन्तु न प्यन्ये पुंस्यप्यादि समीपयोः नक्षत्रभेदे पादे च भूरुहाणां वशीकृतौ स्वीये च कारणे च** इति केशवः। आर्यस्य पूज्यजनस्य, तुल्यः सदृशः तम् आर्यतुल्यम्। अत्र (सू) **षष्टी** इत्यनेन षष्टीतत्पुरुषः, तृतीयातत्पुरुषस्तु न भवति विधायकाभावात् **पूर्वसदृशसमोनार्थकलहनिपुणमिश्रश्लक्ष्णैः** इत्यत्र सदृशेति स्वरूपग्रहणम्। नत्वर्थग्रहणम् । तुल्यशब्दयोगे षष्टी तु तुल्यार्थ्यैरतुलोपमाभ्यां तृतीयान्यतरस्यामिति भवति। एकमेव अनार्यतुल्यामित्यत्रापि षष्ठी समासोबोध्यः उद्यममुद्योगम् समाश्रयेत् सम्यगाश्रयेत्। अनर्थमूलं अनर्थस्य अर्थसिध्यभावस्य विनाशस्य च मूलं कारणम् हेतु भूतमित्यर्थः अनार्यस्य दुर्जनस्य तुल्यः सदृशः अनार्यतुल्यः तम् अनार्यतुल्यम्।अनुद्यमं तावत् अलसत्वा दुद्योगस्य अकरणन्तु जह्यात् त्यजेत्। जहोक् त्यागे इत्यस्माज्जुहोत्यादिकाद्विधिलिङि प्रथमपुरुषैकवचने (सू) **लोपो यि** इत्यनेन लोपे जह्यादितिरूपम् । तदुक्तं कौटिल्येन **"अनुत्थाने ध्रुवोनाशः प्राप्तस्यानागतस्य च । प्राप्यते फलमुत्थानाल्लभते चार्थसम्पदम्"**। इति अनुत्थाने अलसत्वादिना उद्योगस्याकरणे उत्थानात् उद्योगात् ।वृत्तम् उपेन्द्रवज्रा ।

In Public domain. Digitization Muthulakshmi Research Academy

आत्मरक्षणम्

श्लो **राजा निजाङ्गपरिरक्षकमाददीत**
प्राप्तं निजान्वयपरम्परयाऽनुरक्तम् ।
दृष्टक्रियं विहितशिक्षणमाभिजात्य
युक्तानुबन्धिनमिलेश न चेत्प्रमादः ॥ 39 ॥

सतिकुड्ये चित्रकर्मेति न्यायेन सर्वकार्यसाधनमूलभूतं राज्ञश्शरीररक्षणं राजा निजाङ्गेत्यादिभिस्त्रिभिः श्लोकैराह हे इलेश ! । राजा जिगीषुः निजान्वयपरम्परया निजः आत्मीय श्चासौ अन्वयो वंशश्च निजान्वयः (नि) **सन्ततिर्गोत्रजननकुल्यान्यभिजनान्वयावंशोऽन्ववायस्सन्तान** इत्यमरः। तस्य परम्परा पारम्पर्यम् । परम्परेत्यव्युत्पन्नं प्रातिपादिकम् । तदुक्तम् अन्ये तु परम्पराशब्दञ्चर्यामपि अत एव स्त्रीलिङ्गमेकवचनञ्च पारम्पर्यमित्यपि तस्मादेव स्वार्थे ष्वञ् भवतीत्युक्तम् । मन्त्रिपरम्परामममान्त्रं भावत्तीतीप्रयोगः व्युत्पन्नं प्रातिपदिक माचक्षीत इति भाष्यप्रदीपे ।पदमयद्वा परं पर्तीति परम्परा **पचाद्यच्** **स्त्रिया**- मदन्तत्वाट्टाप् श्वपचाजारभरेत्वादि वत्सोदरादिरित्यमरसुधा तया स्वीयपितृपितामहादिश्रमेण प्राप्तम्। अनुरक्तं राज्ञि अविचाल्यानुरागयुक्तम्। दृष्टक्रियम् दृष्टा क्रिया अनुरक्तपुरुषोचितं कर्म यस्य तम्, विहितशिक्षणं शिक्षितविद्यम्। आभिजातस्य भावः आभिजात्यम् सत्कुलप्रसूतिः **गुणवचनब्राह्मणादिभ्यः कर्मणि चेति** ष्यञ् तेन युक्ताः सहिताः महाकुलप्रसूता इत्यर्थः। तेषाम् अनुबन्धः वंशसम्बन्धानानुवृत्तिः अस्यास्तीत्यनुबन्धी **अत इनि** ठनावितीन् तम् जनम् निजाङ्गपरिरक्षकं निजस्य स्वकीयस्य अङ्गस्य शरीरस्य(नि)**अङ्गं गात्रे प्रतीकोपाययोः पुंभूम्नि नीवृति क्लीबैशत्वेत्वीप्रधाने त्रिष्वङ्गवतिचान्तिके** इति मेदिनी परिरक्षकं परितोरक्षकम्। आदधीत आदध्यात् न चेत् पूर्वोक्तलक्षणं राजास्य

In Public domain. Digitization Muthulakshmi Research Academy

स्वस्वाङ्गरक्षकं यदि न कुर्यात् किञ्च अकृतार्थसत्कारं वैदेशिकं वा पूर्वमपकृत्य पश्चात्पुनर्गृहीतं स्वदेश्यं वा यदि कुर्यात् ।तदा प्रमादः आपत् आपतेदित्यध्याहार्यम् । वसन्ततिलकावृत्तम् । लक्षणन्तूक्तम् ।

श्लो **दत्त्वा बलिं प्रथमग्निपतत्त्रिवक्त्रे**
ज्ञात्वा ततोऽपि बहुधा विषलक्षणानि ।
भुञ्जीत शुद्धमशनं प्रभुरौषधादीन्
सेवेत तत्प्रदजनैः परिशीलितांश्च ॥ 40 ॥

दत्त्वा बलिमित्यादिना भोज्यपदार्थाः विषदूषितानिवेति ज्ञात्वा सेव्या इत्याह । प्रभुः जिगीषुः प्रथमं स्वभोजनात्प्राक् अग्निश्च पतत्त्रिणां पक्षिणाम् (नि)**पतत्रि पत्त्रिपतगपतत्त्र रथाण्डजा** इत्यमरः। वक्त्रं मुखं च अनयोस्समाहारः । अग्नि पतत्त्रिवक्त्रम् तस्मिन् **तद्धितोत्तरपदसमाहारे** चेति समाहारः नपुंसकत्वमेकत्वं च चितिं दत्वा ततः अग्नि पक्षिबलिदानात् बहुधा बहुप्रकारैः विषलक्षणानि विषचिह्नान्यपि ज्ञात्वा विदित्वा शुध्दं विषदोष-रहिताम् अशनमन्नं भोज्यं वस्तुञ्च भुञ्जीत भक्षयेत् एवम् औषधादीन् भैषज्यमद्यपानीयादींश्च तत्प्रदजनैःऔषधपानीयादिप्रदातृजनैः परिशीलितान् राजसमक्षं स्वयम्भुक्त्वा परीक्षितान् सेवेत अग्निपक्षिणां बलिदानं विहितवैश्वदेव पक्षिबलिदाना नुष्ठानार्थम् विषप्रतीकारार्थञ्च विषयुक्त-पदार्थचिह्नानि यथा विषदूषितमन्नमग्नौ निक्षिप्तं ज्वालानां धूमस्य च नैल्यं चिटचिटशब्दञ्च जनयेत्। पक्षिभिर्भुक्तं तत्प्राणान् हरेत् मयूरग्रीवावन्ने च कवर्णमूष्मणं जनयेत्। सद्यश्शीतं हस्तसम्पिष्टमिव विवर्णं सोदकमसम्यक्पाकञ्च भवेत्। सूपादि व्यञ्जनान्यशुष्काणि अग्नियोगे तक्रादीनामिवोत्क्वथनयुक्ताः भक्तश्यामफेनपटलानि नष्टगन्धस्पर्शरसानि च भवेयुः । विषययुक्तेषु यूपादिद्रव्येषु हीनाधिकस्वीयच्छायादर्शनं फेन पटलस्य

In Public domain. Digitization Muthulakshmi Research Academy

यूषादिभ्यो विभक्ततयावस्थानस्य दर्शनमुपरिरेखा दर्शनञ्च भवेत्। विषयुक्तस्य सर्पिस्तैलेक्षुरसादेर्मध्ये नीलाक्षीरस्य मध्ये ताम्रा मध्यस्य सलिलस्य च मध्ये काली दध्नोमध्येवैदूर्य वर्णमधुनो मध्ये श्वोता च राजिर्भवेत्। विषयुक्तानां चूतदाडिमफलादीनामार्द्राणामाशु प्रम्लानत्वमतिपक्वानामिव पूतिगन्धः क्वाथे- नीलकपिशवर्णत्वञ्च भवेत्। शुष्काणामाशु चूर्णभावः वैवर्ण्यञ्च भवेत्। कठिनानां मार्दवं मृदूनां काठिन्यञ्च भवेत् विषयुक्तवस्तुसमीप-चारिणाम्पिपीलिकादिक्षुद्रजन्तूनां मरणञ्च भवेत् एवमादीन्यन्यान्यपि लक्षणानि शास्त्रतो विजानीयात्।

श्लो **संस्थापयेदुभयतोऽपि च राजमार्गे**
रक्षाभटान्निजगतागतयोर्महीन्द्रः।
नैकाकितामुपगतोनिवसेज्जनौघे
रक्षेत्स्वदेहमखिलैर्यतनैश्च राजन्! ॥ 41 ॥

संस्थापयेदिति हे राजन्! महीन्द्रो जिगीषुः गतञ्च आगतञ्च गतागते गमनागमाने निजस्वकीये च ते गतागते च तयोः निजगतागतयोः राजमार्गमुभयतोऽपि घण्ठापथस्य उभय पार्श्वयोरपि(वा) **उभसर्वतसोः कार्या धिगुपर्यादिषु त्रिषु द्वितीयाऽम्रेडितान्तेषु ततोऽन्यत्रापि दृश्यते** इति द्वितीया। रक्षकभटान् रक्षायाः रक्षणे भटाः योधाः रक्षाभटाः तान् अश्वघासादिवत् तादर्थ्ये षष्टीसमासः यद्वा रक्षाधिकृता भटा रक्षाभटा इति शाकपार्थिवादित्वान्मध्यमपद लोपीसमासः (नि)**अथ रक्षास्याल्लाक्षारक्षण भस्मसु** इति केशवः। संस्थापयेत् सम्यक् स्थापयेत्। एकाकितां असहायताम् (सू) **एकादा किनिच्चासहाये** इति एकशब्दादाकिनिच् प्रत्यये एकाकीति रूपम् उपगतः प्राप्तस्सन् जनौघे जनसमूहे न निवसेत् न तिष्ठेत्। स्वस्य आत्मनो देहं स्वदेहम्, स्वोज्ञातावात्मनि स्वं त्रिष्वात्मीये स्वोऽस्त्रियां धवे इत्यमरः। अखिलैः सकलैः यतनैः अर्थशास्त्रोक्तप्रयत्नैः रक्षेत् पालयेत्

In Public domain. Digitization Muthulakshmi Research Academy

अनेनास्मिन् काव्येऽनुक्तं दारपुत्रादिभ्यश्शरीररक्षणमर्थशास्त्राज्ज्ञात्वा कर्तव्यमिति सूचितम्। वृत्तम् वसन्ततिलका।

जनपदनिवेशः

श्लो **ग्रामान् यथाशक्ति यथाविधानं**
निर्माप्य तत्सीमसुरक्षणार्थम् ।
संस्थापयेत्सेतु नदीशिलौघान्
वटादिवृक्षानपि राजमौले ! ॥ 42 ॥

राज्यनिर्माणरक्षणोपयोगिग्रामनिर्माणादिरूपं जनपदनिवेशं ग्रामा नित्यादिभिस्सप्तभिश्श्लोकैराह। हे राजमौले ! राजश्रेष्ट ! जिगीषुरित्यध्याहार्यम्। शक्तिमनतिक्रम्य यथाशक्ति(सू) **अव्ययं विभक्ती-पदार्थानतिवृत्तिरूपेयथार्थेऽव्ययीभावः योग्यतावीप्सापदार्थानतिवृत्ति-सादृश्यानि यथार्थाः** इत्युक्तेः विधानं निर्माणविधिम् अनतिक्रम्य यथाविधानं पूर्ववत्समासः ग्रामान् शूद्रकर्षकबहुलाः गृहशतानवराः पञ्चशताधिक-गृहयुताः एकक्रोशसीमानो वा द्विक्रोशसीमानो वा अन्योन्यरक्षाकरणक्षमाः ग्रामाः तान् निर्माप्य तेषां ग्रामाणां सीमान आघाटाः तत्समानः तासु तत्सीमसु ग्रामान्तेष्वित्यर्थःमानः इति च ङीप् रक्षणार्थम्। रक्षणाय इदम् रक्षणार्थम् **अर्थे नित्यसमासो विशेष्यलिङ्गताचतिवक्तव्यमि**ति नित्यसमासः तत्तद् ग्रामसीमारक्षणायेत्यर्थः सेतुः आलिश्च (नि) **सेतुरालौस्त्रियां पुमानित्यम**रः नदी च शिलौघाः शिलाकूटाश्च सेतुनदीशिलौघाः तान् वटः न्यग्रोधः आदिर्येषां ते वटादयःवटादयश्च ते वृक्षाश्च वटादिवृक्षाः तान् अपि आदिशब्दात् वन, वृष्टि शाल्मली शमीप्रभृतयो ग्राह्यः संस्थापयेत् सम्यक् स्थापयेत् अत्र ग्रामनिर्मापणोत्त्या तदुपयोगिस्थानीय, द्रोणमुख, कार्वटिक, सङ्ग्रहणाख्य जनपदनिर्मापणं दुर्गनिर्मापणनिवेशादिकमप्यावश्यकमिति समुचितम्। तत्र

In Public domain. Digitization Muthulakshmi Research Academy

जनपदनिर्माणस्वरूपादिकं यथाअष्टशतग्रामसमूहस्य मध्ये तदीयजनतायाः क्रयविक्रयादिकर्मणोपजीव्यं रमणीयं महाग्रामं स्थानीयनामानं निर्मापयेत्। चतुश्शतग्रामसमूहस्य मध्ये तदीयजनतायाः क्रयविक्रयादिकर्मणोपजीव्यं स्थानीयप्रत्यवरं द्रोणमुखाख्यं ग्रामभेदं निर्मापयेत्। द्विशतग्राम समूहस्य मध्ये तदीयजनतायाः क्रयविक्रयादिकर्मणोपजीव्यं द्रोणमुखादवरं कार्वटिकाख्यं कार्वटापरपर्यायं ग्रामभेदं निर्मापयेत्। दशग्रामसमूहस्य मध्ये तदीयजनतायाः क्रयविक्रयादि कर्मणोपजीव्यं रमणीयं महासङ्ग्रहणाख्यं महाद्राङ्गौ परपर्यायं ग्रामभेदं निर्मापयेत् । इत्थं निर्मापितानां जनपदानामन्तेषु तेषां द्वारभूतान्यन्तपालदुर्गाण्यन्तपालाधिष्ठितानि निर्माप्य तद्दुर्गाणा-मन्तरालदेशान् वागुरिकुशबरपुलिन्दचण्डालादिभी रक्षयेत्। अत्र ग्रन्थविस्तरसभयात्परित्यक्तदुर्गनिर्मापणनिवेशादितमन्यतोऽवगन्तव्यम्। वृत्तमुपजातिः। १.वगुराभिर्मृग बन्धनैजीविनः २.शूद्राद्भिल्ल्यां जाताश्शभराः ३.निष्ठ्यात्किरात्यां जाताः पुळिन्दाः ४.श्मशानपालाश्चण्डालाः ५.अरण्यचरादयः आदिशब्दाः ग्राह्याः।

श्लो **दद्यात्प्रभुश्श्रोत्रियबाडबेभ्यः**
पुरोहिताध्यापकयाजकेभ्यः।
क्षेत्राण्यदण्डान्यकराणि राजन्
सुखेन भोग्यान्यखिलाधिकारैः ॥ 43 ॥

दद्यादिति हे राजन् ! प्रभुर्जिगीषुः श्रोत्रियाश्चन्धोऽध्येतारः छन्दश्शब्दाद् द्वितीयान्तात्तदधीत इत्यर्थे घन् प्रकृतेश्श्रोत्रादेशश्च (सू) **शोत्रियंश्चन्धोऽधीते** इत्यनेन वा निपात्यते ते च ते बाडबा ब्राह्मणाश्च श्रोत्रियबाडबाः (नि) **"द्विजात्यग्रजन्म भूदेवबाडबाः विप्रश्च ब्राह्मण"** इत्यमरः। तेभ्यः श्रोत्रिय बाडबेभ्यः(सू) **चतुर्थी सम्प्रदाने** इति च चतुर्थी पुरोहिताः पुरोधसश्च अध्यापका उपाध्यायाश्च (नि)

In Public domain. Digitization Muthulakshmi Research Academy

उपाध्यायोऽध्यापकस्स्यादित्यमरः। याजकाः अग्नीध्रादिऋत्विजश्च (नि) **आग्नीध्राद्याधनैर्वार्या ऋत्विजोयाजकाश्चते** इत्यमरः। पुरोहिताध्यापकायाजकाः तेभ्यः न विद्यते दण्डो द्वित्रिवारं कृषिकरणादिनिमित्तः कुल्यादि जलात्युपयोगनिमित्तो वा दमः येषां तानि अदण्डानि करो बलिः, कृषिफलस्य षष्ठांशः **"बलिहस्तांशवः करा"** इत्यमरः। न विद्यते येषां तानि अकराणि अखिलाश्चते अधिकाराश्च अखिलाधिकाराः विक्रयादिदानवंशपारम्पर्यानुभवादयोऽधिकाराःतैः सुखेन शर्मणा भोग्यानि भोक्तुम् अनुभवितुम् अर्हाणि भुजपालनाभ्यवहारयोरितिधातोः ऋहलोर्ण्यतिकुत्त्वञ्च स्थानकलत्रयोः इति विश्वःदद्यात् प्रयच्छेत् । वृत्तमुपजातिः।

श्लो **अनीगस्थानिकजाङ्घिकानां**
सङ्ख्यायकाध्यक्षभिषङ्मुखानाम् ।
अविक्रियाधिद्वितयाधिकारं
क्षेत्राणि दद्यात् प्रभुरुर्वरेन्द्र ॥ 44 ॥

अनीकगेति हे उर्वरेन्द्र ! हे भूपते ! **उर्वरातु भूमात्रे सर्वसस्याढ्य भुव्यपीति** हेमचन्द्रः, प्रभुर्जिगीषुः अनीकेन गच्छन्तीत्यनीकगाः (वा) **अन्यत्रापि दृश्यत** इति वक्तव्यमित्यनेन **गमेर्डः** डित्वसामर्थ्यादभस्यऽपि टेर्लोपः अनीकगशब्देन अनीकस्था लक्ष्यते। अनीकस्थाः गजशिक्षाभिज्ञाः (नि)**अनीकस्थोरणगते हस्तिशिक्षा विचक्षणे। राजरक्षिणि चिह्ने च वीरमर्दनकेऽपि चे**तिमेदिनी । स्थानिकाः नगरचतुर्भागाधिकारिणः जङ्घाभ्यां जीवन्तीति जाङ्घिकाः (सू) **वेतनादिभ्यो जीवतीतिठक्** जाङ्घिकाः जङ्घ-करिकाः दूरदेशगमनागमनजीविनः। **जाङ्घाकरिक जाङ्घिका** दित्यमरः तेषां सम्प्रदानस्य शेषत्वविवक्षायां (सू) **षष्ठी शेषे** इति षष्ठी सङ्कल्यतीति (सू)

In Public domain. Digitization Muthulakshmi Research Academy

ण्वुल्तृचावितिण्वुलि **आतोयुक्चिण् कृतो**रिति युगागमे सङ्ख्यायक इति रूपम्। सङ्ख्यायका गणकाः अध्यक्षाः सुवर्णाध्यक्षप्रभृतयः अध्यक्षनियोजने व्याख्याने विवृताः। भिषजो वैद्याः **भिषग्वैद्यश्चिकित्सके** इत्यमरः। सङ्ख्यायकाध्यक्षभिषङ्मुखाः तेषां पूर्ववत्सम्प्रदानस्य शेषत्वविवक्षायां षष्ठी। अत्र मुखशब्देन गोपाश्वदमकप्रभृतयोग्राह्याः गोपोदशग्रामसमूहाधिकारी यद्वापञ्चग्राम समूहाधिकारी वा अश्वदमकः अश्वशिक्षाभिज्ञः अविक्रय-मूल्यमादाय द्वितीयाधिकारं।

दानं विक्रयः आधीकरणमाधिः एतद्वितयसम्बिन्धी अधिकारः न विद्यते विक्रयादि द्वितीयाधिकारः यस्मिन्कर्मणि तद्यथा भवति तथा अविक्रयादिद्वितयाधिकारं। क्रियाविशेषणमेतत्। क्रियाविशेषणानां नपुंसकत्वं द्वितीयैकवचनान्तत्वमव्ययत्वक्षेत्राणिञ्च दद्यात् केवलमुपभोगाय दद्यादित्यर्थः। वृत्तमुपजातिः।

श्लो **नीतं क्षेत्रं सौष्ठवं देयमेव**
स्वाम्यं दत्त्वा भागधेयप्रदातुः।
राजन् क्षेत्रं सौष्टवाधायकेभ्यो
नैवाऽदद्याद्भागधेयप्रदेभ्यः ॥ 45 ॥

नीतमिति हे राजन् जिगीषुः सौष्ठवं सुष्टुत्वम् तस्य भावः इत्यर्थे सुष्ठु इत्यस्मात् **प्राणभृज्जातिवयोवचनोद्गात्रादिभ्योऽञ्** इत्यनेन अञ् प्रत्यये वृध्दिगुणयोः कृतयोस्सौष्टवमिति रूपम्। उद्गात्रादिषु सुष्ठुशब्दः पठितः नीतं प्रापितम्।ग्राहकस्य दानात्पूर्वमेव प्राप्त सौष्ठवमित्यर्थः क्षेत्रं व्रैहेयकरस्य प्रदातुरेव कारोभिन्न क्रमः(नि)**भागदेयः करोबलि**रित्यमरः स्वाम्यं ग्रहीतृपुरुषेणैकेनैवभोक्तुमधिकारं दत्वा धेयम् वंशपारम्पर्यानुभव-दानविक्रयाद्यधिकारवर्जं देयमित्यर्थः। क्षेत्रं साध्यसौष्ठवं गृह्णीयाद्राजेति भावः।वृत्तम्।शालिनी शालिन्युक्ताम्तौतगौ गोऽब्धिलोकैरिति लक्षणात्।

In Public domain. Digitization Muthulakshmi Research Academy

श्लो **असाधनानान्तु कृषीवलानां**
भवन् प्रभो! द्रव्यमुखैस्सहायः ।
ततः स्वदत्तं कृषिलब्धलाभा-
त्करेण साकं प्रभुरभ्युपेयात् ॥ 46 ॥

असाधनानामिति हे प्रभो! प्रभुर्जिगीषुः असाधनानां पशुशकटा –दिकृषिसाधनरहितानां कृषीवलानां कर्षणं कृषिः कृष विलेखने इत्यस्मात् (वा)**इक्कृष्यादिभ्यः**इतीक् कृषिरस्यास्तीति मतुबर्थे(सू) **रजः कृष्यासुतिपरिषदोवलच्** इतिवलचि (सू)**वले** इति दीर्घे कृषीवल इति रूपम्। (नि)**क्षेत्राजीवः कर्षकश्च कृषकश्च कृषीवल** इत्यमरः। तेषां कृषीवलानां तु द्रव्यं मुखं आदिः येषां तैः द्रव्यमुखैः द्रविणपशुधान्यादिभिः सहायः साहाय्यकृत् भवन् सन् ततः फलनिष्पत्त्यनन्तरम्। स्वेन दत्तम् स्वदत्तम् द्रविणादि- कम् ।कृषेर्लब्धो यो लाभः तस्मात् कृषिलब्धलाभात् करेण राजदेय बलिना साकं सह(नि) **साकं सत्रासमं सहे** त्यमरः। वृत्तम् उपेन्द्रवज्रा ।

श्लो **प्रभो! तरूणाञ्च वनं गजानां**
व्रजप्रचारान् स्थलवारिमार्गान् ।
निवेशयेदाकरकर्मदेशान्
नृपः स्थलानि क्रयविक्रयाणाम् ॥ 47 ॥

प्रभो इति हे प्रभो! नृपः जिगीषुः तरूणां दारुचन्दननिर्यासा-ध्युपकरणप्रसवक्षमाणां वृक्षाणां वनं काननानि जातावेकवचनम्। गजानां करिणां , वनमरण्यानि व्रजप्रतारान् गोमहिषमजाविकं खरोष्ट्रमशाश्वत-रास्थलमार्गान् जलमार्गान् आकरकर्मदेशान् रत्नभ्रकलवणाद्युत्पत्तिस्थान-भूतखनीनां व्यापारस्थानानि (नि) **आकरस्तु समूहे स्यादुत्पत्ति स्थान एव च**

In Public domain. Digitization Muthulakshmi Research Academy

स्याद्रत्नलवणादीना मिति केशवः। क्रयविक्रयाणां मूल्यं दत्त्वा वस्त्वादीनां स्वीकारः क्रयः मूल्यं गृहीत्वा वस्त्वादीनां दानं विक्रयः तेषां स्थलानि पण्यवीथिका इत्यर्थः निवेशयेत् स्थापयेत् । वृत्तमुपेन्द्रवज्रा ।

श्लो **निबध्य सेतून् विरचय्य कुल्या-**
नदीजलं वाऽद्रिजलं द्रुयं वा ।
प्रवर्तयेत प्रभुराज्ञयैव
क्षेत्रेषु सस्यर्थिकृते नरेन्द्र ! ॥ 48 ॥

निबध्येति हे नरेन्द्र प्रभुः–जिगीषुः आज्ञयैवशासनेनैव सेतून् आलीः नदीनदादीनामितिशेषः निबध्य बन्धयित्वेत्यर्थः तुल्याः-अल्पाः कृत्रिमास्सरितः (नि) " **कुल्याऽल्पा कृत्रिमासः**" दित्यमरः। विरचय्य खातयित्वा सस्यानां ऋध्दिः-समृद्धिः सस्यर्धिः करणं कृत् डुकृञ् करणे इति भावे क्विप् सस्यर्थे कृत् सस्यर्थ कृत् तस्मै सस्यर्द्धिकृते सस्यानां समृध्दर्थमित्यर्थः। (वा)**तादर्थ्ये चुतर्थी वाच्येति** चतुर्थी क्षेत्रेषु –व्रीहियवशाल्यादि केदारेषु नदी जलं वा अद्रिजलं निर्झरमपि प्रवर्तयेत प्रसारयेत् । वृत्तमुपजातिः ।

अध्यक्षनियोजनम्

श्लो **एकैकस्मिन् कर्मणि प्रज्ञयाढ्यं**
कुर्याद्राजाऽध्यक्षमेकैकमीश ।
नो चेन्नानाकर्म साङ्कर्यहेतो-
र्वैशम्यं स्याद्राज्यवृत्तिक्रमस्य ॥ 49 ॥

वनादिपालनकर्मसु ग्रामाध्यक्षो दुर्गापूर्वोक्तग्रामतरुरध्यक्षः कोशाध्यक्षो, हस्त्यध्यक्षो, गवाध्यक्षो, गाणनिक्याध्यक्ष, सुवर्णाध्यक्ष, इत्येवं रीत्या प्रत्येक मेकैकमध्यक्षान् राजा योजयेत्। यद्येवं न कुर्यात्तदा नानाविधानां

In Public domain. Digitization Muthulakshmi Research Academy

नाना प्रदेशस्थानां नानाविधजनसाध्यानां कर्मणां साङ्कर्यसम्भवाद्राज्यप्रवर्तनस्य हानिर्भवेदतःकर्माध्यक्षनियोजनमवश्यं कार्यमित्याह। एकैकस्मिन्नित्यादिना ईशो राजा जिगीषुः हेप्रभो! एकैकस्मिन् नैकस्मिन् कस्मिन् (सू)**नित्यवीप्सयो**रित्येकशब्दस्य द्विर्भावः एकं बहुव्रीहिवत् इति बहुव्रीहिवद्भावात्सुपो लुक्। इह द्वयोरपि सुपोर्लुकि कृते बहुव्रीहिवद्भावादेव **कृत्तध्दितसमासाश्चे**ति प्रातिपदिकासमुदायात्सुप् । अत्र **न बहुव्रीहावि**ति सर्वनामसंज्ञा निषेधस्तु न भवति। भाष्यकारमते तत्सूत्रस्य प्रत्याख्यातत्वात् सूत्रकारमतेऽपि बहुव्रीह्यर्थेऽलौकिके विग्रहवाक्य एव सर्वनामसंज्ञा निषेधकमेतत्सूत्रम्। न तु बहुव्रीहौ अतः एकैकस्मै एकैकस्मिन्नित्यादि प्रयोगास्साधवः। कर्मणि कार्ये प्रज्ञया त्रिकालज्ञया धिया आढ्यः युक्तमित्यर्थः एकैकम् एकमेकम् अध्यक्षम् अधिकृतम् **अध्यक्षाधिकृतौ समा**वित्यमरः। कुर्यात् स्थापयेत् नोचेत् एवमध्यक्षनियोजनमेकैकस्मिन् कर्मणि न कृतं चेत् नानाकर्मसाङ्कर्यहेतोः नानाविधप्रदेशस्था नानाविधजनसाध्यानां कर्मणां साङ्कर्यस्य सम्भवाद्धेतोः राज्यवृत्तिक्रमस्य राज्यप्रवर्तनक्रमस्य वैषम्यं विषमत्वं हानिरित्यर्थः स्यात् भवेत्। शालिनीवृत्तम्। **शालिन्युक्ताम्तौ तगौ गोब्धिलोकै**रितिलक्षणात्।

अध्यक्षादीनाम्परीक्षणम्

श्लो **सर्वारम्भाः कोशमूला भवेयु-**
स्तस्माद्राजा वर्धयेत्कोशमादौ ।
सङ्ख्यावद्भ्यः कोशवृध्देरुपायान्
सम्यग्जानञ्छास्त्रसिध्दान्नवाऽपि ॥ 50 ॥

अथ तन्त्रावाससे स्वराष्ट्रपरराष्ट्रचिन्तासम्बध्दाना सर्वकार्याणां कोश-मूलकत्वादादौ राज्ञा कोशवृद्धिक्षयाधिकमवश्यम्परिशीलनीयमिति सर्वारम्भा

In Public domain. Digitization Muthulakshmi Research Academy

इत्यादिभिष्षड्भिश्लोकैराह ।सर्वारम्भाःसर्वे च ते आरम्भाश्चसर्वारम्भाः जनपदनिवेशादीनां सन्धिविग्रहादीनाञ्च सर्वेषां कार्याणामुपक्रमः कोशः धनसञ्चयः मूलं निमित्तं येषां ते कोशमूलाः । (सू) **शेषाद्विभाषेति** कच्चिकल्पः भवेयुः तस्मात् राजा जिगीषुः आदौ प्रथमं सङ्ख्यावद्भ्यः अर्थशास्त्र-पण्डितेभ्यः शास्त्रसिध्दान् अर्थशास्त्रोक्तान् कोशवृध्देः उपायान्-मार्गान् नवापि नवसङ्ख्याकानपि सम्यक् जनान् वर्धयेत् वृध्दिं प्रापयेत् । नवकोशा वृध्युपाया यथा प्रतापसमृध्दिः जनपदसम्पत् चरित्रानुग्रहः देशजातिकुलाचाराणां पूर्वस्थितिमनतिक्रम्य परिपालनम् इत्थं पालने कृते सन्तुष्टाः प्रजा राज्ञः कोशं वर्धयेयुः चोरग्रहः तस्करवधः तत्सकाशाच्चोरित-धनग्रहणं च। युक्तप्रतिषेधः तत्तत्कार्यनियुक्तानामध्यक्षाणां राजधनापहरणात्, उत्कोचग्रहणे प्रजापीडनाच्च वारणम्। सस्यसम्पत् नानाविधधान्यसमृध्दाः पण्यबाहुल्यम्जलजातानां स्थलजातीनाञ्च विक्रीय द्रव्याणां बहुलमुत्पत्तिरुपलम्भश्च। उपसर्गप्रमोक्षःअग्न्याद्युपद्रवविमोचनम् । परिहारक्षयः-राज्ञो देयस्य करस्य त्यागाभावः अवधौ धनग्रहणोपेक्षाविरहश्च। हिरण्योपायनं सुवर्णरजतादिरूपोपदास्वीकारः इति। एते नवकोश-वृध्युपायाः। शालिनीवृत्तम्, **शालिन्युक्ताम्तौतगौगोब्धिलोकैः** इति लक्षणम् ।

श्लो **जानन्नष्टौ कोशनाशस्य हेतून्**
ज्ञात्वा दण्डांस्तत्र शास्त्रोपदिष्टान् ।
राजा कोशं पालयेज्जागरूको
देहं योगीवात्मनो राजमौले ॥ 51 ॥

जानन्निति । राजमौले! हे प्रभुश्रेष्ठ! जिगीषुः कोशनाशस्य कोशक्षयस्य हेतुः कारणानि **हेतुर्नाकारणं बीजं निदानं त्वादिकारणं बीजमित्यमरः**

In Public domain. Digitization Muthulakshmi Research Academy

अष्टौप्रतिबन्धप्रयोगव्यवहारावस्तार परिहापणोपभोग परिवर्तनाकहार-नामकान् अष्टसंख्याकान् जानन् अर्थशास्त्रतो जानानस्सन् तत्र तेषु विषये शास्त्रोपदिष्टान् –अर्थशास्त्रोक्तान् दण्डांश्च ज्ञात्वा जागरूकः– जागरणशीलःसन् योगी –योगाभ्यास- परः आत्मनः–स्वस्य देहमिव –शरीरमिव कोशं -अर्थसंघातं धनौघम् । (नि) **अथ कोशवाक् अस्त्री स्यात्कुड्मले दिव्ये विशेषे गेहदेहयोः । धनौघेवेष्टकद्रव्ये पुस्तकाऽसिपिधानयोः शास्त्रे प्रजनने पेश्यां वृषणेऽपि च केचन कृमिभेदस्य नीडे च कौशेय प्रकृता तथा कृता कृते हेमरूप्ये सुषिरे** इति केशवः । पालयेत्–रक्षेत् । अरक्षिते देहे यथा मोक्षप्राप्ते साधनभूतासम्प्रज्ञात समाधिर्न सिध्यति तथा कोशेऽरक्षिते राज्यपालनमपि न सिध्यतीत्युपमाशयः । वृत्तम् शालिनी लक्षणन्त्वसकृदुक्तम् ।

कोशक्षये हेतवो दण्डाश्च यथा –

1. **प्रतिबन्धः**-राजग्राह्यकरादीनामसाधनम् ।साधितानामहस्तप्राप हस्त - प्रापितानां भाण्डागारेऽप्रवेशनमिति त्रिविधप्रतिबन्धः अत्र नष्ट द्रव्यस्य दशगुणो दण्डः ।
2. **प्रयोगः**–कोशागारप्रवेशनीयद्रव्याणामात्मनो वृध्दिलाभाय विनियोगः- स्वयं वृध्दिमुपजीव्य पश्चान्मूलं कोशे स्थापयिष्यामीति मत्वा विनियोगः इति भावः । अत्र फलद्विगुणोदण्डः ।
3. **व्यवहारः** –कोशद्रव्यैर्वाणिज्यकरणम् अत्रापि फलद्विगुणो दण्डः ।
4. **अवस्तारः**-उत्कोचलिप्सया प्राप्तस्य ग्राह्यद्रव्यग्रहणकालस्य प्राप्तीकरणञ्चेति द्विविधोऽवस्तारः अत्र पञ्चगुणो दण्डः ।
5. **परिहापणम्**–प्रतिनियतस्या यस्य न्यूनीकरणम् व्ययस्याधिकी करणञ्चेति द्विविधम्परिहापणम् । अत्र नाशितद्रव्यस्य चतुर्गुणो दण्डः ।

In Public domain. Digitization Muthulakshmi Research Academy

6. **उपभोगः**- रत्नसारफल्गुकुप्यानां राजद्रव्याणां स्वयमुपभोगः परैरुपभोजनञ्चेति द्विविध उपभोगः। अत्र रत्नोपभोगे वधः सारोपभोगे मध्यमस्साहसदण्डः फल्गुकुप्योपभोगे उपभुक्तद्रव्यं तत्परिमाणमवरं द्रव्यञ्च दण्डः उपभोजनेऽप्ययमेव दण्डः।

7. परिवर्तनम्–समानमन्यद्द्रव्यं प्रतिनिधीकृत्य राजद्रव्यस्वीकरणम् अत्राप्युपभोगसमानो दण्डः।

8. अपहारः-लब्धस्यावयस्य पुस्तकेऽलेखनम् लिखितस्य पारितोषिकादिरूपद्रव्यस्य राजनिर्दिष्टायाऽप्रदानम्। हस्तगतेऽपि द्रव्येनाद्यापि हस्तगतमित्यपलपनञ्चेति त्रिविधोऽपहारः। अत्र द्वादशगुणो दण्डः।

श्लो **कार्याध्यक्षा राजमौले! हरेयु-**
श्चत्वारिंशत्साधनै राजकोशम्।
ज्ञात्वा तेषां चेष्टितं दोषभाज-
स्तत्तद्योग्यं दण्डयेद्भूमिपालः ॥ 52 ॥

कार्याध्यक्षा इति राजमौले!–राजश्रेष्ठ! कार्याध्यक्षाःअध्यक्षनियोजने उक्तग्रामाध्यक्षदुर्गाध्यक्षादयः चत्वारिंशत्संख्याकैर्वक्ष्यमाणैरुपायैः राजकोशं-राज्ञो धनौघं हरेयुः अपहरेयुः अतः तेषां कार्याध्यक्षाणां चेष्टितम् अपहरणरूपां चेष्टाम् ज्ञात्वा दोषभाजः दोषकारिणः तत्तद्योग्यं तेषां तेषां दोषाणामानुगुण्यं यथा भवति तथा क्रियाविशेषणमिदम् भूमिपालः–जिगीषुः दण्डयेत्–दण्डनिपातनं कुर्यात्। शालिनीवृत्तम्।

कार्याध्यक्षाणां राजकोशहरणसाधनानि चत्वारिंशत्संख्याकान्यर्थशास्त्रोक्तानि यथा।

1. **पूर्वं सिध्दं पश्चादवतारितं**– वृद्धिलाभार्थं पूर्वसाधितस्य करस्य पश्चादागतस्य करेण सह पुस्तके लेखनं तेन मध्यकाले पूर्वकरवृध्दिमध्यक्षोऽनुभवेत्।

In Public domain. Digitization Muthulakshmi Research Academy

2. **पश्चात्सिध्दं पूर्वमवतारितम्**– उत्कोचग्रहणेन कालहरणं कृत्वा भाद्रपदे ग्राह्यं करं कार्तिके गृहीत्वा भाद्रपदे ग्राह्यं करं कार्तिके गृहीत्वा भाद्रपद एव गृहीत इति लेखनम् ।

3. **असाध्यं न सिद्धम्**– उत्कोचादिकं गृहीत्वा ग्राह्यस्य करस्याग्रहणे राज्ञ आज्ञा एवमिति ।

4. **असाध्यं सिध्दम्**– अग्राह्यकरेभ्यो देवालयधर्मसंस्थादिभ्यो - गूढकरग्रहणम् ।

5. **सिध्दमसिध्दं कृतम्**– करेदेन दत्तं करं करैकदेशं वाऽपहृत्य न प्रदत्तः कर इत्यपलपनम् ।

6. **असिध्दं सिध्दं कृतम्**– सर्वकराग्रहणार्हसमये करदादुत्कोचं गृहीत्वा अर्थकरे दत्तेऽपि दत्तः कृत्स्नः कर इति लेखनम् ।

7. **अल्पं सिध्दं बहुकृतम्** - उत्कोचं गृहीत्वा शतं लब्धं इति लेखनम्

8. **बहुसिध्दमल्पं कृतम्**– द्विशते लब्धे स्वयं शतं गृहीत्वा शतमेव लब्धमिति लेखनम् ।

9. **अन्यत्सिध्दमन्यत्कृतम्**– व्रीहिषु लब्धेषु कोद्रवालब्धा इति लेखनम् एवं कृतेऽध्यक्षेण शालिकरग्रहणनिमित्तो लाभ आत्मसात्कृतो भवति ।

10. **अन्यतःसिध्दमन्यतःकृतम्**- उत्कोचं गृहीत्वा देवदत्ताल्लब्धं द्रव्यं यज्ञदत्ताल्लब्धमिति लेखनम् ।

11. **देयिमिति राज्ञाऽऽदिष्टं दत्तम्**- देवदत्ताय देयिमिति राज्ञाऽऽदिष्टं स्वर्णादिकं स्वयमपहृत्य अदेयस्य फल्गुकुप्यादेर्दानम् ।

12. **कालेन दत्तम्**- काले दत्तम् यज्ञार्थं भारद्वाजाय व्याजाय रूप्यसहस्रं दीयतामिति राजाज्ञायां सत्यां यज्ञकालेऽदत्वा व्यतिक्रान्तकाले उत्कोचं गृहीत्वा कथञ्चित्तस्मै दानम् ।

In Public domain. Digitization Muthulakshmi Research Academy

13.**अल्पं दत्तं बहुकृतं**– देवदत्ताय शतं दीयतामिति राजाज्ञायां स्वयं उपरि शतं गृहीत्वा तस्मै द्विशतमिति लेखनम् ।

14.**बहुदत्तं अल्पं कृतम्** –यज्ञदत्ताय शतं दीयतामिति राजाज्ञायां अर्धं तस्मै दत्वा स्वयमर्धं गृहीत्वा यज्ञदत्ताय शतं दत्तमिति लेखनम् ।

15.**अन्यदत्तमन्यत्कृतम्**– देयतया राज्ञाऽऽदिष्टाश्शालयो दत्तास्तु कोद्रवाः ।

16.**अन्यतो दत्तमन्यतःकृतम्**–राज्ञा देवदत्ताय दीयतामित्यादिष्टम् अध्यक्षेण तु यज्ञदत्ताय दत्तम् ।

17.**प्रविष्टमप्रविष्टं कृतम्**–कोशनिवेश्ये द्रव्ये हस्तगतेऽपि न हस्त-गतमित्यपलप्यहरणम् ।

18.**अप्रविष्ठं प्रविष्टं कृतम्** – करदेभ्य उत्कोचं गृहीत्वाऽनागतेऽपि करे समागतमिति लेखनम् ।

19.**कुप्यमदत्तमूल्यम्प्रविष्टम्**– हिरण्यरजतव्यतिरिक्तं वस्त्रताम्रादिकं कुप्यम् (नि)**ताभ्यां यदन्यत्तत्कुप्य**मित्यमरः । वस्त्रताम्रपात्रादिकं राजा देशाद्दणेन गृहीतं । कथञ्चित्कालान्तरे दत्तमूल्यैक देशं कृत्वा दत्तसमग्रमूल्यमितिलेखनम् ।

20.**दत्तमूल्यं न प्रविष्टम्** – महामूल्यं कुप्यन्तावन्मूल्यं दत्त्वा क्रीतम् पुस्तके तु मूल्यं दत्तमिति न लिखितम् ।

21.**संक्षेपो विक्षेपः कृतः**- जनसमूहदेयः पिण्डाकरो विक्षेपः कृतः जनसमुदाय देयस्य पिण्डकरस्य समूहेभ्यःप्रत्येकं विभज्य स्वीकरणम् अनेन राजद्रव्यं प्रजाद्रव्यञ्चोपजीवितुं शक्यम् ।

22.**विक्षेपस्संक्षेपः कृतः**- एकस्माज्जनाद्बहुभिर्मासैरल्पशोग्राह्यस्यकरस्य सम्पिण्ड्यैकस्मिन्नेव समये स्वीकरणम् अनेन द्रव्यं प्रजाद्रव्यञ्चोप-जीवितुमध्यक्षेण शक्यम् ।

In Public domain. Digitization Muthulakshmi Research Academy

23.**महार्घमल्पार्घेणपरिवर्तितम्**–महार्घस्य युग्यवाहनादिकस्याल्प मूल्येन युग्यवाहनादिना विनिमयीकरणम् अनेन तद्विनिमयोपलब्धद्रव्यापहरणं भवेत् ।

24.**अल्पार्घ महार्घेण परिवर्तितम्**– अल्पर्घ महार्घेण परिवर्तितं बहुविक्रयविषयीभूतस्य सामुद्रलवणादेर्महामूल्येनाल्पविक्रय विषयेण सैन्धवलवणादिना विनिमयीकरणम् अनेन बहुविक्रय लब्धलाभ स्वीकारो भवेत् ।

25.**समारोपितोऽर्घः**–पूर्वस्थितस्य मूल्यस्याधिकीकरणम् । तथा करणे मूल्यन्यूनीकरणकामेभ्यः क्रेतृभ्यः पण्याध्यक्षेण उत्कोचः अर्जयितुं शक्यते ।

26.**प्रत्यवरोपितोऽर्घः**–पूर्वस्थितस्य मूल्यस्य न्यूनीकरणम् अनेन मूल्याधिकीकरणकामेभ्यो विक्रेतृभ्यो उत्कोचार्जयितुं शक्यते पण्याध्यक्षेण ।

27.**रात्रयस्समारोपिताः**- त्रिरात्रिवेतनं कर्मकरेभ्यो दत्त्वा चतूरात्रवेतनं दत्तमिति लेखनम् । अनेन कर्मकरधनमपहर्तुं शक्यते ।

28.**रात्रयःप्रत्यवरोपिताः**-प्रभुसकाशाद्दशरात्रव्ययं गृहीत्वा नवरात्रव्ययो गृहीत इति लेखनम् । अनेन प्रकारेण प्रभुद्रव्यमपहर्तुं शक्यते ।

29.**संवत्सरो मासविषमःकृतः**– अधिकमासरहितस्य स्वसंवत्सरस्याधिकमास सहितत्वेन लेखनम् ।अनेनायेनाधिक मासलाभोऽनु भूयते अध्यक्षेण ।

30.**मासो दिवसविषमःकृतः** – अनून दिवसस्य मासस्य दिवसोत्सवलेखनम् अनेनैकदिवसलाभोऽनुभूयतेऽध्यक्षेण ।

31.**समागमविषमः**-वेतनग्रहणार्थमागतेषु कर्मकरेषु परोक्षं कमपि कर्मकरमागन्तव्यमपदिश्य स्वयं तद्वेतनग्रहणम् ।

In Public domain. Digitization Muthulakshmi Research Academy

32.**मुखविषमः**-अन्यस्मादायस्थानादागतं द्रव्यमन्यस्मादादाय स्थानादागतमिति तदध्यक्षादुत्कोचं गृहीत्वा ख्यापनम् ।

33. **धार्मिकविषयः**–ब्राह्मणेभ्यश्शतरूप्याणि दीयतामिति राजादेशे तत्कार्याध्यक्षेण पुरोहितेन तदर्थापहरणम् ।

34.**निर्वर्तनविषमः**–अद्यैव भवद्भिः करो देय इति करदान्निरुध्यतेषु कस्यचित्करप्रदातुस्सकाशादुत्कोचं गृहीत्वा तस्य मोचनम् ।

35.**पिण्डविषमः**- समूहदेये धने समूहादेकमुत्कोचस्य दातारं वर्जयित्वा परेभ्ये धनग्रहणम् ।

36.**वर्णविषमः**- नद्यादीनामुत्तरणे ब्राह्मणैः शुल्को न देयः अन्यवर्णैस्तु देय इति नियमः अतो नावाध्यक्षेण शुल्कहरणपरेण ब्राह्मणा एवास्मिन्दिने नदीमुत्तारिता इत्यपलप्य तद्दिवसलब्धशुल्कधनापहरणं वर्णविषयः यद्वा नवमवर्णकसु वर्णे ग्राह्ये दशमवर्णकं सुवर्णं स्वर्णदायकाद्गृहीत्वा सुवर्णाध्यक्षेण नवमवर्णकस्य सुवर्णस्य कोशे निवेशनम् । एतेन एकवर्णलाभः सुवर्णाध्यक्षस्य ।

37.**अर्घविषयः**-सेनानिवेशादावर्घस्याव्यवस्थितत्वात्तं किञ्चिदधिकमपदिश्य तल्लब्धिलाभस्य सैन्याध्यक्षेण हरणम् ।

38.**मानविषयः**-हीनैः परिमाणोन्मानसाधनैर्देयं दत्त्वा महद्भिस्साधनैर्ग्राह्यस्य ग्रहणम् अनेनोपायेन मानाध्यक्षो लाभमर्जयति ।

39.**मापनविषयः**-प्रमातृहस्तविशेषोत्पादितं वस्त्रादि मानवैषम्यं मानविषमः अनेनोपायेन प्रमात्रा स्वस्मै लाभोऽर्ज्यते ।

40.**भाजनविषमः**-घृतपूर्णं कुम्भशतं यज्ञदत्ताय दीयतामिति राज्ञाऽऽदिष्टे अल्पपरिमाणं कुम्भशतं यज्ञदत्ताय दत्त्वा बृहत्परिमाणं कुम्भशतं दत्तमिति लेखनम् ।अनेन तद्व्यत्ययागतं राजद्रव्यं तदध्यक्षेण पुरोहितेन हरणम् ।

In Public domain. Digitization Muthulakshmi Research Academy

एते राजद्रव्यहरणोपायाः अन्येऽप्येतादृशा ऊह्याः। राज्ञा हरणोपायेषु शङ्क्यमानेषु उपर्युक्तभाण्डागारिक, लेखक, प्रतिग्रहीतृकर्मदराजपुरुष धीसचिव मन्त्रिजनेनाध्यक्षेणापहृतं अवानवेति पृच्छेत् मिथ्यावादे उपर्युक्तादीनामध्यक्षेण समो दण्डो विधेयः जनपदे च सपटहताडन-ममुनाऽध्यक्षेणोत्कोचग्रहणादिना पीडिताः प्रजा आवेदयन्त्विति घोषयेत् आवेदयतो जनस्योपघातानुसारेण सविचारणं द्रव्यं राजाऽध्यक्षेण दापयेत्। एवमादयोदण्डाश्शास्त्रं विज्ञाय विधेयाः।

श्लो **विकारमेष्यन्ति तुरङ्गतुल्याः**
क्रियानियुक्तान्नृपते मनुष्याः।
तस्मादशेषेषु गुणेषु सत्स्व –
प्यनुक्षणं ते परिशीलनीयाः ॥ 53 ॥

विकारमेष्यन्तीत्यादिनाऽध्यक्षादीनामुपधादिभिः पूर्वं परीक्षिताना-मपि पुनः पुनः परीक्षणमावश्यकमित्युपमानप्रदर्शनपूर्वकमाह नृपते! राजन् क्रियासु तुरङ्गपक्षे रथवहनादिकार्येषु मनुष्यपक्षराजकार्येषु च नियुक्ताः क्रियानियुक्ताः मनुष्याः तुरङ्गाणां तुल्याः तुरङ्गतुल्याः हयसदृशास्सन्तः अत्र षष्टीतत्पुरुष एव भवति न तु तृतीयातत्पुरुषः तुल्यशब्दे न योगे तृतीया-तत्पुरुषस्य विधायकाभावात् (सू) **पूर्वसदृशसमोनार्थकलह निपुणमिश्र-श्लक्ष्णे**रिति तृतीयसमास विधायक सूत्रस्थ सदृश समशब्दौ तु स्वरूपपरौ नार्थपरौ तुल्यशब्दयोगे षष्टी तु (सू) **तुल्यार्थैरतुलोपमाभ्यां तृतीयान्यतर स्यामि**त्यनेन भवति। विकारं उत्कोचादिग्रहणेन विकृतिम् एष्यन्ति–गच्छन्ति गतावित्यस्माद्दैवादिकाल्लट्प्रथम पुरुषबहुवचनम् लोके रथशकटादिवाहन कर्मणिनियुक्ता हयास्साधुशीलतया दृश्यन्ते। नियुक्तास्तु विकुर्वते। तथैव मनुष्या अपि अध्यक्षादि कर्मस्वनियक्ता- स्साधुशीलतया दृश्येरन् युक्ताश्च दुश्शीलतां प्राप्येरन्निति भावः तस्मात् अशेषेषु सकलेषु गणेषु

In Public domain. Digitization Muthulakshmi Research Academy

–उपधाशुद्धत्वादि- गुणेषु सत्स्वपि ते –अध्यक्षादयः अनुक्षणं प्रत्यक्षणम् **अव्ययं विभक्तेत्यादिना** यथार्थेऽव्ययीभावः परिशीलनीयाः–परीक्ष्याः अत एवोक्तं भगवता व्यासेन अर्थपुरुषो दास इति वृत्तमुपजातिः।

श्लो **मत्स्यानां सलिलान्तरे विचरतां पानं यथा पाथसो**
न ज्ञायेत तथा धने विचरतामर्थापहारो नृणाम् ।
तस्मात्कार्यनियुक्तवर्गमखिलैर्यत्नैर्नृपश्शोधये
न्नोचेत्तस्य पराभवं परजना उत्पादयेयुः प्रभो! ॥ 54 ॥

मत्स्यानामित्यादिना पूर्वोक्तमेव विषयं दार्ढ्यायोपमानान्तरेण पुनः प्रतिपाद्य तथाऽकरणे दोषमप्याह। सलिलान्तरेजलमध्ये (नि) **अन्तरमवकाशावधि परिधानान्तार्थिभेदतादर्थ्ये छिद्रात्मीय विना बहिरवसरमध्यात्मसदृशेषु** इति मेदनी । विचरतां विशेषेण सञ्चरतां मत्स्यानाम् पाथसः जलस्य (नि) **पाथोऽर्केऽग्नौ जले क्लीबमि**तिमेदिनी पानं यथा न ज्ञायेत जनैरितिशेषः तथा तेन प्रकारेण धने राजधने विचरताम् व्यवहरताम् नृणाम्कोशाध्यक्षादीनां सम्बन्धी अर्थापहारःअर्थस्यापहरणम् प्रभो हे राजन् नृपेणेत्यध्याहार्यम् । नृपेण जिगीषुणा न ज्ञायेत अतिनिगूढहरत्वात् तेषाम् तस्मात् कार्यनियुक्तवर्गं तत्तत्कार्येषु नियुक्तानामध्यक्षादीनां समूहानां नृपः-जिगीषुः अखिलैः अर्थशास्त्रोक्तैस्सकलैः यत्नैःप्रयत्नैः चारनियोजनाद्युपायै- रित्यर्थः शोधयेत् परिशोधयेत् नोचेत् जिगीषुरेवं यदि न कुर्यात् तस्य जिगीषोः परजनाः शत्रवः पराभवम् उत्पादयेयुः जनयेयुः । वृत्तं शार्दूलविक्रीडितम् । लक्षणन्तूक्तम् ।

श्लो **ये भक्षयन्ति न धनं धरणीश्वरस्य**
द्रव्यं यशश्च सततम्परिवर्धयन्तः ।
नित्याधिकारपदवीषु नृपः प्रभो तान्
संस्थापयेद्बहुलगौरवमादधानः ॥55 ॥

In Public domain. Digitization Muthulakshmi Research Academy

ये भक्षयन्तीत्यादिना राजद्रव्यानपहारिणामध्याक्षदीनां कर्तव्यं गौरवमाह। हे राजन् नृप जिगीषुः धरणीश्वरस्य जिगीषोः द्रव्यं-धनम् (नि) **द्रव्यं त्वर्थे गुणाश्रये औषधे पित्तले योग्यकृग्सामेष्विष्टिगामिषु** इति केशवः यशः कीर्तिम् सततं –सदा परिवर्धयन्तः वृध्दिं प्रापयन्तः धनं राज्ञो द्रविणम् ये- अध्यक्षादयः न भक्षयन्ति नापहरन्ति तान् अध्यक्षादीन् बहुलगौरवं बहुगौरवम् (नि) **अदभ्रं बहुलं बह्वित्यमरः** आदधानः कुर्वन् नित्याधिकारपदवीषु शाश्वतेष्वधिकारस्थानेषु संस्थापयेन्निवेशयेत्। एवं कृते तेषां राज्ञि सद्भावो भवति। वसन्ततिलका वृत्तम् । **उक्तावसन्ततिलका-तभजाजगौ गः**, इति लक्षणात्।

कर्तव्यसंग्रहः

श्लो **प्रकाश्यते येषु निगूढभावः**
प्रपञ्चवेद्यो निगमागमानाम् ।
निर्मापयोद्भूपतिरुत्तमांस्तान्
राजन्! प्रबन्धान्कविभिस्समर्थैः ॥ 56 ॥

देशक्षेमङ्करमैहिकामुष्मिकफलप्रदं शाश्वतकीर्तिप्रतिष्ठापकं राज्ञः कर्तव्यसङ्ग्रहं प्रकाश्यत इत्यादिभिष्षड्भिश्लोकैराह। येषु येषु ग्रन्थेषु वेदितुमर्हो जनो ग्राह्य इत्यर्थः निगमागमानां वेदशास्त्राणाम् (नि) **वणिक्पथः पुरं वेदो निगमा** इत्यमरः। (नि)**आगमश्शास्त्र आगताविति मेदिनी निगच्छन्त्यनौ** नेति निगमः (सू) **हलश्चे**तिप्राप्तस्य षुञोऽपवादतयाघ-प्रत्ययान्तो निपातितः।

श्लो **प्रतापरुद्रदेवस्य गुणानाश्रित्य निर्मितः**
अलङ्कारप्रबन्धोऽयं सन्तः कर्णोत्सवोऽस्तुवः ॥ 57 ॥

प्रतापरुद्रीये काव्यप्रकरणे भूपतिः जिगीषुः समर्थैः प्रतिभा व्युत्पत्त्यभ्यासरूपसामर्थ्ययुक्तैः कविभिः निर्मापयेत् प्रतिभादि युक्तानामेव

In Public domain. Digitization Muthulakshmi Research Academy

कवीनां काव्यकरणयोग्यता भवति। नान्येषामिति शास्त्रसिध्दान्तः। तथा च मम्मटः **"शक्तिर्निपुणता लोकशास्त्र काव्याद्यवेक्षणात्। काव्यज्ञशिक्षाया-भ्यास इति हेतुस्तदुद्भवे"** इति लोकोत्तरवर्णनानैपुण्यलक्षणस्य कवित्वस्य बीजरूपा प्रज्ञा परपर्याया काचिद्वासनाशक्तिः एतामेवाभिव्यक्तां प्रतिभामाहुः काव्यज्ञाः स्मृतिर्व्यतीतविषया मतिरागामिगोचराः। **बुद्धिस्तात्कालिकी ज्ञेया प्रज्ञा त्रैकालिकीमता॥ प्रज्ञां नवनवोन्मेष शालिनीं प्रतिभां विदुः।** इति लोकस्य स्थावरजङ्गमात्मक लोकवृत्तस्य शास्त्राणां छन्दोव्याकरण कोशनृत्यगीतादि चतुःषष्ठिकलाधर्मादिचतुर्वर्गतुरगखड्गधनुर्बाणसामुद्रिकज्योतिषायुर्वेदादि-शास्त्रणां वाल्मीकि व्यास कालिदासादि महाकवि कृतकाव्यानाम् आदिशब्दात् इतिहासपुराणादीनाञ्च मुहुर्मुहुः परिशीलनाज्ञाताव्युत्पत्तिः काव्यं निर्मातुं काव्यसम्बन्धि सदासद्भावं विवेचयितुं च ये जना जानन्ति तेषां काव्यज्ञानामुपदेशेन (काव्यस्य) रचनायां पदानामावापोद्वापे च पुनः पुनः प्रवृत्तिरूपोभ्यासः इत्येते शक्तिव्युत्पत्त्यभ्यासास्त्रयस्समुदिता एव काव्यस्य निर्माणे उत्कृष्टत्वे च कारणं न तु व्यस्ताः कारणानीति तात्पर्यम्। आचार्य दण्डिनाऽप्येवमेवोक्तं **नैसर्गिकी च प्रतिभा श्रुतञ्च बहुनिर्मलम् अमन्दश्चाभियोगोऽस्याः कारणं काव्यसम्पदः** इति (काव्यादर्शे १.१०३) वृत्तमुपजातिः।

श्लो **चतुःषष्टिकलाः पोष्याः पाल्या विद्याश्चतुर्दश।**
संरक्षणीया वर्णाश्रमाचाराः प्रभुणा प्रभो! ॥ 58 ॥

चतुःषष्ठीति प्रभो! हे राजन् प्रभुणा-लोकक्षेमाभिलाषिणा जिगीषुणा गीतवाद्यादयो भोजराजादिभिः प्रतिवादिताः चतुःषष्ठिसंख्याकाः कलाश्चतु-ष्षष्टिकलाः पोष्याः पोषणीयाः। चतुर्दशचतुर्दशसंख्याकाः विद्याः वेदवेदाङ्ग-पूर्वोत्तरमीमांसान्यायपुराणधर्मशास्त्ररूपाः पाल्याः अध्ययनाध्यापनप्रचारा-

In Public domain. Digitization Muthulakshmi Research Academy

दिषु गुरुशिष्यप्रेरणपोषणादिभिरक्षणीयाः। वर्णाश्रमाचाराः ब्राह्मण क्षत्रिय-वैश्यशूद्रवर्णाः, ब्रह्मचर्यगार्हस्थ्यवानप्रस्थ सन्न्यासाश्रमाः कुलक्रमागता-श्शिष्टाचाराश्च संरक्षणीयाः।तेषां साङ्कर्यराहित्याय पालनीयाः। सङ्करोनरका-यैवेति वर्णादिसाङ्कर्यस्य नरकहेतुत्वस्य भगवद्गीतासु प्रतिपादितत्वात् वृत्तमनुष्टुप्।

चतुःषष्टिकलाश्शब्दकल्पद्रुमकोशे निरूपिताः। ता यथा-

1.गीतम् 2.वाद्यम्, 3.नृत्यम्
4.नाट्यम् 5.आलेख्यम् 6. विशेषकच्छेद्यम्
7.तण्डुलकुसुमबलिविकाराः 8.पुष्पास्तरणम् 9.दशनवसनाङ्गरागाः
10.मणिभूमिकाकर्म 11.शयनरचनम् 12.उदकवाद्यम्
13.उदकाघातः 14.चित्रायोगः 15.माल्यग्रथनविकल्पाः
16.शेखरयोजनम् 17.नेपथ्ययोगः 18.कर्णपत्त्रभङ्गाः
19.ग्रन्थयुक्तिः 20.भूषणयोजनम् 21.इन्द्रजालः
22.कूचिमार योगाः 23.हस्तलाघवम् 24.चित्रशाकापूपभक्ष्य-विकारक्रिया
25.पानकरसरागासवयोजनम् 26.सूचीवापकर्माणि 27.सूत्र-क्रीडा
28.प्रहेलिका 29.प्रतिमाला 30.दुर्वञ्चकयोगाः
31.पुस्तकवाचनम् 32.नाटकाख्यायिकादर्शनम् 33.(काव्य) समस्यापूरणम्
34.पट्टिकावेत्रवाणविकल्पाः 35.तर्ककर्माणि 36.तक्षणम्
37.वास्तुविद्या 38.रूप्यरत्नपरीक्षा 39.धातुवादः
40.मणिराग ज्ञानम् 41.आकरज्ञानम् 42.वृक्षायुर्वेदयोगाः
43.मेषकुक्कुटलावकयुध्दविधिः 44.शुकशारिका प्रलापनम् 45.उत्पादनम्

In Public domain. Digitization Muthulakshmi Research Academy

46.केशमार्जनकौशलम् **47.**क्षरमुष्टिकाकथनम् **48.**म्लेच्छितकविकल्पाः
49.देशभाषाज्ञानम् **50.**पुष्पशकटिकानिमित्तज्ञानम् **51.**यन्त्रमातृका
52.धारणमातृका **53.**सम्पाट्यम् **54.**मानसकाव्यक्रिया
55.क्रियाविकल्पाः **56.**छलितकयोगाः **57.**अभिधानकोशच्छन्दोज्ञानम्
58.वस्त्रगोपनानि **59.**द्यूतविशेषः **60.**आकर्षक्रीडा
61.बालक्रीडनकानि **62.**वैनायकविद्याज्ञानम् **63.**वैजयिकविद्याज्ञानम्
64.वैतालिकविद्याज्ञान- मिति ।

अथ चतुर्दशविद्या यथा- "**अङ्गानि वेदाश्चत्वारो मीमांसा न्यायविस्तरः । पुराणं धर्मशास्त्रञ्च विद्याह्येताश्चतुर्दश**" ॥ इति ।

आयुर्वेद धनुर्वेद गान्धर्वनीतिशास्त्रैस्सहविद्या अष्टादशेत्यन्ये चतुर्दशेत्युक्तिरष्टादशेत्यस्याऽप्युपलक्षणमितिमन्तव्यम् ।

श्लो **शिशून् दरिद्रानबलान्विपन्नान्**
वृध्दांश्च रुग्णान् विकलाङ्गबन्धान् ।
महीपते! किम्बहुना नरेन्द्रो
जनाननाथान्बिभृयादशेषान् ॥ 59 ॥

शिशूनिति महीपते हे भूपते! नरेन्द्रः जिगीषुः शिशून् रक्षकरहितशिशून् अधनान् अबलान् यत्किमपि कर्म कृत्वा जीवितुमशक्तान् विपन्नान् आपद्ग्रस्तान् वृध्दान् वयसा वृध्दान्, इदं ज्ञानवृध्दानामप्युपलक्षणम् ।रुग्णान् दीर्घव्याधिग्रस्तान् विकलाङ्गबन्धान् अवयवसन्धानविकलान् बहुनाविविच्य इत्थं बहूक्तेन किं किम्प्रयोजनम् विविच्य बहुधावचन मनावश्यकमित्यर्थः । अशेषान् अखिलान् (नि) **अथ समं सर्व विश्वमशेषं कृत्स्नं समस्तनिखिला- खिलानि निश्शेषमित्यमरः।** अनाथान् रक्षकरहितान् जनान् बिभृयात् अन्नवस्त्रादिदानेन पुष्येत् । पित्रा सुता इव राज्ञा सर्वाः प्रजाःपोषणीया इति भावः । वृत्तम् उपजातिः ।

In Public domain. Digitization Muthulakshmi Research Academy

श्लो **कार्याणि पूर्वनरपालकृतानि राजा**
ज्ञानप्रदानि सुखदानि च राजमौले! ।
संवर्धयन् प्रतिपदं परिशील्य भूयः
कुर्यात्स्वयं नवनवान्यपि देशहेतोः ॥ 60 ॥

कार्याणीति राजमौले! हे राजश्रेष्ठ! राजा जिगीषुः पूर्वनरपालकृतानि स्वस्मात् प्राचीनराजैः कृतानि ज्ञानप्रदानिमोक्षोपयोगिबुध्दिजनकानि (नि) **मोक्षेधीर्ज्ञानमि**त्यमरः। सुखदानि इहपरलोकयोस्सुखप्रदानि च कार्याणि कृत्यानि संवर्धयन् तानि पूर्वराजकृतकार्याणि सम्यग्वृध्दिं प्रापयन् प्रतिपदं पदं पदं वदन्ति प्रतिपदं स्थाने स्थाने **अव्ययं विभक्ति**त्यादिना यथार्थे वीप्सायामव्ययीभावस्तुष्वित्यमरः परिशील्यकर्तव्येषु किंकिमवशिष्टम्, कृतेषु च कुत्र वा दोषः प्रसक्त इत्यादिरूपेण परिशीलनां कृत्वा स्वयं आत्मना " **स्वयमात्मनेत्यमरः**" देशहेतोःप्रजाक्षेमार्थमित्यर्थः। अत्र देशशब्देन देशस्थाः प्रजा लक्ष्यन्ते नवनवान्यपि अत्यन्तनूतनान्यपि कार्याणीत्यनुषज्यते कुर्यात्। वृत्तं वसन्ततिलका। लक्षणन्तूक्तम्।

श्लो **सेवस्व शास्त्रविहितानि कृतप्रयत्नो**
दूरीकुरुष्व नृपते! विधिदूषितानि।
धर्मस्य तत्वमिदमेव गुहानि गूढं
वेद्यं यदस्ति ननु तत्तदवेदनीयम् ॥ 61 ॥

सेवस्वेति न्नरपते! हे राजन्! कृतप्रयत्नः कृतः प्रकृष्टो यत्नः येन शास्त्रविहितानि शास्त्रेण विहितानि कर्तव्यत्वेन बोधितानि कर्माणीति शेषः।(नि) " **शास्त्रं न द्वयोरागमाज्ञयोरिति**" मेदिनी। सेवस्व भजस्व आचरेत्यर्थः विधिदूषितानि विधिना शास्त्रेण दूषितानि नानृतं वदेत्, न कलञ्जं

In Public domain. Digitization Muthulakshmi Research Academy

भक्षयेत्, न परदारान् गच्छेदित्यादिनाऽकर्तव्यत्वेन निन्दितानि कर्माणि दुरीकुरुष्व । (सू) **कृभ्वस्तियोगे दूरशब्दाच्च्विप्रत्यये,** (सू) अस्य च्वावित्यकारस्येत्वे दूरीकुरुष्वेति सिध्यति तथा च प्रयोगः **"अमरीकबरीभार-भ्रमरीमुखरीकृतम्। दूरीकरोतु दुरितं गौरीचरणपङ्कजम्"** इति कुवलयानन्दे। गुहा निगूहं महर्षीणां ऋध्दिरूपगुहायां नितरां रहस्येत्वेनस्थितम् । यद्वा गुहायां अज्ञानेन निगूढं नितरामावृतम्। धर्मस्य वेदशास्त्रचोदितार्थस्य **चोदनालक्षणोऽर्थो धर्म** इति जैमिनिसूत्रम् । **"तत्त्वं स्वरूपम् तत्वं स्वरूपे परमात्मनि स्याद्विलम्बितनृत्ये चेति"** मेदिनी। इदमेव शास्त्रविहितसेवनं शास्त्रदूषितत्याग श्चेत्येतदेव नान्यदस्तीति भावः। तव वेद्यं वेदितुं ज्ञातुमर्हम् (अर्हार्थे यत्) यत् लोकक्षेमायेति शेषः अस्ति वर्तते तत् तव वेदनीयम् ननु ज्ञापनीयम् खलु अत एवोक्तम् राज्यलोक श्रेयोऽभिलाषिणामयेत्याशयः। वृत्तम् वसन्ततिलका ।

श्लो **अर्थशास्त्रमनुसृत्य निर्ममे**
राजधर्ममुमार्यसम्मतम् ।
त्वादृशां विजयलब्धये प्रभो!
शीलयस्व कविराट्चिदम्बरः ॥ 62 ॥

इति चिदम्बरकृते राजधर्मे द्वितीयसर्गः। अर्थशास्त्रमित्यादिनापुरस्सरं स्वग्रन्थस्य समूलत्वं प्रामाणिकत्वञ्च प्रतिपाद्य निगमयति । प्रभो हे राजन् कविराट् कविराजः कविश्रेष्ठः इत्यर्थः । कविशब्दे उपदेशे उपवेदे राजृ-दीप्तौ इतिधातोः **सत्सूद्विषद्रुहदुहयुजविदभिदच्छिदजिनीराजामुपसर्गेऽपि** क्विप् इति क्विपि **व्रश्चभ्रस्जसृदमृजयजराजभ्राजच्छशां** इति जस्य षत्वे तस्य जश्त्वेन डकारे तस्य चर्त्वेन टकारे कविराट् इति रूपम् चिदम्बरः इति

In Public domain. Digitization Muthulakshmi Research Academy

ग्रन्थकृता ग्रन्थान्ते स्वनाम निर्देशः कृतः। स च चिदाकाशस्थस्य भगवतश्शिवस्याऽपि वाचक इति देवतावाचकत्वेन ग्रन्थान्ते प्रयुक्तो मङ्गलार्थोऽपि भवति । तद्यथा पस्पशाह्निके महाभाष्ये कथम्पुनरेकेन यत्नेनोभयं लभ्यमिति प्रश्ने द्विगताः अपि हेतवो भवन्ति। तद्यथा आम्राश्चसिक्ताः पितरश्चतृप्ताः भवन्तीति भगवता पतञ्जलिनोक्तम्। द्विगताः द्वावर्थौ गताः प्रयोजनद्वयसम्पादका इत्यर्थ इति कैयटः अभियुक्ता अप्येवमेनं ब्रुवन्ति। **एका क्रियाद्व्यर्थकरी बभूवे**ति त्वादृशां तत्सदृशानाम् त्वमिव जिगीषु त्वमिच्छता मित्यर्थः। विजयलब्धये विजयस्य प्राप्त्यर्थम् **तादर्थ्ये चतुर्थी वाच्ये**ति चतुर्थी अर्थशास्त्रम्कौटिल्यबृहस्पत्यादिकृतमर्थशास्त्रम् अनुसृत्यतदुक्त विषयानुसारेण आर्यसम्मतं सज्जनानामिष्टम्। " **आर्यस्साधौ सौ विदल्लेपीति विश्वः**"। अमुम् राजधर्मम् राजधर्मनामकं ग्रन्थं राज्ञां शास्त्रेण विहितानां धर्माणां प्रतिपादकत्वाद्राजधर्म इति नामसार्थकमित्याशयः। निर्ममे रचयामास। निर् पूर्वकात् माङ् माने शब्दे ङीत्यस्माल्लिटिप्रथमपुरुषैकवचनम्। शीलयस्व उपधारय एतद्ग्रन्थस्थ विषयानिति शेषः शील उपधारणे इत्यस्माच्चेदादि कात्सकर्मकाददन्ता ल्लोण्मध्यमपुरुषैकवचनम्।उपधारणमभ्यास इति माधवदीक्षितादयः।

इति श्रीभारद्वाजसगोत्रापस्तमम्बसूत्र कनकाम्बासीतारामतनूभव चिदम्बर कवीन्द्रानुज समधीतव्याकरणवेदान्तमन्त्रशास्त्र संस्कृतान्ध्रभाषाम्बहुग्रन्थरचनाविशारद श्रीसूर्यरायान्ध्रनिघण्टुनिर्माणधुरीणाभिनवनृपार्य बिरुद भासुरविश्वेश्वरसुधीवरविरचितायां राजधर्मव्याख्यायां जयाख्यायाम् द्वितीयस्सर्गस्सम्पूर्णः॥

In Public domain. Digitization Muthulakshmi Research Academy

राजधर्मश्लोकानां छन्दसां विवरणम्

1. अनुष्टभ्	-	1-36,1-41,1-51, 2-57
2. आर्या	-	1-17,1-26,1-27,1-28,1-29,1-30, 1-31,1-32 1-40,1-42,1-46,1-47, 1-48,1-49,1-50,1-53, 1-54,1-55, 1-57, 2-2, 2-4, 2-7, 2-10, 2-11, 2-12, 2-14, 2-18, 2-19, 2-20, 2-21, 2-22,2-23, 2-24, 2-25, 2-26, 2-27, 2-28, 2-29
3. इन्द्रवज्रा	-	1-12,1-19,1-20,1-24
4. उपजाति	-	1-3, 1-5,1-8,1-10,1-11,1-15,1-23, 1-25, 2-3, 2-42, 2-43, 2-44, 2-48, 2-53, 2-58
5. उपेन्द्रवज्रा	-	1- 2,1-4,1-14, 2-16, 2-37, 2-38, 2-46, 2-47, 2-56,
6. प्रहर्षिणी	-	2-32
7. भुजङ्गप्रयातम्	-	1-9,1-35
8. रथोध्दता	-	2-9, 2-61
9. वंशस्थम्	-	2-31
10.वसन्ततिलका	-	1-1,1-6,1-7,1-18,1-21,1-33,1-52, 2-5, 2-6, 2-13, 2-15, 2-17, 2-39, 2-40, 2-41, 2-55, 2-59, 2-60

In Public domain. Digitization Muthulakshmi Research Academy

11. **वियोगिनी** - 2-30

12. **शार्दूलविक्रीडितम्** - 1-22, 1-37, 1-38, 1-39, 1-44, 1-45, 1-56, 1-58, 2-8, 2-34, 2-35, 2-36 2-54,

13. **शालिनी** - 1-16, 1-43, 2-1, 2-45, 2-49, 2-50, 2-51, 2-52,

14. **स्रग्धरा** - 1-34, 2-33

In Public domain. Digitization Muthulakshmi Research Academy

In Public domain. Digitization Muthulakshmi Research Academy

In Public domain. Digitization Muthulakshmi Research Academy

ISBN- 978-93-80171-56-2

SANSKRIT ACADEMY
(Adarsh Shodha Sansthan)
Osmania University, Hyderabad-500 007, T.S. India
Telephone: 040-27070281
Email: sanskritacademyhyd@gmail.com
www.sanskritacademy.net
web: www.osmania.ac.in/sanskritacademy